प्रजापतिर्वा इदं त्रयेण वेदेनाजयद्यदस्येदं जितं तस्स ऐक्षतेत्थं चेद्वा अन्ये देवा अनेन यक्ष्यन्त इमां वाव ते जितिं जेप्यन्ति येयं मम हन्त त्रयस्य रसमाददा इति स भूरित्येव ऋग्वेदस्य रसमादत्त सेयं पृथिव्यभवत् तस्य यो रसः प्राणेदत् सोऽग्निरभवद्रसस्य रसः ॥

End :

यज्ञो वै प्रचोदयति– स्त्री च वै पुरुषश्च प्रजनयतः । यो वा एतां सावित्रीमेवं वेद । अप पुनर्मृत्युं तरति सावित्र्या एव सलोकतां जयति सावित्र्या एव सलोकतां जयति ॥

Colophon :

उपनिषद्ब्राह्मणं समाप्तम् ॥

38

Sl. No. 290 **ताण्ड्यब्राह्मणम्** Ms. No. P. 1670/1

(पञ्चविंशब्राह्मणम्, महाब्राह्मणम्, ताण्ड्यमहाब्राह्मणम्, प्रौढब्राह्मणम्)

Beginning :

महन्मे वोचो, भर्गो मे वोचो, यशो मे वोचः, स्तोमं मे वोचो, भुक्तिर्मे वोचः, सर्वं मे वोचः, तं मावतु, मा विशतु, तेनोसि, × × × पीय देवो देव × × × सामस्सोम मेस्वृतस्य पथा विहाय दौष्कृत्यं—

End :

गौरिवितिर्वा क्रौञ्चं त्वाष्ट्री साम गौरी वितर्वा ऋषभश्शक्करमधुस्त्सुन्निधनं कार्तयशं कोत्सन्निह वो भवत्येतद्वै यज्ञस्य त्रिदशानामागाम् ॥

Colophon :

महाब्राह्मणं समाप्तम् ।

39

Sl. No. 291 ताण्ड्यमहाब्राह्मणम् (पञ्चविंशब्राह्मणम्, महाब्राह्मणम्, ताण्ड्यमहाब्राह्मणम्, प्रौढब्राह्मणम्) Ms. P. 1946

Beginning :

प्रजापतिरकामयत बहुस्यां प्रजायेयेति स एतमग्निष्टोममपश्यत्तमहारत्तेनेमाः प्रजा असृजत ॥ १ ॥

एकादशेन च वै सता स्तोत्रेणाग्निष्टोमस्यासृजत एकादशेन त्वा मासा संवत्सरस्य ता द्वादशेन च स्तोत्रेणाग्निष्टोमस्य पर्वगृह्णात् द्वादशेन च मासा संवत्सरस्य ॥ २ ॥

End :

विराट् वामदेव्यमग्निष्टोमसाम भवति शान्त्यै + + + + त्रिष्टुभो द्वादशाक्षरं पदं तेन जगत्यो त्रयस्त्रिँशदक्षराः तेन विराजः तेनानुष्टुभो यदेकस्माद[illegible]क्षराद्विराध्यन्ति त्रयास्त्रिँश एव × × × सोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥ ६ ॥

Colophon :

तृतीयपञ्चिकायां पञ्चमोऽध्यायः ॥

40

Sl. No. 292 ताण्ड्यमहाब्राह्मणम् (पञ्चविंशब्राह्मणम्, महाब्राह्मणम्, ताण्ड्यमहाब्राह्मणम्, प्रौढब्राह्मणम्) Ms. P. 1959/3

Beginning :

महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचस्तन्मावतु तन्माविशतु ते भुक्षिपीय ॥ १ ॥

देवो देवमेतु सोमस्सोममेतु ऋतस्यपथा ॥ २ ॥

विहाय दौष्कृत्यम् ॥ ३ ॥

End :

पञ्चपञ्चाशतस्त्रिवृत स्संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः + + + हिरण्मयः शकुनो ब्रह्मनामेति ब्रह्मणः सलोकतां साष्टिंतां सायुज्यं गच्छन्ति । य एतदुपयन्ति तदेतद्विश्वसृजस्सहस्रसंवत्सरमेतेन वै विश्वसृजस्सर्वांमृद्धीमाध्नुवंत्सर्वांमृद्धीमृघ्नुवन्ति य एतदुपन्ति ॥ १८ ॥

Colophon :

इति पञ्चमपञ्चिकायां पञ्चमोऽध्यायः (ताण्ड्य) महाब्राह्मणं समाप्तम् ॥

41

Sl. No. 294 ताण्ड्यमहाब्राह्मणम् Ms. No. P. 5172/15

(पञ्चविंशब्राह्मणम् , महाब्राह्मणम्, ताण्ड्यमहाब्राह्मणम्, प्रौढब्राह्मणम्)

Beginning :

महन्मे वोचो भर्गो मे वोचो यशो मे वोचः भुक्तिं मे वोचः सर्वं मे वोचः तन्मावतु तन्माविशतु तेन भुक्षिपीय ॥ १ ॥

देवो देवमेति सोमः सोममेति ऋतस्य पथा ॥ २ ॥

विहाय दौष्कृत्यम् ॥ ३ ॥

End :

पञ्चपञ्चाशतस्त्रिवृत संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः + + + + सालोकतां सारिष्टितां सायुज्यं गच्छन्ति । य एत उपयन्ति । तदेतद्विश्वसृजां सहस्रसंवत्सरमेतेन वै विश्वसृजः सर्वां मृदीमाप्नुवन् सर्वांमृद्दीमाप्नुवन्ती या एतदुपयन्ति ॥ ९८ ॥

Colophon :

श्री प्रौढब्राह्मणे पञ्चमपञ्चिकायां पञ्चमोध्यायः ॥

42

Sl. No. 296 ताण्ड्यब्राह्मणभाष्यम् (वेदार्थप्रकाशः) Ms. C. 831

Beginning :

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

\+ \+ \+

व्याख्यातौ ऋग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणव्याख्यां करोम्यौद्गातृवृद्धये ॥

\+ \+ \+

प्रथमाध्यायगा मन्त्रा विनियोगपुरस्सरम् ।
व्याख्यायन्ते सर्वसोमयागेष्वेतेऽङ्गतां गताः ॥ ११ ॥

ननु प्रथमाध्याये समाम्नातानां महन्मे वोच इत्यादीनां मन्त्राणां क्रत्वङ्गत्वमयुक्तम्— क्रतुप्रकरणमध्ये पाठाभावात्; चतुर्थाध्यायप्रभृतीनि हि क्रतुप्रकरणानि भविष्यन्ति ॥

End :

द्वे सहस्रसमे पूर्वं तयोरुक्तं प्रजापतेः ।
ततो विश्वसृजामुक्तमुक्तान्यष्टादशा त्विति ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon :

॥ इति पञ्चविंशाध्यायेऽष्टादशः खण्डः ॥

इति श्रीमद्राजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यब्राह्मणे पञ्चविंशोऽध्यायः सम्पूर्णः ॥

43

Sl. No. 298 **तैत्तिरीयब्राह्मणम्** Ms. No. P. 574

(यजुर्ब्राह्मणम्, यजुश्शाखा, कृष्णयजुर्वेदब्राह्मणम्, तैत्तिरीयाष्टकम्, परायितब्राह्मणम्)

Beginning :

अङ्गिरसो वै सत्रमासत। तेषां पृश्निर्घर्मधुगासीत्। सर्जीषेणाजीवत्। तेऽब्रुवन्। कस्मै नु सत्रमास्महे। येऽस्या ओषधीर्जनयां इति। ते दिवो वृष्टिमसृजन्त।

यावन्तस्तोका अवापद्यन्त। तावतीरोषधयोऽजायन्त। ता जाताः पितरो विषेणा-लिम्पन्॥ १॥

End :

तेन वयं भगवन्तः स्याम। तन्त्वा भग सर्व इज्यो ह्वीमि + + + + रथमिवाश्वा वाजिन आवहन्तु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीस्सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनाः। यूयं पात स्वस्तिभिस्सदा नः॥ ७९॥

विचक्षणा विचर्तुर × × धि विसर्जनाय। ब्रह्मवनं ब्रह्म स वृक्ष आसीत्। × × रश्मिर्देवाः प्रविना एकञ्च॥ ८०॥

फलोनान्ते शुक्रास्सोमा × × धेनुरिन्द्रस्तरस्वान्‌च्छुचि × × ओधातु सूर्ये देवीमहमस्मि ता सूर्याचन्द्रमसा नव॥ ८१॥

पीवो × × न्ते त्वं × × × नायुष्यश्शुचि × × × विश्रयमाणो दिवो रुक्मोन्न प्राणमनन्ता सूर्याचन्द्रमसा न सप्तति पीवोन्मा यूयं पात स्वस्तिभिस्सदा नः॥

Colophon :

— — —

44

Sl. No 299 **तैत्तिरीयब्राह्मणम्** Ms. No. P. 1413/1

Beginning :

॥ हरिः ॐ॥ ब्रह्म संधत्तं तन्मे जिन्वतम्। क्षत्रँ संधत्तं तन्मे जिन्वतम्। इषँ संधत्तं तां मे जिन्वतम्। ऊर्जँ संधत्तं तां मे जिन्वतम्। रयिँ संधत्तं तां मे जिन्वतम्।

पुष्टिँ संभत्तं तां मे जिन्वतम् । प्रजाँ संवत्तं तां मे जिन्वतम् । पशून् सन्दत्तं तान्मे जिन्वतम् । स्तुतोऽसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥ १ ॥

End :

तस्यैवात्मा पदवित्तं विदित्वा । न कर्मणा लिप्यते पापकेन । + + + ब्रह्मणसायुज्यँ सलोकतां यन्ति । एतासामेव देवतानाँ समानलोकतां यन्ति । य एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः । ओम् + + + तुभ्यं + + + आसीत् षट्पञ्चाशत् ॥

एतदनुकृति ह स्म वै पुरा । अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति ॥

Colophon :

— — — — —

45

Sl. No. 301 तैत्तिरीयब्राह्मणम् Ms No. P. 1448/1

(यजुर्वेदब्राह्मणम्, यजुश्शाखा, कृष्णयजुर्वेदब्राह्मणम्, तैत्तिरीयाष्टकम्, परायितब्राह्मणम्)

Beginning :

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासञ्जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वाभुवनानि सर्वा । स कृत्तिकाभिरभिसंवसानः । अग्निर्नो देव सुविते दधातु । प्रजापते रोहिणीवेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ॥ २ ॥

End :

यद्दर्शपूर्णमासौ यजते । अश्वस्यैव मेध्यस्य पदे पदे जुहोति । एतदनुकृति ह स्म वै पुरा । + + + + + अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति । एतदनुकृति ह स्म वै पुरा । अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति ॥ २ ॥

Colophon :

— — —

46

Sl. No. 304 **तैत्तिरीयब्राह्मणम्** Ms. No. P. 1519/6

Beginning :

॥ हरिः ॐ ॥ संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । सङ्कल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं, क्लृप्तम् , श्रेयो वसीय आयत्सम्भूतं भूतम् । चित्रः केतुः प्रभानाभान्त्सम्भान् । ज्योतिष्माँस्तेजस्वानातपँस्तपन्नभितपन् । रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः । दर्शा दृष्टा दर्शना विश्वरूपा सुदर्शना । आप्यायमानाप्यायमानाप्याया सूनृतेरापूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी । दाता प्रदाता आनन्दो मोदः प्रमोदः ॥ १ ॥

End :

एतेन वै विश्वसृजः । इदं विश्वमसृजन्त । तस्माद्विश्वसृजः । + + + + +
ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः । ॐ ॥ ५६ ॥

Colophon :

— — — — —

47

Sl. No. 312 **तैत्तिरीयब्राह्मणम्** Ms. No. P. 5591/3

Beginning :

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । सङ्कल्पमानं प्रकल्पमानं उपकल्पमानं उपक्लृप्तं क्लृप्तम् । श्रेयो वसीय आयत्सम्भूतं भूतम् । चित्रः केतुः प्रभानाभान् सम्भान् । ज्योतिष्मागूँस्तेजस्वानातपगूँस्तपन्नभितपन् । रोचनो रोचमानः शोभनः शोभमानः कल्याणः । + + + + दाता प्रदाताऽनन्दो मोदः प्रमोदः ॥ १ ॥

End :

तस्यैवात्मा पदवित्तं विदित्वा । न कर्मणा लिप्यते पापकेन । + + एतासामेव देवतानागूं सायुज्यम् । सार्ष्टितागूं समानलोकतां यन्ति । य एतदुपयन्ति । ये चैनत्प्राहुः ।

× × × भ्यश्चैनत्प्राहु: ॥ ५६ ॥ शश्वद्दासत सिषासतमासत हविष्पति: कनीयात् तस्माद्विश्वसृजोष्टौ च । + + + तुभ्यं तपसा ता वा एता: पञ्च हिरण्यं ददाति सर्वा दिशस्तप आसीत् षट्पञ्चाशत् ॥

Colophon :

— — —

48

Sl. No. 311 **तैन्तिरीयब्राह्मणम्** **Ms. No. P. 5591/1**

Beginning :

ॐ ॥ ब्रह्म सन्धत्तं तान्मे जिन्वतम् । क्षत्रगँ सन्धत्तं तन्मे जिन्वतम् । इषँ सन्धत्तं तां मे जिन्वतम् । उर्जँ सन्धत्तं तां मे जिन्वतम् + + शुक्रपा: प्रणयन्तु ॥ १ ॥ सुवीरा: प्रजा: + + अपानँ सन्धत्तं तान्मे जिन्वतम् ॥ २ ॥

End :

पदर्शपूर्णमासौ यजते । अश्वस्यैव मेध्यस्य पदे पदे जुहोति । ++ + अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति ॥ ८४ ॥ + + + प्रजापतिरस्मिन् लोक उत्तरति श्रियमेव प्रजापतिरकामयत महान् यत्प्रात: प्र वा एष एभ्यो लोकेभ्यस्सर्वँ ह वै तत्र × × × चैनमेवं वेद चत्वार्यशीति: ॥ ८४ ॥ प्रजापतिरश्वमेवं जुहति ॥

Colophon :

— — —

49

Sl. No. 310 **तैत्तिरीयब्राह्मणम्** **Ms. No. P. 4274**

Beginning :

॥ हरि:ॐ ॥ ब्रह्म संन्धत्तं तन्मे जिन्वतम् । क्षत्त्रँ संधत्तं तन्मे जिन्वतम् । इषँ संधत्तं तां मे जिन्वतम् । ऊर्जँ सधत्तं तां मे जिन्वतम् । रयिँ संधत्तं तां मे जिन्वतम् ।

पुष्टिँ संधत्तं तां मे जिन्वतम् । प्रजाँ संधत्तं तां मे जिन्वतम् । पशून्त्संधत्तं तान्मे जिन्वतम् । स्तुतोऽसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥ १ ॥

End :

यत्रैतेन यज्ञेन यजन्ते । एष वै तेजस्वी नाम यज्ञः सर्वं ह वै तत्र तेजस्वी भवति । + + + + यत्रैतेन यज्ञेन यजन्ते । एष वै क्लृप्तो नाम यज्ञः । कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः । यत्रैतेन यज्ञेन यजन्ते ॥ ७२ ॥ × × × × × तार्प्येणाश्वं ॥

Colophon :

— — —

50

Sl. No 305 तैत्तिरीयब्राह्मणम् Ms. No. P. 1520

Beginning :

ॐ ब्रह्म सन्धत्तं तन्मे जिन्वतम् । क्षत्रँ सन्धत्तं तन्मे जिन्वतम् । इषँ सन्धत्तं तां मे जिन्वतम् । ऊर्जँ सन्धत्तं तां मे जिन्वतम् । रयिँ सन्धत्तं तां मे जिन्वतम् । पुष्टिँ सन्धत्तं तां मे जिन्वतम् । प्रजाग्ँ सन्धत्तं तां मे जिन्वतम् । पशून्त्सन्धत्तं तान्मे जिन्वतम् । स्तुतोसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥ १ ॥

End :

यदिदं किञ्च । य एवं वेद । कल्पतेऽस्मै । + + + दर्शपूर्णमासौ चतुर्होतुः । चातुर्मास्यानि पञ्चहोतुः । पशुबन्धः षड्ढोतुः । सौम्योऽध्वरः सप्तहोतुः । एतद्वै चतुर्होतॄणां निदानम् । य एवं वेद । निदानवान् भवति ॥ ७३ ॥

Colophou :

इति द्वितीयाष्टके द्वितीयः प्रपाठकः ॥

51

Sl. No. 359 | दैवतब्राह्मणम् | Ms. No. P. 53/3

Beginning :

॥ हरिः ॐ ॥ अग्निरिन्द्रः प्रजापतिः । सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी ॥ १ ॥

॥ २ ॥ इडानिधनानि पदनिधनानीकारणिधनानीत्याग्नेयानीति ॥

॥ ३ ॥ सर्वाणि निधनवन्त्यैन्द्राण्यन्यान्यादिष्टेभ्यः ॥

॥ ४ ॥ सर्वाणि स्वराणि प्राजापत्यानि ॥

End :

अथ सावित्र्या अङ्गानि व्याख्यास्यामः— शिरो ब्रह्म, ललाटं द्यौः, चन्द्रादित्यौ चक्षुषी, मुखमग्निः, जिह्वा सरस्वती, त्वष्टा ग्रीवा, वसवश्च रुद्राश्च बाहुरुरो, वायुः + + + सत्यं च पातु मामिति ॥ ४ ॥

अथ सावित्र्याङ्गानि व्याख्यास्यामः ॥ १ ॥

अथातो निर्वचनं गायत्री ॥ २ ॥ अथातस्सुंदरसावर्णिः ॥ ३ ॥ अग्निरिन्द्रः प्रजापतिः ॥

Colophon :

दैवताध्यायः समाप्तः ॥

52

Sl. No. 362 | दैवतब्राह्मणम् | Ms. No. P. 3647/5

Beginning :

अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाऽऽङ्गिरसः पूषा सरस्वतीन्द्राग्नी ॥ १ ॥

इडानिधनानि पदनिधनानीकारनिधनानीत्यग्नेयानीति ॥ २ ॥

सर्वाणि निधनवन्त्यैन्द्राण्यम्यान्यादिष्टेभ्यः ॥ ३ ॥

सर्वाणि स्वराणि प्राजापत्यानि ॥ ४ ॥

यथा वामदेव्यम् ॥ ५ ॥

End :

अथातः पित्र्याङ्गानि व्याख्यास्यामः— शिरो ब्रह्म, ललाटं, द्यौः, चन्द्रादित्यौ चक्षुर्षी, मुखमग्निः, जिह्वा सरस्वती, त्वष्टा ग्रीवा, वसवश्च रुद्राश्च बाहुरुरो, + + + + + + स्मितं विद्युच्छ्वसितं वायुरस्थीनि पर्वतास्समुद्राश्च वासांसि नक्षत्राण्यलङ्कारो, य एवं वेद, दुष्टुता दुरुपयुक्तानां न्यूनाधिकाश्च:(?) सर्वस्मात्स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातुमामिति ब्रह्म सत्यं च पातु मामिति ॥

Colophon :

दैवताध्यायः सम्पूर्णः ॥

53

Sl. No. 366 दैवतब्राह्मणम् Ms. No. P. 1118/8

Beginning :

॥ १ ॥ अग्निरिन्द्रः प्रजापतिः सोमो वरुणः त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी ॥

॥ २ ॥ इडा निधनानि पदनिधनानीकारणिधनानीत्याग्नेयानीति ॥

॥ ३ ॥ सर्वाणि निधनवन्त्यैन्द्राण्यन्यान्यादिष्टेभ्यः ॥

End :

॥ २३ ॥ सावित्री गेयम् ॥

॥ २४ ॥ यत्ता गीतम् ॥

॥ १५ ॥ तत्सवितुर्वरेणीयम् । भर्गो देवस्य धीमहि । २ । धियो यो नः प्रचो १८२१८२ हिं । आ २ दायो आ ३ ४ ५ ॥

Colophon :

॥ इति तृतीयः खण्डः ॥

समाप्तञ्च दैवतब्राह्मणं सभाष्यम् ॥

54

Sl. No. 367 दैवतब्राह्मणभाष्यम् Ms. No. B. 1118/9

Beginning :

तत्रादौ साम्नां निधनभेदेन देवताभिधानाय ता एवानुक्रमते ॥

एताः सामदेवता इति शेषः । तत्रादौ अग्निदैवत्यानि सामान्याह– निधनं नाम पञ्चभक्तिकस्य सप्तभक्तिकस्य साम्नोऽन्त्यो भागः । सर्वत्र सामतश्चतुर्वि × × × : स्वरो निधनमिडा वागिति ॥

End :

किं तदिति स्वरूपं दर्शयति । सावित्र्याख्यार्कस्वरूपस्तु उत्तरार्चिकस्य पष्ठप्रपाठकीय-तृतीयार्धे श्रुतस्य दशमसूक्तस्य प्रथमपाठतो ज्ञेयः । आख्यानश्चापि तत्रैवेति ॥

Colophon :

॥ इति तृतीयः खण्डः ॥

समाप्तं च दैवतब्राह्मणं सभाष्यम् ॥

55

Sl. No. 374 मन्त्रब्राह्मणभाष्यम् (वेदार्थप्रकाशः) Ms.No. P. 1976/2

Beginning :

वागीशाद्याः + + + गजाननम् ॥
यस्य निश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

व्याख्यातौ ऋग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं सम्प्रवर्तते ॥

अष्टौ हि ब्राह्मणग्रन्थाः + + + + अस्याथर्वणिकानामुपनिषदामारम्भे मन्त्रसमाम्नायः सर्वं प्रविश्य--

End :

मुञ्च गामित्या × × × × प्रतिगृहीतामनुमन्त्रयते सूचितञ्च । गां वेदितामनुमन्त्रयेत मुञ्च गामिति + + + + अहितं अदितिवद्देवादिसर्वमातृभूता या बलिष्ठा हे ! देवाः ! हिंसां मा कुरुत । ओमित्यङ्गीकारे ; अहन्तव्येत्यङ्गीकृता उत्सृजतु ॥

Colophon :

× × × राजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्य-धुरन्ध × × × विरचिते माधवीये वेदार्थप्रकाशे छान्दोग्यमन्त्रब्राह्मणे मन्त्रपर्वणि द्वितीयप्रश्नः समाप्तः ॥

56

Sl. No. 378 वंशब्राह्मणम् Ms. No. P. 1970/7

Beginning :

ओं नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नमो आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो (नमो वेदेभ्यो) नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय नमो चोपजायत च गिगिशशर्व-दत्ताद्गार्ग्याच्छर्वदत्तो गार्ग्यो रुद्रभूतेर्द्राह्यायणो रुद्रभूतिर्द्राह्यायणस्त्रातादैषुमतात्त्रात एषु + + + शाण्डिलायनात सुतेमनाः शाण्डिल्यायनो ँशोर्द्धानञ्जय्यादँशुर्द्धानञ्जयः ॥ २ ॥

End :

पितॄणां पितामहानां प्रपितामहानां मातॄणां मातामहानां प्रमातामहानामाचार्याणां प्राचार्याणां प्रमाचार्याणां संहिताकारपदकारक्रमकारसूत्रकारब्राह्मणकाराणामेकमेकपत्नीनामनपत्यानां

सोमदेवो ब्राह्मणः सोमदत्तो माण्डव्यो वाचोदकमञ्जलिं पूरयित्वा दर्षशतं स्वर्गे लोके महीयते न च पुनरावर्तते न च पुनरावर्तते ॥ ७ ॥

Colophon :

वंशब्राह्मणं समाप्तम् ॥

57

Sl. No. 384 **शतपथब्राह्मणम्** (काण्वशाखीयम्) Ms. No. P. 149

Beginning :

हरिः स वै व्रतमुपेष्यन्नन्तराहवनीयं च गार्हपत्यं च तिष्ठन् प्राङ् तिष्ठन्नप उपस्पृशति । स यदप उपस्पृशत्यमेध्यो वै पुरुषस्तेन ह पुरुषोऽमेध्यो यदनृतं वदति तेनेदमन्तरतः + + + पवित्रपूतो व्रतमुपायानिति ॥ २ ॥

End :

अथैतयोदवसानीययाग्नेस्येष्ट्या यजते । तत्पञ्चकपालं पुरोळाशं निर्वपति + + + अथ यावद्रात्र एव कियद्रात्रेयोदसम्येत्तर्ह्येवाग्निहोत्रं जुहुयात् स सर्वस्थे होमकाल एव प्रातर्होमः ॥

Colophon :

चतुर्थं ब्राह्मणं । इति ग्रहकाण्डे पञ्चमोऽध्यायः ॥

58

Sl. No. 387 **शतपथब्राह्मणम्** (काण्वशाखीयम्) Ms. No. C. 98/1

Beginning :

हरिः ॐ ॥ स वै व्रतमुपैष्यन्नन्तराहवनीयं च गार्हपत्यं च तिष्ठन् प्राङ् तिष्ठन्नप उपस्पृशति स यदप उपस्पृशत्यमेध्यो वै पुरुषस्तेन ह पुरुषोऽमेध्यो यदनृतं वदति तेनेदमन्तरतः शुक्तः पूतिर्वाति मेध उ वा आपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रमापः पवित्रपूतो व्रतमुपयानीति ॥ १ ॥

End :

अथ प्राङ्मुखादायंन्युत्रस्य नाम गृह्णाति । + + + + + तथा ह्यस्य प्राक्कर्मानुसंतिष्ठतेऽथ व्रतं विसृजत इदमहं य एवास्मि स एवास्मीति तस्योक्तो बन्धुः ॥ १३ ॥ स वै व्रतमुपैष्यं + + + + षट्सप्ततिः ॥ ७६ ॥

Colophon :

इति चतुर्थं ब्राह्मणम् । इति हव्यनकाण्डेऽष्टमोऽध्यायः समाप्तः ॥

59

Sl. No. 394 शतपथब्राह्मणम् (काण्वशाखीयम्) Ms. No. C. 98/8

Beginning :

हरिः ॐ ॥ अथातो नैर्ऋतीर्हरन्त्येतद्वै देवा गार्हपत्यं चित्वा समारोहन्वयं वै लोको गार्हपत्य इहमेव तं लोकँ सँस्कृत्य समारोहँस्ते तम एवानतिदृश्यमपश्यम् ॥ २ ॥

End :

ता एता अङ्गुलयस्तास्सर्वत उपदधाति सर्वतो हीमा + + + + पञ्चपञ्चोप-दधाति पञ्च पञ्च हीमा अङ्गुलयो नानो पदधाति नानाहीमा अङ्गुलयस्सकृत्सकृत्सादयति समानं तत्करोति तस्मात्समानसंबंधनाः ॥ २२ ॥ पशुशीर्षाण्युप .... अष्टपञ्चाशत् ॥ ५८ ॥

Colophon :

इति हस्तिघटकाण्डे पञ्चमोऽध्यायः । हस्तिघटकाण्डस्सम्पूर्णः ॥

60

Sl. No. 352 शतपथब्राह्मणम् (काण्वशाखीयम्) Ms. No. C. 99/1

Beginning :

हरिः ॐम् ॥ प्राणभृत उपदधाति प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः प्रथमायाञ्चिता उपदधाति पूर्वार्धे एषोऽग्नेर्यत्प्रथमा चितिः पुरस्तात्तत्प्राणां दधाति तस्मादिमे पुरस्तात्प्राणाः ॥ १ ॥

End :

तदाहुर्थल्लोकं पृणान्ता अन्याश्चितयो भवन्ति + + + तद्वा इदमेकमिवैवान्तरिक्षं ता एवं तिस्र एवं पञ्चैवग् षळेवग् सप्त ॥ ७ ॥

Colophon :

चतुर्थं ब्राह्मणम् ॥ चितिकाण्डे पञ्चमोध्यायः ;शितिकाण्डस्समाप्तः ॥

61

Sl. No. 401 शतपथब्राह्मणम् (काण्वशाखीयम्) Ms. No. C. 99/7

Beginning :

हरि ॐ ॥ देवा ह वै सत्रं निषेदुरग्निरिन्द्रः सोमो मखोविष्णुर्विश्वेदेवा अन्यत्रैवाश्विभ्यां तेषां कुरुक्षेत्रं देवयजनमास तस्मादाहुः + + + + तदेवमन्यत इदं देवयजनमिति तद्धि देवानां देवयजनम् ॥ २ ॥

End :

सोमो वै प्रवर्ग्यः सर्वं वै सोमः सर्वं प्रवर्ग्यः + + + तज्योतिः प्रविशति य एतमनुवा ब्रूते भक्षयति य तस्य व्रतचर्या सृष्टा ॥ २६ ॥ सत्रं × × × षड्विंशतिः ॥२६॥ चतुर्षु ब्राह्मणेषु द्वादशोत्तरं शतम् ॥ ९०९२ ॥

Colophon :

चतुर्थं ब्राह्मणम् । प्रवर्ग्यकाण्डे द्वितीयोऽध्यायः । प्रवर्ग्यकण्डः सम्पूर्णः ॥

62

Sl. No. 403 षड्विंशब्राह्मणम् Ms. No. P. 1670/2

Beginning :

ब्रह्म ह वा इदमग्रे सुब्रह्म × × × ततस्सु ब्रह्मा वा यद्यह देवा यज्ञेन ब्रह्म पर्यगृह्णनाग्निर्वै ब्रह्मा सपर्यादित्यः सुब्रह्मा तद्देवा यज्ञस्य सर्वावनैच्छन् एतद्वै यज्ञस्य सन्धिर्यत्रैष उत्करस्तस्मादुत्करे तिष्ठन् । सुब्रह्मण्यः + + + ब्राह्मणान् प्रीणाति ॥ १ ॥

End :

स सर्वान् दिशमन्वावर्ततेथ यदास्या मानुषाणामतिधृतिमतिदुःखं वा पर्वताः स्फुटन्ति + + + सर्वाणि सूर्यदैवत्यान्युद्भूतानि प्रायश्चित्तानि भवन्ति उदुत्यं जातवेदसमिति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिर्भिजुहोति सूर्याय स्वाहा × × × × व्याहृती-भिर्हुत्वाऽथ साम गायेत् ॥ १७ ॥

Colophon-

— — —

63

Sl. No. 412 षड्विंशब्राह्मणभाष्यम् (वेदार्थप्रकाशः) Ms. No. C. 3812

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

+ + + +

व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणं चाद्यं प्रौढं व्याख्यातमादरात् ॥
अथ द्वितीयं षड्विंशं ब्राह्मणं व्याचिकीर्षति ॥

अस्मिन् ताण्डिशेषब्राह्मणे पूर्वाण्युक्तानि कर्माणि उक्तानामपि ये भेदास्ते च पठ्यन्ते । तत्र प्रथमं सुब्रह्मण्योच्यते ॥

End :

अथो एवं सामहोमानन्तरं अद्भुतादिसूचितो दोषः शाम्यत्येव । एष यत्प्रोक्तषष्ठाध्याय-प्रतिपादित एषः होमशान्त्यर्थः । ऐन्द्राद्यद्भुतसूचितदुरितापूर्वशान्त्यर्थः । द्विरुक्तिरादरार्था ; अध्यायसमाप्तिद्योतनार्था वा ॥

Colophon :

इति षड्विंशेऽद्भुतब्राह्मणे षष्ठाध्यायस्य दशमः खण्डः । इति श्रीमद्राजाधिराजपरमेश्वर-वैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थ प्रकाशे षड्विंशब्राह्मणव्याख्याने षष्ठोऽध्यायः ॥

64

Sl. No. 413 संहितोपनिषद्ब्राह्मणम् Ms. No. P. 2497/6

Begi ning :

ॐ ॥ अथातः संहितोपनिषदो व्याख्यास्यामः सर्वपरोक्षा देवसंहिता भवति । सर्वप्रत्यक्षाऽसुरसंहिता भवति । + + + + + पशुमान् भवति । यस्तथाऽधीते ब्रह्मबर्चस्या ऋषिसंहिता भवति । ब्रह्मवर्चसी भवति यस्तथाधीते तैताः तिस्रः संहिता भवति ॥

End :

अथ हिरण्यमेवापः कनको भवति । सहस्रं लभते । अथैषा यजनीयेऽहनि सप्तछन्दाश्चैषाग्निरुपसमाहितो भवति । + + + + + स खलु त एतं प्रजापतिर्वा इदमेकमन्नमक्षितायुः पुरुषो वायमीश्वरोऽभिजायतेऽनाकार्शीकरणश्च चतुर ऋचो भवति । य एवं वेद ; य एवं वेद ॥

Colophon :

इति संहितोपनिषत्समाप्ता ॥

65

Sl. No. 416 सामविधानब्राह्मणम् (सौवर्णब्राह्मणम्) Ms. No. P. 53/5

Beginning :

ब्रह्म ह वा इदमग्र आसीत् । तस्य तेजो रसोत्यरिच्यत । स ब्रह्मा समभवत् । तूर्ष्णीं मनसा ध्यायत् । तस्य यन्मन आसीत्— स प्रजापतिरभवत् । तस्मात्प्राजापत्यां मनसा जुह्वति ; मनो हि प्रजापतिः ॥

End -

सोयं प्राजापत्यो विधिस्तमिमं प्रजापतिर्बृहस्पतये प्रोवाच ; बृहस्पतिर्नारदाय नारदो विष्वक्सेनाय + + + + सोयमनूचानाय ब्रह्मचारिणे समावर्तमानायाख्येयः । योपाध्यायाय ग्रामबरं सहस्रं श्वेतश्चाश्वं प्रदायानुज्ञातो बाथं कामं कामयते तमाप्नोति तमाप्नोति ॥

Colophon :

इति सामविधानब्राह्मणं समाप्तम् ॥

66

Sl. No. 417 सामविधानब्राह्मणम् (सौवर्णब्राह्मणम्) Ms. No. P. 1670/3

Beginning :

ब्रह्म ह वा इदमग्र आसीत् । तस्य तेजोरसोऽत्यरिच्यत । स ब्रह्मा समभवत् । स तूष्णीं मनसाध्यायत् । तस्य यन्मन आसीत् स प्रजापतिरभवत् । तस्मात् प्रजापत्यां मनसा जुह्वति मनो हि प्रजापतिः ॥

End :

उपहरेदिन्द्रायेति पुरस्ताद्वायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इत्यवान्तरदेशे वरुणायेति पश्चान्महाराजायेति अवान्तरदेशे सोमायेत्युत्तरतो महेन्द्रायेत्यवान्तरदेशे वासुकाय इत्यधस्तात् नमो ब्रह्मण इति दिवि × × × बहुपशुधन–

Colophon :

— — —

67

Sl. No. 424 सामविधानब्राह्मणभाष्यम् (वेदार्थप्रकाशः) Ms. No. P. 4968/1

Beginning :

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

\+ + + + +

आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशग्रन्था अष्टावितीरिताः ॥

तत्र महाब्राह्मणषड्विंशाख्ययोर्ग्रन्थयोर्यज्ञाधिकारिणां स्वर्गादिफलप्राप्तये एकाहाहीन-सत्रात्मका महाक्रतवः प्रतिपादिताः। अथ सामविधानाख्ये तृतीये ब्राह्मणग्रन्थे तेष्वनधिकृतानां + + + अजपृश्निवैखानसादीनां + + स्वर्गादिप्राप्तये बहुविधान्यग्न्याधानाग्निहोत्रादि-प्रत्याम्नायरूपाणि सामानि विधास्यन्ते + + + + तत्रादौ + + प्रपञ्चसृष्टिप्रति-पादनाय तत्प्रागवस्थामाह— ब्रह्मेति ॥

End :

उपाध्यायाय— सामविधानोपदेष्ट्रे, ग्रामवरं— श्रेष्ठं ग्रामं, + + प्रदाय इदं— शिष्येण प्रयोक्तव्यम् + + + अथैतानि दातुं न शक्नुयात् स शुश्रूषया अल्पधनप्रदानेन चोपाध्यायं तोषयित्वा तेनानुज्ञातस्सन् उक्तविधानेन सामानि प्रयुञ्जानो यं यं कामं कामयितव्यं फलं कामयते तमवाप्नोति। अभ्यासस्समाप्त्यर्थः ॥ ६ ॥

Colophon :

तृतीयाध्याये नवमः खण्डः ॥

श्रीमद्राजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायण चार्येण विरचिते माधवीये वेदार्थप्रकाशके सामविधानाख्ये ब्राह्मणे तृतीयोऽध्यायः ॥

68

Sl. No. 425 सामविधानब्राह्मणभाष्यम् (वेदार्थप्रकाशः) Ms. No. P. 5175

Beginning :

× × × × त्पत्यसम्भवात् तस्मात मायोपाधिकमेव चैतन्यं विवक्ष्यते। अतोऽयमर्थः। इदं नामरूपघटितं जगत्पूर्वं तापायःपिण्डवत् माया × × × × × रणरूपे ब्रह्मणि अव्याकृतनामरूपं सदा स्थितमित्यर्थः।

अथ ब्रह्मणः सकाशात् हिरण्यगर्भोत्पत्तिमाह— ॥ तस्येति ॥ तस्य— उपलक्षणस्य, सिसृक्षोर्ब्रह्मणोऽत्र रसः— सारभूतं तेजोमयाधिष्ठानभूतं + + + + स्वयमेवाति-रिक्तोऽभवत् ॥

End :

उपाध्यायाय– सामविधानोपदेष्ट्रे, ग्रामवरं– श्रेष्ठं ग्रामं, + + प्रदाय इदं– शिष्येण प्रयोक्तव्यम् । + + + + + उपाध्यायं तोषयित्वा तेनानुज्ञातः सन् उक्तविधानेन सामानि प्रयुञ्जानो यं यं कामं कामयितव्यं फलं कामयते तमवाप्नोति । अभ्यासः समाप्त्यर्थः ॥

Colophon :

॥ तृतीयाध्याये नवमः खण्डः ॥

श्रीमद्राजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे सामविधानाख्ये ब्राह्मणे तृतीयोऽध्यायः ॥

वेदाः— आरण्यकम्

69

Sl. No. 432 | ऐतरेयारण्यकम् | Ms. No. C. 849

Beginning :

हरिः ॐ ॥ भूमिमुपस्पृशेदग्न इळा नम इळा नम ऋषिभ्यो मन्त्रकृद्भ्यो + + + संदृशि । भद्रं कर्णेभिः । + + शं न इन्द्राग्नी । + + स्तुषे जनं । + + कया नश्चित्र आभुवदूती । + + स्योना पृथिवि । ओष्ठापिधाना नकुली । + + + + +

अथ महाव्रतम्—

इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन्महाव्रतमभवत् महाव्रतस्य महाव्रतत्वम् ॥

End :

अथातः स्वाध्यायधर्मं व्याख्यास्यामः— उपपुराणे नाधीते + + + नास्य रात्रौ च न च कीर्तयिषेत् । तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद ब्रह्म भवति ब्रह्म भवति ॥

अग्निर्देवेद्धः । महाव्रतस्य पट् । + + + + श्रेष्ठो दीक्षेमा मा हिंसीः । तच्चक्षुर्देवहितं ॥ २ ॥ त्वमग्ने व्रतभाः ॥ + + + + तच्छंयोरावृणीमहे । नमो ब्रह्मणे । + + शान्तिः ॥

Colophon :

इत्यैतरेयारण्यकेऽष्टादशोऽध्यायः ॥

पञ्चमारण्यकं समाप्तम् ॥

70

Sl. No. 435 **ऐतरेयारण्यकभाष्यम् (वेदार्थप्रकाशः)** Ms. No. B. 7/2

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥

\+ \+ \+

कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
ऐतरेयब्राह्मणेऽस्ति काण्डमारण्यकाभिधम् ।
अरण्य एव पठ्यं स्यादारण्यकमितीरितम् ॥ ५ ॥

\+ \+ \+

तत्रादौ विवक्षितमर्थं प्रतिजानीते– ॐ अथ महाव्रतम् इति ॥ अथशब्द आरम्भवाची । महाव्रताख्यं कर्म प्रारब्धमित्यर्थः ॥

End :

तार्क्ष्यो गरुडः स एव देवो यस्य ………… ष्ठित्यादिसूक्तस्य तत्सूक्तं तार्क्ष्यं शंसेत् । तस्मिन् सूक्ते प्रतिपाद्यो यस्तार्क्ष्यः सोऽयं स्वस्त्ययनं वै हेमप्राप्तिमेव सम्पादयतीति शेषः । अतस्तत्सूक्तं स्वस्तितायै ………… ………… प्राप्त्यै सम्पद्यते …………तस्मादयं होता तत्रानेन शंसनेन स्वस्त्ययनं क्षेमप्राप्तिं मे कुरुते ॥

तत ऊर्ध्वं इन्द्रो विश्वं विराजितो तस्या एका ऋचः शंसनं विधत्ते– एकपदा ॥

71

Sl. No. 438 **तैत्तिरीयब्राह्मणम्** Ms. No. P. 1055

Beginning :

भद्रं कर्णेभिः शृणयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

आपमापामपस्सर्वाः । असादसादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सह सञ्चस्करर्द्धिया ।

End :

देवा वै सत्रगँ खदिरः परिश्रितेऽभिपूर्वमथो रक्षसां ग्रैष्मावेव ब्रह्म वै देवानामाश्विना घर्मं पांत प्राणो वै पूषा हरिष्यनैनसाय्यगूंसं यथा नाममष्टोत्तरशतम् । देवा वै सत्रमेव तपति ॥

Colophon :

— — —

72

Sl. No. 470 तैत्तिरीयारण्यकभाष्यम् (ज्ञानयज्ञः) Ms. No. A. 12

Beginning :

ईशानस्सर्वविद्यानां भूतानामीश्वरो हरः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्ममयश्शिवः ॥

एवं व्याख्याता इष्टिपशुसोमाग्नीनां तद्विकृतीनां च मन्त्राः, ब्राह्मणभागाश्च । इदानीं तेषामेव तच्छेषभूतमरण्येऽनुवाक्यं तन्त्रं व्याख्यास्यामः । अत्राहुः—

होतॄन् प्रवर्ग्यकाण्डे च याश्चोपनिषदो विदुः ।
अरुणाम्नायविधी चैव(?) काठके परिकीर्तिताः ॥

\+ \+ \+

अत्र सन्त्यष्टौ काठके काण्डानि कठमुनिना दृष्टानि + + + + स्वाध्याय-ब्राह्मणमष्टममिति ॥

End :

द्वौ एतौ एव सूर्याचन्द्रमसोः महिमानौ ब्राह्मणः आत्मवित् प्रथममेतौ महिमानावभिजित्य तस्मात् एव कारणात् ब्रह्मणः परमात्मनो महिमानमाप्नोति । ततः तस्मादेव कारणात् परस्य ब्रह्मणो महिमानमाप्नोति । एवं समाप्तिऽसूचानार्था वाक्यवृत्तिः । ब्राह्मणग्रहणं प्रदर्शनार्थम्—सर्वोऽपि तद्विद्वानभिजयति । इत्युपनिषदिति व्याख्यातमेव ॥

Colophon :

त्रिषष्टितमोऽनुवाकः (इति १३३ तमे अन्तिमे पत्रे) इति भट्टभास्करविरचिते ज्ञानयज्ञाख्ये उानिषत्प्रश्ने पञ्चदशोऽनुवाकः । (इति १०८ तमे पत्रे)

73

Sl. No 471 तैत्तिरीयारण्यकभाष्यम् (वेदार्थप्रकाशः) Ms. No. A. 277

Beginning :

ईशानस्सर्वविद्यानां भूतानामीश्वरः परः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्ममयश्शिवः ॥

एवं व्याख्याता इष्टिपशुसोमाग्नीनां तद्विकृतीनां मन्त्राः ब्राह्मणभागश्च । इदानीं तच्छेष भूतमारण्येऽनुवाक्यं तन्त्रं व्याख्यास्यामः ।

होतॄन् प्रवर्ग्यकाण्डे च याश्चोपनिषदो + + ।
एतदारण्यकं सर्वं नाव्रती श्रोतुमिच्छति ॥

अत्र सन्त्यष्टौ काण्डानि + + + + इति । एतेषामारुणकेतुकोऽस्मिन् प्रश्नो विधीयते ।

End :

॥ उपयामगृहीतः ॥ सोमस्त्वमसि त्वमेवाहमिति + + + आत्मानं युञ्जीत समादधीत + + + एवं वेदिता ब्राह्मणः परमात्मनः महिमानं महत्वं प्राप्नोति + +

केचित्तु विद्यासमाप्तिसूचनार्थां आवृत्तिरित्याहुः । + + + + इत्युपनिषदिति व्याख्यातमेव ॥

Colophon :

त्रिषष्टितमोऽनुवाकः । समाप्ता याज्ञिकोपनिषत् । दशमप्रश्नस्समाप्तः । (१४६ तमेपत्रे)

74

Sl. No. 472 तैत्तिरीयारण्यकभाष्यं (वेदार्थप्रकाशः) Ms. No. P. 1040

Beginning :

यस्य निश्श्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ + + +
अरण्याध्ययनादेतत् आरण्यकमितीर्यते ।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते ॥

हे देवा इन्द्रादयो भद्रं कल्याणं श्रुतिस्मृतिवाक्यरूपं कर्णेभिराचार्यान्तेवासिरूपाणामृत्विग्य-जमानरूपाणां + + कर्णैः + + + श्रोतुं समर्थाः स्याम ॥

End :

अपि च न तैत्तिरीयाणामुपासनमिदम् किं तर्हि, ब्रह्मविद्याप्रशंसा ; तस्यैवं विदुष इति ब्रह्मविद उत्कर्षणात् । तस्मात् न विद्यैक्यशङ्काया अप्यवकाशोऽस्ति । क्रममुक्तिरेव × × × × अभिहितेत्यशेषमतिमङ्गलम् ॥

Colophon :

— — —

75

Sl. No. 473 तैत्तिरीयारण्यकभाष्यम् (वेदार्थप्रकाशः) **Ms. No. P. 1261**

Beginning :

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रवर्ग्यब्राह्मणं प्रोक्तं पञ्चमे हि प्रपाठके ।
पितृमेधस्य मन्त्रास्तु कथ्यन्तेऽस्मिन् प्रपाठके ॥

तेषां च पितृमेधमन्त्राणां विनियोगो भरद्वाजकल्पे बोधायनकल्पे चाभिहितः । तत्र + + + + भरद्वाज आह— ॥

End :

अथ द्वितीयामाह— । इयं राजगवी यत्र क्वापि स्वेच्छया उदकं पिबतु तृणान्यत्तु—तृणानि भक्षयतु । उत्सृजत— बद्धामेनां परित्यजत ॥

Colophon :

इति श्रीमाधवीये वेदार्थप्रकाशे यजुरारण्यके षष्ठप्रपाठके द्वादशोनुवाकः ॥

Extra Information :

वेदार्थस्य प्रकाशेन × × × × महेश्वरः ।
यस्य निःश्वसितं वेदाः × × × × विद्यातीर्थमहेश्वरम् ॥

इति ग्रन्थान्ते दृश्यते ॥

76

Sl. No. 474 तैत्तिरीयारण्यकभाष्यम् (वेदार्थप्रकाशः) Ms. No. P. 1819

Beginning :

तृतीये × × × × मन्त्राः ब्राह्मणा ब्रह्ममेधयोः ।
प्रवर्ग्यमन्त्राः प्रोच्यन्ते चतुर्थेऽस्मिन् प्रपाठके ॥ + +

+ + + + मन्दतीरुपस्पृश्य प्रथमेनानुवाकेन शान्तिं कृत्वेति तस्यानुवाकस्य प्रथमभागे स्वाभीष्टा देवानामृषीणां च नमस्कारानाह– नमो वाचे याचोदिता याचा + + + + बतीन्पराद्यामिति ॥

End -

मध्वेति प्रयोगाद्यजमानस्य तेजोव्याप्तं दर्शयति— देवस्त्वा सविता मध्वानक्त्वित्याह– तेजसैवैनमनक्ति । पृथिवीं तपसा त्रायस्वेत्याह परस्मिन् परे वा चितं रुक्मं निधायेति । हे रुक्म पृ × × × × × × × × ×

Colophon :

— — — —

वेदाः— उपनिषत्

77

Sl. No. 477 **अक्षमालोपनिषत्** Ms. No. P. 3581/17

Beginning :

॥ भद्रं कर्णेभिरिति शान्तिः ॥

॥ हरि ॐ ॥ अथ प्रजापतिर्गुहं पप्रच्छ— भो ब्रह्मन् अक्षमालाभेदविधिं ब्रूहि— किं लक्षणा सा ? कति भेदाः अस्याः ? कानि सूत्राणि ? कथं घटनाप्रकारः ? के वर्णाः ? का प्रतिष्ठा ? + + + + इति ।

आदिक्षान्तमूर्तिः सावधानभावा । सौवर्णं राजतं ताम्रं चेति सूत्रत्रयम् ॥

End :

तत्सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति । य एवमक्षमालिकया जप्तो मन्त्रः सिद्धिकरो भवति सद्यस्सिद्धिकरो भवति ; इत्याह— भगवान् गुहः प्रजापतिः ॥ ओम् शान्तिः ॥

Colophon :

अक्षमालोपनिषत्समाप्ता ॥

78

Sl. No. 478 **अक्षमालिकोपनिषत्** Ms. No. P. 4136/11

Beginning :

वाङ्मे मनसीति शान्तिः ।

अथ प्रजापतिर्गुहं पप्रच्छ— भो ! ब्रह्मन् ! अक्षमालाभेदविधिं ब्रूहीति । सा किं लक्षणा ? कति भेदाः ? अस्याः कानि सूत्राणि ? कथं घटनाप्रकारः + + + इति ॥

आदिक्षान्तमूर्तिः सावधानभावा । सौवर्णं राजतं ताम्रं चेति सूत्रत्रयम् । तद्विवरे सौवर्णं + + + + क्रमेण योजयेत् ॥

End :

नमस्ते परारूपे + + + मुनिजनोपर्जीव्यमाने नमस्ते नमस्ते । प्रातरधीयानो रात्रिकृतं पापं नाशयति + + + तत्सायंप्रातः प्रयुञ्जानः पापोऽपापो भवति । एवमक्षमालिकया जप्तो मन्त्रस्सद्यस्सिद्धिकरो भवतीत्याह भगवान् गुहः । प्रजापतिमित्युपनिषत् । वाङ्मे मनसीति शान्तिः ॥

Colophon :

अक्षमालिकोपनिषत्समाप्ता ॥

79

Sl. No. 483 अक्षमालिकोपनिषद्भाष्यम् Ms. No. B. 247

Beginning :

यस्या अपि परब्रह्मपरत्वं प्रोच्यते स्फुटम् ।
तामक्षमालिका × × व्याख्यास्ये निखिलाक्षराम् ॥

नन्विह यदस्यान्तरं तद्ब्रह्म यदक्ष × × × पार्श्वे तच्छैवम् । यद्वामपार्श्वे तद्वैष्णवम् ॥

End :

× × × × ×

न तु तासां बह्वीनां धार्यत्वम् । लोके तु बह्वीर्माला: केचन धरन्ति । तदुपनिषत्प्रमाणानाम्ब (?) नमवगन्तव्यम् ॥

Colophon :

इत्यक्षमालिकोपनिषद्भाष्यं समाप्तम् ॥

80

Sl. No. 484 **अक्षमालिकोपनिषद्भाष्यम्** Ms. No. B. 408/2

Beginning :

यस्या अपि परब्रह्म परत्वं प्रोच्यते स्फुटम् ।
तामक्षमालिकामेनां व्याख्यास्ये निखिलाक्षराम् ॥

नन्विह यदस्यान्तरं तद्ब्रह्म यद्दक्षपार्श्वे तच्छैवं यद्वामपार्श्वे तद्वैष्णवमित्युक्तौ कार्यब्रह्मा मोक्षः । तदनुक्तौ कारणं किमिति ॥

End :

न तु तासां बह्वीनां धार्यत्वम् । लोके तु बह्वीर्माला: केचन धरन्ति (!) तदुपनिषत् प्रमाणानाम्ब (?) नमवगन्तव्यम् ॥

Colophon :

इति अप्पयदीक्षिताचार्यकृतिषु अक्षमालिकोपनिषद्भाष्यं समाप्तम् ॥

81

Sl. No. 486 **अक्षिकोपनिषत्** Ms. No. B. 247

Beginning :

॥ सह नाववत्विति शान्तिः ॥ अथाह साङ्कृतिर्भगवानादित्यलोकं जगाम । तमादित्यं नत्वा चाक्षुष्मतीविद्यया तमस्तुवत् । ॐ नमो भगवते सूर्यायाक्षितेजसे नमः । खेचराय नमः ।

\+ \+ \+

विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरूपं तपन्तम् ।
सहस्ररश्मिः शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः ॥

End :

अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
प्रज्ञानघनमानन्दं ब्रह्मास्मीति विभावयेत् । इत्युपनिषत् ॥

Colophon :

अक्षिकोपनिषत् समाप्ता ॥

82

Sl. No. 489 **अक्षिकोपनिषत् (अक्ष्युपनिषत्)** Ms. No. c. 3682/43

Beginning:

अथ ह साङ्कृतिर्भगवानादित्यलोकं जगाम। तत्रादित्यं नत्वा चक्षुष्मतीविद्यया तमस्तुवत्। ॐ नमो भगवते सूर्यायाक्षितेजसे नमः। ॐ खेचराय नमः। खेचराय नमः। + + + +

विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरूपं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः॥

End:

आदिमध्यावसानेषु दुःखं सर्वमिदं यतः।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवानघ॥
अविद्यातिमिरातीतं सर्वाभासविवर्जितम्।
आनन्दममलं शुद्धं मनोवाचामगोचरम्॥
प्रज्ञानघनमानन्दं ब्रह्मास्मीति दिभावयेत्॥

इत्युपनिषत्॥

Colophon-

इत्यक्ष्युपनिषत्समाप्ता॥

83

Sl. No. 490 **अक्षिकोपनिषत्भाष्यम्** Ms. No. B. 247

Beginning:

यस्यां चाक्षुष्मती विद्या ब्रह्मविद्या च कथ्यते।
तामक्षिकोपनिषदं व्याख्यास्ये सप्तभूमिकाम्॥

ननु प्रपञ्चवेदने सत्यपि मिथ्यात्वनिश्चय एव योगस्स्यादित्याशङ्क्याह— अवेदनमिति॥

End:

अकाराद्यष्टाविंशत्युत्तरशततत्पदलक्ष्यार्थजीवानां विलापनं कार्यमिति प्रागेव समाधिकालाद्विचिन्त्यम्॥

Colophon:

इत्यक्षिकोपनिषद्भाष्यं समाप्तम्॥

84

Sl. No. 491 **अक्षिकोपनिषद्भाष्यम्** Ms.No. B. 409

Beginning :

यस्यां चाक्षुष्मती विद्या ब्रह्मविद्या च कथ्यते ।
तामक्षिकोपनिषदं व्याख्यास्ये सप्तभूमिकाम् ॥

ननु प्रपञ्चवेदने सत्यपि मिथ्यात्वनिश्चय एव योगस्स्यादित्याशङ्क्याह— ॥ अवेदनमिति ॥

End :

नारदपरिव्राजकोक्तरीत्याऽष्टाविंशत्युत्तरशतमात्राभेदेन अनुभूतिमीमांसादिष्वस्मद्विरचित-प्रबन्धेषु प्रपञ्चितार्थानुरोधेन स्थूलसूक्ष्मकारणतुर्यविभागात् सर्वं परिपश्येत् । अकाराद्यष्टाविंश-त्युत्तरशततत्तदलक्ष्यार्थजीवानां विलापनं कार्यमिति प्रागेव समाधिकालाद्विचिन्त्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतिषु अक्षिकोपनिषद्भाष्यं समाप्तम् ॥

85

Sl. No. 493 **अग्निरहस्योपनिषत्** Ms. No P. 99/3

Beginning :

अग्निरेष पुरस्ताच्चीयते । संवत्सर उपरिष्टान्महदुक्थमुशस्यते प्रजापतिर्विसस्तस्याग्रं रसो गमत् ॥

End :

.... आत्मानं प्रेत्याभिसम्भविष्यामीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य एवमेतदिति ॥

Colophon :

तृतीयं ब्राह्मणम् । अग्निरहस्ये पष्ठोऽध्यायः । शतपथब्राह्मणे अग्निरहस्यकाण्डे पष्ठोऽध्यायः ॥

86

Sl. No. 495 **अथर्वशिखोपनिषत्** Ms. No. P. 1973/13

Beginning :

ॐ अथहैनं पैप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वणमुवाच— भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यम् ? किं तद्ध्यानम् ? को वा ध्याता ? कश्च ध्येयः ? स एत्याथर्वा प्रत्युवाच— ओमित्येतदक्षरमादौ प्रयुक्तम् ।

End :

सर्वध्यानयोगध्यानानां यत्फलमोङ्कारो वेद परशिरो वा शिव एको ध्येयः शिवंकरः । सर्व-मन्यत्परित्यज्य समाप्ताऽथर्वशिखोक्तामधीत्य द्विजो गर्भवासाद्विमुक्तो मुच्यत इत्यों सत्यं इत्युपनिषत् ॥

Colophon :

अथर्वशिखोपनिषत् समाप्ता ॥

87

Sl. No. 516 **अथर्वशिखोपनिषद्भाष्यम्** (अथर्वशिखोपनिषत्प्रकाशिका) Ms. No. P. 3464/3

Beginning :

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
कुर्वेऽथर्वशिखाव्याख्यां विदुषां तोषहेतवे ॥

ध्येयं निर्धारयितुमाख्यायिकामाह— पिप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वणमुवाच—

End :

अध्याप्यधीयमानो विमुच्यते इत्यर्थः । द्विरुक्तिः उपनिषत्समाप्त्यर्था ।

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यकृता(?):ग्रुदारः ।
वामागमाध्वगवदावहतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

Colophon :

समाप्ता अथर्वशिखोपनिषत्प्रकाशिका ॥

88

Sl. No. 518 अथर्वशिखोपनिषद्भाष्यम् (अथर्वशिखोपनिषद्विलासः) Ms. No. P. 5704

Beginning :

इत्थमेतदक्षरं परं ब्रह्मेत्यनेन प्रकृते ध्यानकरणमन्त्रस्य प्रणवस्य परब्रह्मप्रतिपादकत्वेन प्रशंसा कृता । अथ × × × वेदसाम्यत्वेन प्रशंसा क्रियते । अस्य पादाश्चत्वारो वेदा- स्यादीदमक्षरं (?) परं ब्रह्मेति यथा ब्रह्मविदाप्नोतीति ब्रह्मणोक्त × × × × प्रपञ्चनरूपस्य सद्ज्ञान × × × मन्त्रस्य

End :

तानि सर्वाणि हवींषि पर्यग्नीकरोति । अङ्ग वा समभिव्याहारो × × × कल्पसूत्रवन्न्यायाभासमूलान्यर × × × करणीयानीति सिद्धम् । अथर्वशिखायां नाराय- × × × मवरत्वमिति य × × षणद्वयगर्भात् ।

इत्थं उपनिषत्संख्यां शिखायां शैवदूषणम् ।
सतां तोषकरं भूयात् सम्यग्विमृशतां सताम् ॥

Colophon :

इति श्रीमद्रामानुजाचार्यमातृष्वसीय × × × वलब्धभाष्यातिशयपरिपाकभूताचार्य- पदधुरन्धरभद्रपीठप्र × × × श्रीबालधन्व्याचार्यात् सुतसन्तानोद्धारकस्य श्रीसौम्य- वरयोगीन्द्रप्रसादलब्धानन्यदुर्लभशुद्धसत्वापरनामधेयद्रविडवेदान्ताचार्य × × × रसूतस्य-

शुद्धसत्वाचार्यस्य तनुजवर × × × × प्रसादलब्धसुकविवैशद्येन रामानुजदासेन कृते श्रीमदथर्वशिखाविलासविस्तरे द्वितीयः खण्डः सम्पूर्णः ॥

89

Sl. No. 519 अथर्वशिखोपनिषद्भाष्यम् (अथर्वशिखोपनिषद्दीपिका) Ms. No. P. 21/2

Beginning :

अथाथर्वशिखानाम्न्याः श्रुतेः क्लेशविनाशने ।
क्रियते ब्रह्मबोधार्थं तया शुध्यतु मे मनः ॥

ब्रह्मविद्याप्राप्त्यर्थं तपोविद्यासम्पन्नैरपि गुरुशुश्रूषादिकं × × × मित्येतदर्थं प्रथमत आ × × × यितामवतारयति–

End :

इति उपनिषत्समाप्त्यर्थः । उपनिषत्प्रतिपाद्यमर्थं समासौ दर्शयति । ओङ्कारः × × × सत्त्वः × × × तं पूर्वरूपं जगतो नत्वन्यत् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करभगवतः कृतौ अथर्वशिखोपनिषद्दीपिका समाप्ता ॥ × ×

90

Sl. No. 523 अथर्वशिखोपनिषद्भाष्यम् Ms. No. A. 166/26

Beginning :

ध्यातृध्यानध्येयभावं यत्राथर्वाऽह च क्रमात् ।
रुद्रविष्णुशिवानां च महर्षिभ्यस्तथा परम् ॥
भिन्नं षोडशमात्राभिः प्रणवं ब्रह्मरूपकम् ।
तामथर्वशिखाभिख्यां व्याख्यास्ये श्रुतिमञ्जसा ॥

॥ अथेति ॥ अथ साधनचतुष्टयसम्पत्त्यनन्तरं अथर्वशिरोपनिषच्छ्रवणानन्तरं अथर्वशिखोपनिषदमुपदेष्टारं अथर्वाणं अथर्वाख्यं भगवन्तं पैप्पलादः अङ्गिराः सनत्कुमारश्च उवाच– पप्रच्छ ॥

End :

एतामधीत्येत्याद्यभ्यास उपनिषत्परिसमाप्तिद्योतनार्थः । ॐ सत्यमित्युपनिषदित्योङ्कारस्यैव प्राधान्येन प्रपञ्चितत्वद्योतनार्थमिति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ अथर्वशिखोपनिषद्भाष्यं समाप्तम् ॥

91

Sl. No. 525 अथर्वशिरउपनिषत् Ms. No. P. 1973/1

Beginning :

तच्छंयोरावृणीमहे + + + शान्तिः ॥

देवा ह वै स्वर्गं लोकमगमन् । ते देवा रुद्रमपृच्छन् । को भवानिति । सोऽब्रवीत् । अहमेकः प्रथममासं आसीद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति ॥

End :

तद्वा अथर्वणः शिरो देवकोशः समु × × तः । तत्प्राणोऽभिरक्षति शिरोऽन्नमथो मनः शिरोऽन्नमथो मनः + + + + + श्रियमन्नमथो मनः श्रियमन्नमथो मनः । विद्यामन्नमथो मनो विद्यामन्नमथो मनः । मोक्षमन्नमथो मनो मोक्षमन्नमथो मनः ॥

Colophon :

इत्यथर्वशिरउपनिषत्समाप्ता ॥

92

Sl. No. 541 अथर्वशिरउपनिषद्भाष्यम् Ms. No. A. 166/24

Beginning :

यत्रोक्तस्त्रिषु सद्भावो रुद्रस्यान्तरदृष्टितः ।
ओङ्कारादेस्तथा व्याख्या यत्र सम्यक् प्रवर्तते ॥

तामथर्वशिरोभिख्यां श्रुतिं निर्गुणतत्पराम् ।
व्याख्यातुमुत्सुकस्सोऽहं करोमि श्रीगुरोः पदम् ॥

॥ देवा इति ॥ देवाः विष्णुब्रह्मेन्द्रादयः ह वा इत्यनर्थकौ निपातौ । स्वर्गं ब्रह्मस्वरूपं गमयतीति तं कैलासाख्यं लोकं अगमन् गतवन्तः ॥

End :

यस्य बन्धस्तस्य मोक्ष इति दर्शनं तु स्थूलदृष्टिविषयमेव । + + + + तथाहि-लोके चारो बध्यते पश्चात् स एव मुच्यते इति स्थूलदर्शनम् । + + + तस्मादनात्मनो बन्धः आत्मनो मोक्षश्चेत्यवगन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ अथर्वशिरउपनिषद्भाष्यं समाप्तम् ॥

93

Sl. No. 547 अद्वैततारकोपनिषत् (अद्वयतारकोपनिषत्) Ms. No. P. 4106/4

Beginning :

अथातः अद्वैततारकोपनिषदं व्याख्यास्यामः- यतये जितेन्द्रियाय शमादिषट्कगुणपूर्णाय चित्स्वरूपोऽहमिति सदा भावयन् सम्यक् निमीलिताक्षः + + सच्चिदानन्दतेजःकूटरूपं परब्रह्माण्डोकथन् (?) तद्रूपो भवति ; गर्भजन्मजरामरणसंसारमहद्भयात् सन्तारयति ॥

End :

गुरुतरो गुरुरिति यस्सकृदुच्चारयति तस्य संसारमोचनं भवति + + सर्वपुरुषार्थ-सिद्धिर्भवति- य एवं वेद- इत्युपनिषत् ॥

Colophon : — — —

94

Sl. No. 549 अद्वैततारकोपनिषत् (अद्वयतारकोपनिषत्) Ms. No. B. 412/1

Beginning :

॥ पूर्णमद इति शान्तिः ॥ अथातः अद्वयतारकोपनिषदं व्याख्यास्यामः । यतिने जितेन्द्रियाय शमादिषड्गुणपूर्णाय चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः किञ्चि-

दुन्मीलिताक्षो वान्तर्दृष्ट्याभ्रदहरादुपरि सच्चिदानन्दतेजःकूटरूपं परब्रह्मावलोकयन् तद्रूपो भवति ॥

End :

गुरुरेव परा विद्या गुरुरेव परायणम् ।
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ॥

यस्मात्तदुपदेष्टासौ तस्माद्गुरुतरो गुरुरिति यस्सकृदुच्चारयति तस्य संसारमोचनं भवति ; सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति ; सर्वान् कामानवाप्नोति सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥

Colophon :

अद्वयतारकोपनिषत्समाप्ता ॥

95

Sl. No. 552 अद्वैततारकोपनिषद्भाष्यम् (अद्वयतारकोपनिषद्भाष्यम्) Ms. No. B. 247-II-2

Beginning :

मूर्तामूर्तात्मकं यत्र तारकद्वयमुच्यते ।
ज्योतिर्दर्शनमार्गोक्तिं व्याख्यास्येऽद्वयतारकम् ॥

ननु जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्मेति यदुक्तं तद्युक्तमेव ॥

End :

नन्विह तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवतीत्येतादृशवाक्यान्यर्थवादा एव स्युः + + + + तथापि स्वदेहान्तर्वर्तिज्योतिर्दर्शनं विना तत्त्वमसीत्युपदिशतामहं ब्रह्मास्मीति वाङ्मात्रेण प्रलपतां च भ्रान्ततमानां कल्पकोटिष्वपि संसारबन्धान्मोक्षप्रथमसाधनत्वाच्चास्य दर्शनस्योपेक्षा न कदापि कार्येति स्थितम् ॥

Colophon :

इति अद्वयतारकोपनिषद्भाष्यं समाप्तम् ॥

96

Sl. No. 556

अद्वैतोपनिषत्

Ms. No. C. 2502/7

Beginning :

अथ अद्वैतपुरुषस्य न द्वितीयभेदोऽस्ति । स्थावरजङ्गममध्ये अद्वैतं ब्रह्म प्रकाशितम् । समस्तलोकमध्ये ब्रह्म द्विविधस्तु × × विचरति । चैतन्यं चित्तेजसः ॥ ओं, अन्तरात्मा मध्ये कैवल्यात्मैकैकं यथा रविर्जायते रवितेजः अखण्डितब्रह्म मायाजगत्त्रयं अवस्थात्रयं परमात्मनः एकं भवति ॥

End :

सन्तोषब्रह्म समस्त गुरूपि (?) जायते । यथा जलरहितमीनं प्राणं परित्यजेत् तथा द्वितीयावस्थारहितः अखण्डितं वस्तुमध्ये प्रवेशहृदयस्थानेष्ठावुवस्थानमध्ये(?) परमात्मा भवति ॥

Colophon :

इति वेदान्ताद्वैतोपनिषत्समाप्ता ॥

97

Sl. No. 559

अध्यात्मोपनिषत्

Ms. No. P. 1277/3/A

Beginning :

ॐ अन्तश्शरीरे निहितो गुहायामज एको नित्यमस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद । यस्यापः शरीरं योऽपोन्तरे सञ्चरन्यमापो न विदुः । + + + स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः ॥

End :

एतां विद्यां × × × न्तरतमाय ददौ । अपान्तरतमो ब्रह्मणे ददौ । + + + + + यमस्तर्वेभ्यो भूतेभ्यो ददावित्येतन्निर्वाणानुशासनं वेदानुशासनमित्युपनिषत् ॥

Colophon :

— — —

98

Sl. No. 564 अध्यात्मोपनिषद्भाष्यम् (अध्यात्मदर्पणम्) Ms. No. P. 1277/3/B

Beginning :

ओमित्यक्षरमुच्चरन्नहमथो श्रीसुन्दरेशं गुरुं
नत्वा पूर्णमदश्च शान्तिमिति तामेनां पठित्वा ततः ।
आत्मात्मोपनिषद्वचांसि सुलभानन्दप्रदान्यादरात्
व्याख्यास्ये विदुषां हिताय परमात्मातः प्रसीदत्वयम् ॥
अध्यात्म .... । .... तेऽस्तु ॥

अत्र खल्वीशादिमुक्तिकान्ताष्टोत्तरशतोपनिषत्सु काश्चिदुपनिषदो गुरुशिष्यक्रममवलम्ब्य प्रवृत्ता दृश्यन्ते ॥

End :

यदेतत् सर्ववेदान्तरहस्यार्थप्रकाशकम् ।
अध्यात्मदर्पणं लोके दुर्लभं ह्याश्रयेत्सुधीः ॥
सर्वशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।
अन्वेष्टव्यं प्रयत्नेन शास्त्रमेतन्मुमुक्षुणा ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यविरचितमध्यात्मदर्पणं समाप्तम् ॥

99

Sl. No. 567 अन्नपूर्णोपनिषत् Ms.No. P. 4136/14

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।
निदाघो नाम योगीन्द्रो ऋभुं ब्रह्मविदां वरम् ।
प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ॥
आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् ।

+ + +

निदाघ त्वं कृतार्थोऽसि शृणु विद्यां सनातनीम् ।।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ।।
मूलशृङ्गारमध्यस्था विन्दुनादकलाश्रया ।
नित्यानन्दा निराधारा विख्याता विलसत्कचा ।।

\+ \+ \+

भगवत्यन्नपूर्णेति ममाभिलषितं ततः ।।

End :

वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्राय शिष्याय वै पुनः ।।
अन्नपूर्णोपनिषदं योऽधीते गुर्वनुग्रहात् ।
स जीवन्मुक्ततां प्राप्य ब्रह्मैव भवति स्वयम् ।।

इत्युपनिषत् ।। भद्रं कर्णेभिरिति शान्तिः ।।

Colophon :

चतुर्थोऽध्यायः । अन्नपूर्णोपनिषत् समाप्ता ।।

100

Sl. No. 570 — अन्नपूर्णोपनिषत् — Ms. No. B. 1038/5

Beginning :

ओं भद्रं कर्णेभिरिति शान्तिः ।

निदाघो नाम योगीन्द्रो ऋभुं ब्रह्मविदां वरम् ।
प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ।।
आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् ।

\+ \+ \+

निदाघ त्वं कृतार्थोऽसि शृणु विद्यां सनातनीम् ।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ।।

मूलशृङ्गाटमध्यस्थबिन्दुनादकलाश्रया ।
नित्यानन्दा निराधारा विख्याता विलसत्कचा ॥

+ + +

भगवत्यन्नपूर्णेति ममाभिलषितं ततः ॥

End :

अजमजरमनाद्यमाद्यमेकं
पदममलं सकलं च निष्कलं च ।
स्थित इति तदा नभस्वरूपा-
दपि विमलस्थितिरीश्वरः क्षणेन ॥

Colophon :

इति तृतीयोऽध्यायः ॥

101

Sl. No. 574 अन्नपूर्णोपनिषद्भाष्यम् Ms. No. B. 247/31

Beginning :

माण्डव्याख्यमहामुनेरभिहिता मुक्तिर्विदेहोत्तमा
सर्वाश्चर्यकरी समाधिवशतोऽकाले विरक्तेर्बलात् ।
यस्यां सर्वरहस्यतत्त्वविषया अर्थाः परे चोदिता
व्याख्यास्ये महतीमिमां मृदुपदां तामन्नपूर्णां श्रुतिम् ॥

अत्र निदाघाख्यो योगीन्द्रः ब्रह्मविदां वरं ऋभुं पप्रच्छेत्युपक्रमः ॥

End :

एतावता वरिष्ठपदप्राप्तिपर्यन्तेन आत्मयत्नेन निर्विकल्पकनिस्सङ्कल्पनिर्वृत्तिकनिर्वासन-समाधिलक्षणेन संसृतिर्निश्शेषं जिता भवति । एतदुपनिषदध्ययनाद्ब्रह्मैव भवतीति ॥

Colophon :

इत्यन्नपूर्णोपनिषद्भाष्यं समाप्तम् ॥

102

Sl. No. 578 **अन्नपूर्णैश्वर्युपनिषत्** Ms. No. P. 3581/10

Beginning :

मूलशृङ्गाटमध्यस्था विन्दुनाळकळाश्रया ।
नित्यानन्दी निराहारी विद्याता कलनत्वचा ॥

End :

अन्नं देहि ततः स्वाहामन्त्रसारेति विश्रुता ।
सप्तविंशतिवर्णात्मा योगिनीगणसेविता ॥

ऐं ह्रीं सौं श्रीं क्लीं ओं नमो भगवत्यन्नपूर्णे ममाभिलषितं देहि स्वाहा ॥

Colophon :

अन्नपूर्णैश्वर्युपनिषत्समाप्ता ॥

103

Sl. No. 579 **अमृतनादोपनिषत्** Ms.No. P. 1643/3

Beginning :

ॐ सह नाववत्विति शान्तिः ॥

सर्वाण्यधीत्य मेधावी अभ्यस्य च पुनःपुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथो × × ॥
× × रथमारुह्य × × × सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥

End :

अपानस्तस्य मध्ये तु इन्द्रगोपस्यसंनिभः ।
समानस्तस्य मध्ये च गोक्षीरसदृशप्रभः ॥
अपा × × उदानश्च व्यानो बार्चिस्समप्रभः ।
× × × भित्त्वा मारुतो याति मूर्धतः ॥
× × × × × × × × × ॥

Colophon :

अमृतनादोपनिषत् समाप्ता ॥

104

Sl. No. 585 **अमृतनादोपनिषत्** Ms. No. P. 8557

Beginning :

ॐ शास्त्राण्यधीत्य मेधावी ×स्य च पुनः पुनः ।
पलाल × धान्यार्थी त्यजेत् ग्रन्थमशेषतः ॥
ओङ्काररथमारुह्य विष्णुं कृत्वा तु सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥

End :

यस्यैष मण्डलं भित्वा मारुतो याति मूर्धनि ।
यत्र तत्र मृतश्चापि न स भूयोऽभिजायते ॥
न स भूयोऽभिजायत इति ॥

Colophon :

इति योगोपनिषत्समाप्ता ॥

105

Sl. No. 590 अमृतनादोपनिषद्भाष्यम् Ms. No. A. 166/22

Beginning :

यत्रायं योगशास्त्रार्थस्सङ्ग्रहेण निगद्यते ।
एनामामृतनादाख्यां व्याख्यास्ये श्रुतिमञ्जसा ॥

॥ शास्त्राणीति ॥ मेधाविवेकादिसाधनवान् बुद्धिमान् पुरुषः पुनःपुनः असच्छास्त्राणि प्रकृतश्रुत्यादीनि योगशास्त्राण्यधीत्याभ्यस्य तत्प्रतिपादितं परमं निर्गुणं ब्रह्म विज्ञाय स्वाभिन्नत्वेन सम्यक् विदित्वा ॥

End :

अरेफमक्षरमक्षरं ज्ञानमित्यर्थः । तस्माज्जातमक्षरं न विनश्यति नित्यत्वात् ॥ २४ ॥
सप्तत्रिंशत् पर्यन्ताः श्लोकाः स्पष्टार्थाः । ब्रह्मरन्ध्रवायोः न पुनर्जन्मेति ॥ ३८ ॥

Colophon :

इति अमृतनादोपनिषद्भाष्यं समाप्तम् ॥

106

Sl. No. 592 **अमृतबिन्दूपनिपत्** Ms. No. P. 1643/1

Beginning :

मनो हि द्विविधं प्रोक्तं शुभ(द्धं) चाशुभ(द्ध)मेव च ।
अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम् ॥

मन एव मनुष्याणां कारणं बन्धमोक्षमोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं मनः ॥

End -

निष्कलं निखिलं × × तद्ब्रह्माहमिति स्मृतम् ।
सर्वभूताधिवासं च यत् भूतेषु च वसत्यपि ॥
सर्वां × ग्राहकत्वेन तद्ब्रह्माहमिति स्मृतम् ।
वासुदेव × × × × × × वासुदेव इति ॥

Colophon :

इति अमृतबिन्दूपनिषत् समाप्ता ॥

107

Sl. No. 602 **अमृतबिन्दूपनिषद्व्याख्या (दीपिका)** Ms. No. P. 5772/28

Beginning :

व्याख्यास्येऽमृतबिन्द्वाख्यां तत्त्वोपनिषदं पराम् ।
अमृतेशस्तया देवः प्रीयतां परमेश्वरः ॥

ब्रह्मात्मैक्यविज्ञानादनर्थनिवृत्तिरानन्दावाप्तिश्चेति सर्वोपनिषदां सिद्धान्तः ॥

End :

अहं सर्वेषु भूतेषु वसामीति वासुदेवः– स्वयम्प्रकाशः, वासुश्चासौ देवश्चेति वासुदेवः ।
तदस्म्यहंवासुदेवः । व्याख्यातम् । वाक्याभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिः अमृतबिन्दूपनिषद्दीपिका समाप्ता ॥

108

Sl. No. 603 अमृतबिन्दूपनिषद्भाष्यम् Ms. No. A. 166/20

Beginning :

यदक्षराणि सर्वाणि भान्त्येवामृतबिन्दुवत् ।
एनाममृतबिन्द्वाख्यां व्याख्यास्ये श्रुतिमादरात् ॥

अत्र शुद्धमनस एव तत्त्वज्ञानोऽपदेशाधिकारात् तद्दिदेशयिषुः आदौ मनसः द्विविधं स्वरूपं विवृणोऽस्ति– मन इति॥

End ;

सर्वभूताधिवासं– सर्वेषां भूतानां अधिवासो यस्मिन् तत् । तद्ब्रह्मैव वासुदेवः । अहमस्मीति द्विवचनं उपनिषत्समाप्त्यर्थम् ॥

Colophon :

इत्यमृतबिन्दूपनिषद्भाष्यं समाप्तम् ॥

109

Sl. No. 606 अरुणोपनिषत् Ms. No. P. 6586/2

Beginning :

सह नाववतु ॥ + + + शान्तिः ॥

× × त्यमित्यद्वयं भानुं तेजोमण्डलमध्यगम् ।
सर्वाधिव्याधिशमनं छायाश्लिष्टतनुं भजे ॥
उद्यन्नद्यमित्र(?) स्थान् आरोहन्नुत्तरां दिवं देवः ।
हृद्रोगं मम सूर्य हरिमाणञ्च नाशय ॥ (?)

End :

ममानघ स्वामिन् इत्यार्यां साम्बस्य पुरो नभस्थलपतितां, पठतां भाग्यसमृद्धिः समस्त-रोगक्षयः स्यात् ॥ ॥ सह नाववतु । + + शान्तिः । भद्रं कर्णेभिः ॥

Colophon :

— — — —

110

Sl. No. 607 अवधूतोपनिषत् Ms. No. B. 247/39

Beginning :

॥ ॐ सह नाववत्विति शान्तिः॥ हरिः ॐ॥ अथ ह साङ्कृतिर्भगवन्तं अवधूतं दत्तात्रेयं परिसमेत्य पप्रच्छ– भगवन् कोऽवधूतः ? तस्य का स्थितिः ? किं लक्ष्म ? किं संसरण-मिति । तँ होवाच भगवान् दत्तात्रेयः + +

अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबन्धनात् ।
तत्वमस्यादिलक्ष्यत्वात् अवधूत इतीर्यते ॥

End :

य इदमधीयते सोऽपि कृतकृत्यो भवति । सुरापात्पूतो भवति । स्वर्ण + ति । ब्रह्महत्यात् + ति । कृत्याकृत्यात् + ति । एवं विदित्वा स्वेच्छाचारपरो भूयादों सत्यमित्युपनिषत् ॥

Colophon :

इत्यवधूतोपनिषत् समाप्ता ॥

111

Sl. No. 612 अवधूतोपनिषद्भाष्यम् Ms. No. B. 247/39

Beginning -

स्वेच्छाचारोऽवधूतस्य निर्दिष्टो यत्र कथ्यते ।
अवधूतोपनिषदं व्याख्यास्ये सहजस्थितिम् ॥

अत्र दत्तात्रेयसाङ्कृतिसंवादात्मिकायामवधूतोपनिषद्यतिवर्णाश्रमी योग्येवावधूत इत्युक्तम् । + + + + एवेति प्राप्ते इदमुच्यते– ब्रह्म वरीयानेवेति ॥

End :

तस्मात् अप्राप्तस्य प्राप्तव्यस्य प्राप्तिरेव सर्वशास्त्रयुक्त्यनुभवानुरोधिनीति मन्तव्यम् ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतिषु अवधूतोपनिषद्भाष्यं समाप्तम् ॥

112

Sl. No. 616 अव्यक्तनृसिंहोपनिषत् Ms. No. P. 4136/12

Beginning :

ॐ आप्यायन्त्विति शान्तिः ॥

पुरा किलेदं न किञ्चनासीत् न द्यौर्नान्तरिक्षं न पृथिवी केवलं ज्योतिरूपमनाद्यनन्तमनण्वस्थूलरूपमरूपं रूपवदविज्ञेयं ज्ञानरूपमानन्दमयमासीत् । तं ह वागदृश्यमानाऽभ्युवाच– भो भो प्रजापते त्वमव्यक्तादुत्पन्नोऽसि + + + साऽब्रवीत् + + यदविज्ञेयं तदव्यक्तम् ॥

End :

जीवन्मुक्तश्च भवति । देहान्ते तमसः परं धाम प्राप्नुयात् । यत्र विराट् नृसिंहोऽवभासते, तत्र खल्पासते । तत्स्वरूपध्यानपरा मुनय आकल्पान्ते तस्मिन्नेवात्मनि निलीयन्ते । न च पुनरावर्तन्ते । + + + + + । नाव्रतिने नाऽतपसे नाऽशान्ताय नाऽदान्ताय नाऽदीक्षिताय नाऽधर्मशीलाय नाऽहिंसकाय नाऽब्रह्मचारिणे इत्येषोपनिषत् । आप्यायन्त्विति शान्तिः ॥

Colophon :

अव्यक्तनृसिंहोपनिषत् समाप्ता ॥

113

Sl. No. 621 **अव्यक्तनृसिंहोपनिषद्भाष्यम्** Ms. No. B. 247/29

Beginning :

प्रपञ्चसृष्टिविज्ञानं यस्यां धातुस्समीर्यते ।
अव्यक्तोपनिषद्वाचं व्याख्यास्ये सृष्टिनिश्चयात् ॥

अत्र केवलज्योतीरूपमित्यादिविशेषणवद्यदानन्दमासीदित्युक्तं तच्चिदानन्दलक्षणसप्रतियोगिकब्रह्मैव भवितुमर्हति ; न निष्प्रतियोगिकं ; सर्वलक्षणवर्जितत्वेन सर्वशब्ददूरत्वात् ॥

End :

यद्वा परस्य निर्विशेषब्रह्मण एव सकाशात् स्वयं भूत्वा पावकविस्फुलिङ्गोदाहरणेन जीवब्रह्मणोरिव ब्रह्मब्रह्मणोश्चांशांशिभावस्य सुप्रसिद्धत्वादस्य नृसिंहजन्यत्वं गौणमेव मन्तव्यम् ॥

Colophon :

इत्यव्यक्तनृसिंहोपनिषद्भाष्यं समाप्तम् ॥

114

Sl. No. 624 **आचमनोपनिषत्** Ms. No. P. 1480/3

Beginning :

ॐ आचमनविधिं व्याख्यास्यामः । जङ्घे पाणिपादौ प्रक्षाल्य, प्राङ्मुखोदङ्मुखो वा बद्धशिखो यज्ञोपवीती ब्राह्मणस्य दक्षिणहस्ते पञ्चतीर्थानि भवन्ति । + + + गोकर्णाकृतिवत् कृत्वा माषमग्नजलं पिबेत् । तेन त्रिराचामेत् ॥

End ;

मुखमग्नितृप्तं सर्वं प्रोक्षति । यः पादौ प्रोक्षति, यः चक्षुषी यश्चन्द्रादित्यौ यन्नाभिं तेन पृथिवी यस्ततस्तेन विष्णुः यच्छिरस्तेन रुद्रः मूर्ध्नि शतकुबेरः । सर्वदेवत्यास्तेन प्रीणातु । य एवं वेद । इत्युपनिषत् ॥

Colophon :

—

115

Sl. No. 626 **आत्मबोधोपनिषत्** Ms. No. P. 1973/23

Beginning :

ईशकेनकठप्रश्न + + + दीपिकोपनिषम् क्रमात् ॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपं अकार उकारो मकारश्चेति त्र्यक्षरं प्रणवं तदेतदोमिति । यदुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणाय + + इति मन्त्रो-पासको वैकुण्ठभुवनं गमिष्यति ॥

End :

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम ।
आनन्दत्वान्न मे दुःखं अज्ञानाद्भाति सत्यवत् ॥

अमृतत्वं च गच्छत्यों नमः । आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वा न च पुनरावर्तते ; न च पुनरावर्तते । इत्युपनिषत् ॥

Colophon :

इत्यात्मप्रबोधोपनिषत्समाप्ता ॥

116

Sl. No. 627 **आत्मबोधोपनिषत्** Ms. No. 5586

Beginning :

हरिः ओम् । प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार-उकार-मकारश्चेति त्रय-मक्षरं प्रणवम् । तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ओं नमो नारायणाय + + इति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति ॥

End :

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम ।
आनन्दत्वान्न मे दुःखं अज्ञानाद्भाति सत्यवत् ॥

लोके अक्षिते अमृतत्वं च गच्छत्यमृतत्वं च गच्छत्यों नम इति । आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वा न च पुनरावर्तते न च पुनरावर्तते ।।

Colophon :

आत्मबोधोपनिषत् समाप्ता ॥

117

Sl. No. 633 आत्मोपनिषत् Ms. No. P. 3581/16

Beginning :

॥ ॐ पूर्णमद इति शान्तिः ॥ अथैवाङ्गिरास्त्रिविधः पुरुषस्तद्यथा– बाह्यात्मा अन्तरात्मा परमात्मा चेति । त्वक्चर्ममांसलोमाङ्गुल्यङ्गुष्ठपृष्ठावंशनखगुल्फोदरनाभिमेढ्रकटयूरुकपोलश्रोत्रभ्रूललाट-बाहुपार्श्वशिरोधमनिकाक्षीणि भवन्ति जायते म्रियत इत्येष बाह्यात्मा ॥

. . . .

End :

शुद्धो निरवयवात्मा केवलः सूक्ष्मो निष्कलो निरञ्जनः निर्विकारः शब्दस्पर्शरसगन्धवर्जितो निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्योऽनेकवर्णश्च पुनाति अशुद्धान्यपूतानि । निष्क्रिय-स्तस्य संस्कारो नास्ति ; संस्कारो नास्ति । इत्येष परमात्मा पुरुषो नाम ॥

Colophon:

इत्यात्मोपनिषत्समाप्ता ॥

118

Sl. No. 641 आत्मोपनिषद्भाष्यम् Ms. No. B. 247/36

Beginning :

चत्वार उक्ता आत्मानो यस्यां सम्यग्विचारणे ।
एनामात्मोपनिषदं व्याख्यास्ये सारगर्भिताम् ॥

नन्वात्माऽन्तरात्मा परमात्मा चेति त्रय एवात्मानः इहोच्यन्ते ; कथं चत्वार इति । अत्रोच्यते– आत्मा हि त्वगाद्युक्तस्वरूपो देहः । + + + + अत आत्मचातुर्विध्यं युक्तमुक्तम् ॥

End :

तथा चेह निष्प्रतियोगिकब्रह्मैव विवक्षितमिति सर्वद्वन्द्वापवादद्वारा परमार्थतां वदतोपसंहारश्लोकेन दर्शयति । तस्मादावृतेः सदसत्त्वाभ्यां अस्ति नास्तीति प्रत्ययौ ; न तु नित्यस्येति युक्तम् ॥

Colophon :

इत्यात्मोपनिषद्भाष्यं समाप्तम् ॥

119

Sl. No. 650 आरुण्योपनिषत् Ms. No. P. 1973/6

Beginning :

आरुणिः प्रजापतिलोकं जगाम । तं गत्वोवाच– केन भगवन् कर्माण्यशेषेण विसृजानीति । तँ होवाच प्रजापतिः– तव पुत्रान् + + + + विसर्जयेद्दण्डमाच्छादनं चैव कौपीनं च परिग्रहेत् । शेषं विसृजेदिति ॥

End :

तद्विप्रासो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् इति । एवं निर्वाणानुशासनं वेदानुशासनं वेदानुशासनमिति ॥ ६ ॥

Colophon :

इत्यारुण्योपनिषत्समाप्ता ॥

120

Sl. No. 651 आरुण्योपनिषत् Ms. No. P. 3621/7

Beginning :

आरुणिः प्राजात्यः प्रजापतेर्लोकं जगाम । तं स गत्वोवाच– केन भगवन् कर्माण्यशेषतो विसृजानीति । तँ होवाच प्रजापतिः– तव पुत्रान् भ्रातृन् बन्ध्वादीन् शिखां यज्ञोपवीतं यागसूत्रं स्वाध्यायं च भूलोकभुवर्लोकसुवर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकञ्च + + + + शेषं विसृजेत् ; शेषं विसृजेन् ॥

End :

खल्वेतदुपनिषदं विद्वान् य एवं वेद पालाशं वैल्वमौदुम्बरं दण्डमजिनं मेखलां यज्ञोपवीतञ्च त्यक्त्वा शूरो य एवं वेद। तद्विष्णोः परमं पदं + + + +। विष्णोर्यत्परमं पदम्। इत्येवन्निर्वाणानुशासनं वेदानुशासनमिति ॥

Colophon-

आरुणिकोपनिषत्समाप्ता ॥

121

Sl. No. 652 आरण्यकोपनिषत् Ms. No. P. 6198

Beginning :

अथ आरुणिः प्राजापतेर्लोकं जगाम। तं गत्वोवाच– केन भगवन् कर्माण्यशेषतो विसृजानीति। तं होवाच प्रजापतिस्तव पुत्रान् भ्रातॄन् बन्ध्वादीत् शिखां यज्ञोपवीतं सूत्रं स्वाध्यायञ्च + + + + शेषं विसृजेत् ॥

End :

तद्विप्रासो जागृवांसः समिन्धते। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्परमं पदं इति। एवं सर्वानुशासनं वेदानुशासनं वेदानुशासनमिति ॥

Colophon :

इति आरण्यकोपनिषत् समाप्ता ॥

122

Sl. No. 568 आरण्यकोपनिषद्भाष्यम् (दीपिका) Ms. No. P. 1655/7

Beginning :

आरुणीयोपनिषदं व्याख्यास्ये न्यासमार्गगाम्।
आनन्दात्मानमायान्ति गङ्गामीव पयोनिधिम् ॥

विषयादेश्च सर्वोपनिषदां साधारण्यान्न पृथग्वर्णनीयता ; आत्मज्ञाने सति न्यासे चात्यन्त मास्तिक्यं जन (!) इयमाख्यायिकामवतारयति ॥

End:

वेदस्य भगवतः शब्दराशेः सर्वज्ञस्य वर्णा × × × × दिव्यावस्थाहेतोः राजकल्पस्यानुशासनं वेदानुशासनम् । अभ्यास उपनिषत्समाप्त्यर्थः । इत्युपनिषदन्तरे सोऽप्येतावदर्थपर्यवसाय × × त्येतदर्थमितिशब्दः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यश्रीशङ्करानन्दभगवतः कृतिषु × × रण्योपनिषद्दीपिका समाप्ता ॥

123

Sl. No. 660 आरुणिकोपनिषद्भाष्यम् Ms. No. A. 166/12

Beginning :

आरुण्योपनिषद्वाणीः कर्मत्यागैकगोचराः ।
व्याख्यास्ये सङ्ग्रहेणैव संसारार्तिनिवृत्तये ॥

॥ आरुणिरिति ॥ अरुण्स्यापत्यं प्रजापतिसम्बन्धी कदाचित् प्रजापतेर्लोकं जगाम । गत्वा तं प्रजापतिं चोवाच— हे भगवन् केनोपायेन कर्माणि गार्हस्थ्योचितश्रौतस्मार्तनित्यनैत्तिकाद्यात्मकान्यशेषतः विसृज।नि— त्यक्ष्यामीति ॥

End :

एवं निर्वाणस्य नित्यस्य नित्युशुद्धबुद्धमुक्तस्वभावपरब्रह्मत्मैक्यावस्थानलक्षणकैवल्यमोक्षस्य अनुशासनं प्रतिष्ठापनमित्युपनिषत् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ आरुणिकोपनिषद्भाष्यं समाप्तम् ॥

124

Sl. No. 662 **आश्रमोपनिषत्** Ms. No. B. 123/5

Beginning :

हरिः ॐ ॥ अथातश्चत्वार आश्रमाः षोडशभेदा भवन्ति । तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति गायत्रो ब्राह्मणः प्राजापत्यो बृहस्पतिरिति । य उपनयनादूर्ध्वं त्रिरात्रमक्षारलवणाशी गायत्रीमन्त्री स गायत्रः । योऽष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत ब्रह्म × × × ग्रहणान्तं वेदस्य स ब्राह्मणः ॥

End :

परमहंसा च दण्डधराः + + × देवगृहे वासिनो न तेषां धर्मो नाधर्मो न चानृतं सर्वसहाः सर्वसमाः अद्वैतवर्तिनः समलोष्टाश्मकाञ्चनाश्चातुर्वर्ण्यं यथोपपन्नं भैक्षाचर्यं चरन्तः आत्मानं मोक्षयन्त आत्मानं मोक्षयन्त इति ॥

Colophon :

इत्याथर्वणे आश्रमोपनिषत्समाप्ता ॥

125

Sl. No. 681 **ईशावास्योपनिषत्** Ms. No. C. 2503/1

Beginning :

वाजसनेयसंहितायामीशकोपनिषत्प्रारम्भः ।

ईशावास्यमिदँ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

End:

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

Colophon :

इति वाजसनेयसंहितोपनिषत्सम्पूर्णा ॥

126

Sl. No. 686 ईशावास्योपनिषद्भाष्यम् Ms. No. P. 3249/1

Beginning :

ईशावास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्यात्मनो यथार्थप्रतिपादक-(याथात्म्यप्रकाशक) त्वात् । याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्व-गतत्वादि वक्ष्यमाणम् । + + + + एवमुक्ताभिधेयसम्बन्धप्रयोजनान्मन्त्रान् संक्षेपतो व्याख्यास्यामः— ईशा— इष्टे इतीट् तेनेशा ।

End .

अमृतमश्नुत इत्यापेक्षिकममृतं विद्याशब्देन + + + + तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथा व्याख्यात एव मन्त्राणामर्थ इत्युपरम्यते ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य-श्रीशङ्करभगवत्पादकृतौ वाजसनेयसंहितोपनिषद्भाष्यं सम्पूर्णम् ॥

127

Sl. No. 696 ईशकेनोपनिषद्भाष्यटिप्पणी Ms. No. P. 3769

Beginning :

येनात्मना परेशेन व्याप्तं विश्वमशेषतः ।
सोऽहं देहत्रयीसाक्षी वर्जितो देहतद्गुणैः ॥

ईशावास्यमित्यादिमन्त्रान् व्याचिख्यासुर्भगवान् भाष्यकारः तेषां कर्मशेषत्वशङ्कां ताव-द्व्युदस्यति । तथाहि कर्मजडाः केचन मन्यन्ते स्म— ईशावास्यादयो मन्त्राः कर्मशेषाः मन्त्रत्वात् , इषे त्वेत्यादिमन्त्रवत् ।

End :

ब्रह्मेति वेद । आमूलत्वात्तदाश्रया, तपआदीनि वेदान्तान्यङ्गानि यस्याः सत्यकामः स्वयं सिद्धः सर्वेशो यः स्वशक्तित एवान्तःप्रविष्टोऽहमुपास्यः सर्वदेहिनाम् ॥

Colophon :

इति केनेषितभाष्यस्य वाक्यार्थे प्रधानस्य × × × ॥

Extra Information :

भगवत्पादभाष्यस्य भावगम्भीरवेदिना ।
शिवानन्दयतीशेन टिप्पणं कृतमादरात् ॥

इति ग्रन्थान्ते दृश्यते ॥

128

Sl. No. 694 **ईशावास्यभाष्यम्** Ms. No. C. 1810

Beginning :

चिदानन्दो हंसश्चिरपरिचितो मानसतटे
चमत्कारान् कुर्वन् मतिघरटया चाटवपटुः (?) ।
विलासाच्चिन्वानश्चरमचरमुच्चावचमिदं
विलीनीकुर्वंश्चासकृदपि परेशो विजयते ॥

\+ \+ \+ \+

शङ्करपतिवरसूचितसरणिसमालम्बनेन सरसतरम् ।
वाजसनेयिमनूनां भावं कलयानि भवपराभूत्यै ॥

मनूनीशेत्याद्यान् विशदबृहदारण्यकगिरा
मुहुर्व्याख्यातार्थान् क्रमघटनयाऽऽलोड्य विमलम् ।
पतिर्वाञ्लोनद्रविडमुनिनिराम्नायनगराधिभूः (?)
........कृष्णानन्दः स्वमतिपरिशुद्धिं वितनुते ॥

ईशावास्यमित्याद्या वाजसनेयशाखान्तर्गतकाण्वमाध्यन्दिनयोश्चत्वारिंशत्तमाध्यायात्मिकोपनिषन्मन्त्रमयी । तत्र काण्वोपनिषदो माध्यन्दिनोपनिषदमनुरुध्य अल्पग्रन्थाविवृतिरारभ्यते । तत्रेशावास्यमिति + + + सङ्ग्रहेणोपदिशति– ॥ ईशेति ॥

End :

अग्ने नय इति मन्त्रविवेचनानन्तरं + + + + ओं खं ब्रह्मेत्यस्यार्थं निर्दिशति– ओमित्यादिना । + + + + अन्ते हृदयमध्ये खं चिदाकाशं शोधितजीवं ब्रह्म

शोधिततत्पदार्थं ध्यायेदित्यर्थः । अयञ्च मन्त्रो बृहदारण्यकसप्तमाध्यायप्रथमब्राह्मणेन विवृत इति प्रागेव प्रसङ्गान्निरूपितम् ॥

Colophon :

इति श्रीईशावास्यमन्त्रभाष्यं समाप्तम् ॥

129

Sl. No. 695 ईशावास्यभाष्यम् (दीपिका) Ms. No. SP. 1655/5

Beginning :

ईशावास्यादयो मन्त्राः विनियुक्ता न कर्मणि ।
प्रमाणाभावतस्तेषां कुर्वे व्याख्यामकर्मणाम् ॥

ईशा ईष्ट इतीट् । ईश्वर आनन्दात्मा तेन आवास्यं अच्छादनीयं वासयोग्यं वा इदं
+ + + करणीयेत्यर्थः ।

End :

उ स तेभ्यः जुहूराणं कुटिलं एनः पापं भूयिष्ठां अतिशयेनाधिकां ते तुभ्यं नमउक्तिं नमस्कारोक्तिं विधेम विधास्याम सर्वदा कुर्म इत्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृति-रीशावास्योपनिषद्दीपिका समाप्ता ॥

130

Sl. No. 697 ईशावास्योपनिषद्भाष्यम् Ms. No. B. 245/1-B

Beginning :

सुन्दरं सुन्दराचार्यं प्रणम्य पुरुषोत्तमम् ।
ईशावास्याद्युपनिषद्भाष्यञ्चारभ्यतेऽधुना ॥

ईशावास्यमित्याद्यो मन्त्राः प्रायेणाकर्मब्रह्मात्मैक्यावबोधनपरा अपि प्रतिपत्तिविधिशेषतयैव ब्रह्मात्मानमवगमयन्तीति गम्यते ॥

End :

तन्निष्प्रतियोगिकं ब्रह्मैव सर्वस्मादपि पूर्णमवशिष्यते । परिशिष्यत इत्यर्थः । करणत्रय-दोषशान्त्यर्थोऽवस्थात्रयशान्त्यर्थो वा त्रिवारशान्तिपाठः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयाचार्यस्य कृतौ वाजसेनयसंहितोपनिषद्भाष्यं समाप्तम् ॥

131

Sl. No. 702 ईशावास्योपनिषद्भाष्यम् Ms. No. P. 3362/2

Beginning :

नित्यानित्यजगद्धात्रे नित्याय ज्ञानमूर्तये ।
पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ।

यस्माद्ब्रह्मेन्द्ररुद्रादि + + + + गुरवे नमः ॥

स्वायंभुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव । + + + + ईशावास्यं– वासयोग्यमीशावास्यम् । जगत्यां– प्रकृतौ । तेन– ईशेन । भुञ्जीथाः ॥

End :

युयोधि वियोजय । यदस्मान् कुरुतेत्यल्पास्ते देवोस्माद्वियोजय । + + + + भक्तिज्ञानाभ्यां भूयिष्ठां नम इत्युक्तिं विधेम ॥

पूर्णशक्तिश्चिदानन्दश्रीतेजस्यष्टमूर्तये ।
ममाभ्यधिकमित्राय नमो नारायणाय ते ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं याज्ञियमन्त्रोपनिषद्भाष्यं समाप्तम् ॥

132

Sl. No. 706 ईशावास्यभाष्यटीका Ms. No. P. 3362/15

Beginning :

श्रीमच्छ्रीशमुखाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान् पातु नो हरिः ॥

ॐ काण्वीं मन्त्रोपनिषदं यथावत् व्याकरिष्यन् भगवानाचार्यवर्यः + + + + देवतास्तुतिनतीः प्रथमं निबध्नाति– नित्येति ॥ + + + + विच्छिन्नविषय × × × × त्वं तावदाद्येन मन्त्रेण सोपपत्तिकं विधत्ते– ईशेति ॥

End :

...॥ पूर्णेति ॥ + + + पूर्णशक्तिचिदानन्दश्रीतेजांस्येव मूर्तिर्यस्येत्युक्ते + + + + अभ्यधिकमित्रं निरतिशयोपकारिपरमप्रीतिविषयं चेति ॥

कमलावदनाम्भोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य याज्ञियमन्त्रोपनिषद्भाष्यस्य विवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

133

Sl. No. 712 ईशावास्योपनिषद्भाष्यटीका Ms.No. C. 2277

Beginning :

हयास्यं व्यासकृष्णौ मां प्राणं वाणीं गुरूनपि ।
प्रणम्य वादिराजाख्ययतिना तदनुग्रहात् ॥
ईशावास्योपनिषदो भाष्यटीकाप्रकाशिका ।
क्रियते ह्रियते दुर्वाग्गर्वान्धतमसं यथा ॥

ईशावास्योपनिषद्भाष्यटीकां चिकीर्षुर्जयतीर्थमुनिः + + + + + मङ्गलमाचरति– यज्ञमिति ॥

End :

॥ अभिप्रतीकस्थमिति ॥ यद्वा कुर्वन्नेवेह कर्माणि इति कर्मानुष्ठानस्योक्तत्वात् कर्मानुष्ठातॄणाञ्च + + + + अग्निप्रार्थनमिति ज्ञातव्यम् ॥

नियुङ्क्ते देहिनो योऽन्तः स्वीयं भुङ्क्ते सुखानि च ।
तदन्ते मुक्तिदस्तं ते भजन्ते चिन्तितार्थकम् ॥
ग्रन्थेनानेन भगवानिन्दिरारमणः प्रभुः ।
नन्दतीर्थमुनेर्बन्धुः स दद्यात्सकलेप्सितान् ॥

Colophon-

इति श्रीमत्कविकुलतिलकश्रीवादिराजयतिपूज्यपादकृता ईशवास्योपनिषट्टीका पदार्थ-दीपिका समाप्ता ॥

134

Sl. No. 713 ईशावास्यटीकाव्याख्या (भावप्रकाशः) Ms. No. C. 64

Beginning :

पद्मालयपतिं पूर्णमतिजयाभिधान् गुरून् ।
नत्वा चेशावास्यभाष्यटीकाभावः प्रकाश्यते ॥

भगवान् टीकाकारः ग्रन्थादौ रमारमणकरुणाकटाक्षेक्षामाशास्ते– श्रीमदिति ॥ + + + + ईशस्येति भाष्ये समासाकरणस्य अभिप्रायमाह– अनेन आवसमिति ॥

End :

अथ समापितयाज्ञीयमन्त्रव्याख्यानोऽपि भगवान् टीकाकारः कमलाकामुकं नतिस्तुतिभ्यां प्रणमति– कमलेति ॥ अनेन भगवती च वन्दिता भवति ।

लोकमातृपतिं कञ्जजातृनातं पितामहम् ।
मृडादिसुरवर्याणामीडे श्रीबादरायणम् ॥

उदकं पायते तेन तमसस्त्रायते जगत् ।
यतोऽसः पात्रमुद्दिष्टं विद्वद्भिः सूर्यमण्डलम् ॥

Colophon:

इति श्रीमत्सत्यव्रतपूज्यपादानां शिष्येण सत्यप्रज्ञभिक्षुणा रचिता याज्ञीयटीकाभावप्रकाशः समाप्तः ॥

135

Sl. No. 714 ईशावास्यटीकाव्याख्या (पञ्चिका) Ms. No. A. 371

Beginning:

रघुनाथो रमानाथं नत्वा व्याकुरुते धियः ।
विशुध्यै काण्वमन्त्रोपनिषद्भाष्यस्य पञ्चिकाम् ॥

ईशावास्यभाष्यं व्याचिकीर्षुः भगवान् टीकाकारो ग्रन्थादौ रमारमणकृपावलोकनप्रार्थनारूपं मङ्गलमाचरति- श्रीमदिति ॥

+ + +

एवं मन्त्रमवतार्य भाष्यमवतारयति- तत्रेति । मन्त्र इत्यर्थः ॥

End:

अखिलभुवन + + भक्तिरूपेति रामानुजानां श्लोके द्राघीयांसस्संहतीस्थेमभाज इत्यन्यात्रापि स्थिताविभियुक्तप्रयोगाच्च । एतच्च स्थेमस्थितिरिति श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां स्पष्टमिति ॥

Colophon:

रघुनाथयतिकृतयाज्ञियमन्त्रभाष्यस्य पञ्चिका समाप्ता ॥

136

Sl. No. 717 ईशावास्यटीकाव्याख्या Ms. No. P. 91/1

Beginning:

प्रणम्य श्रीव्यासमध्वौ हृद्यान्तर्व्यापिमद्गुरून् ।
याज्ञियोपनिषद्भाष्यटीकार्थः संप्रकाश्यते ॥

सौन्दर्यरूपसौरभ्यं लिह्म + + लिह आस्वादन इति धातोर्लिहद्भ्यां आस्वादयितृभ्यामित्यर्थः । + + अष्टमे ईशावास्यादिमन्त्रं व्याख्यायत इति ॥

End :

अथर्षिभ्योऽधिकमित्यत्र स्वलिङ्कमिति (?) ध्येयम् कमला- महालक्ष्मीः ॥

याज्ञियोपनिषद्भाष्यटीकार्थोऽनूदितो मया ।
तेनास्तु ज्ञानदो मह्यं श्रीनिवासो हरिस्सदा ॥

Colophon :

इति श्रीमद्यदुत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिता याज्ञियोपनिषद्भाष्यटिप्पणी समाप्ता ॥

137

Sl. No. 719 ईशावास्यटीकाव्याख्या (भावदीपः) Ms. No. C. 54

Beginning :

श्रीमद्विष्णुपदाम्भोजे वसन्तो रेणवः पराः ।
लक्ष्मीब्रह्मशिवेन्द्रादिवन्दिताः पावयन्तु माम् ॥

अथागणितगुणमणिनिकररमणप्रभापुञ्जनिरस्ताशेषावद्यध्वान्तपरमविचित्रापरिमिता + + + परमार्थसार्थेन भगवता मध्वदेवेन प्रणीतं याज्ञियमन्त्रोपनिषद्भाष्यवरं देवसमूहैरतिदुरवगाहं + + व्याचिख्यासुः भगवान् जयतीर्थमुनिः रमारमणं भगवन्तं प्रार्थयते- श्रीमच्छ्रीवदनेति ॥

End :

अन्तेऽपि परमात्मानं स्तुतिनतिभ्यां प्रीणयति- कमलेति ॥ + + + वन्दिता च सा परब्रह्मविषयरमणीयां विद्यां पूर्णभाग्यञ्च प्रयच्छति महालक्ष्मीः + + + + ।

तच्छिष्याणां कनिष्ठेन नृसिंहाख्येन तुष्टये ।
विष्णोरत्यल्पमतिना कृतेयं भावदीपिका ॥
जयति हरिरचिन्त्यः सर्वदेवैकवन्द्यः
परमगुरुरभीष्टावासिदः सज्जनानाम् ।

निखिलगुणगणार्णो नित्यनिर्मुक्तदोषः
सरसिजनयनो × × श्रीपतिर्मानदो नः ॥

Colophon :

इति श्रीमद्याज्ञियमंत्रोपनिषद्भाष्यस्य टीका दुर्गमवाक्यार्थविवरणं समाप्तम् ॥

138

Sl. No. 720 ईशावास्यटीकाव्याख्या Ms. No. C-2752/1

Beginning -

वेदवेद्यं पूर्णगुणं लक्ष्मीशं मध्ववल्लभम् ।
सर्वयज्ञभुजं यज्ञं श्रीनृसिंहमहं भजे ॥
काण्वमन्त्रे × × × × × भाष्यटीकयोः ।
अस्पष्टवाक्यजातं तत् मया स्पष्टीकरिष्यते ॥

काण्वीं मन्त्रोपनिषदमिति कण्वदृष्टां काण्वशाखासंस्थितां ईशावास्योपनिषदमित्यर्थः । वेदस्य संहिताब्राह्मणारण्यकभेदेन त्रैविध्यात् ॥

End :

॥ क्रमलेति ॥ जगज्जन्मस्थेमहेतवे– जगज्जन्मस्थितिकारणात् स्थिरशब्दात् पृथ्व्यादित्वा-दिमनिच् प्रत्यये स्थिरेति स्थादेशे यस्येत्यकारलोपे स्थेमेति नान्तं रूपं इति ज्ञेयम् ॥

रमाब्रह्मशिवेन्द्रादिदेवतावेदितो विभुः ।
श्रीमध्वजयतीर्थादिपूजितः प्रीयतां मम ॥

Colophon -

ईशावास्यटिप्पणं समाप्तम् ॥

Extra Information :

इतिश्रीमदीशावास्यभाष्यटीका सुपञ्चिका ।
छलारीयनृसिंहस्य कृतिः स्याद्विष्णुतुष्टये ॥

इति ग्रन्थान्ते दृश्यते ॥

139

Sl. No. 724 ईशावास्योपनिषद्वाक्यार्थः Ms. No. P. 446/2

Beginning :

सर्वयज्ञयज इति ॥ ननु या इष्टा विनिष्ठा अधिकृता सैव × × × भवति । अधिकृतत्वं च ग्रन्थप्रतिपाद्यत्वम् । तच्च यज्ञनामकदेवतायाः । तथा च हरेर्वन्द्यत्वमित्यत आह— सर्वयज्ञत्वा यज्ञनाम्न इति ॥ यथोक्तं सुखरूपस्य भोक्तृत्वादिति ॥ अस्यायमर्थः—

End :

अनिलः अमृत इति व्यत्ययेन । विभक्तीति । अनिलामृतपदयोः पुलिङ्गद्वितीयान्तत्व माश्रित्य द्वितीया विभक्तेः प्रथमान्तत्वेन व्यत्ययेन वेत्यर्थः ।

उपनिष [— उपनिषत्पुरुषः ॥

Colophon :

— — —

140

Sl. No. 728 ऊर्ध्वपुण्ड्रोपनिषत् Ms. No. P. 3644/3

Beginning :

अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ । अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिम् । × × × × व्यम् ? कियत् स्थानम् ? का रेखा ? को मन्त्रः ? कः कर्ता ? किं फलम् ? इति च । श्रीवराह उवाच— क्षीराब्धितश्श्वेतद्वीपे क्षीरखण्डान् वैनतेय आनीय सटाभिः द्विदळनश्श्वेतमृत्तिका खण्डमुक्तिसाधिका भवन्ति ॥

End :

यो वेदवित् ब्रह्मचारी गृहस्थो यतिश्च सर्वेभ्यो दुःखेभ्यो मुक्तो भवति । सर्वेषु तीर्थेषु स्नातो भवति । अश्रोत्रियः श्रोत्रियो भवति । अनुपनीतोप्युपनीतो भवति । आचक्षुषः

पंक्ति पुनाति । न च पुनरावर्तते ; न पुनरावर्तते । इत्याह भगवान् वराहरूपी । य एवं वेद इत्युपनिषत् ॥

Colophon :

वराहोपनिषत् समाप्ता ॥

141

Sl. No. 731 ऊर्ध्वपुण्ड्रोपनिषत् Ms. No. P. 4546/2

Beginning :

भद्रं कर्णेभिः ॥ ऋक् । स्वस्ति न इन्द्रो वृद्ध + + । शान्तिश्शान्तिश्शान्तिः ॥ नमस्कृत्य भगवन्तं नारदः सर्वेश्वरं वासुदेवं पप्रच्छ— श्रीभगवन् ऊर्ध्वपुण्ड्रविधिं द्रव्यमन्त्र-स्थानादिसहितं मे ब्रूहीति । तँ होवाच— भगवन् वासुदेवो वैकुण्टस्थः ॥

End :

स सर्वैर्देवैः पूज्यो भवति । नारायणे मय्यचला भक्तिबन्धश्च वर्धते । सम्यज्ज्ञानं लब्ध्वा विष्णुसायुज्यमाप्नोति । न च पुनरावर्तते । तद्विष्णोः परमं पदं + + यत्परमं पदम् । सह नाववतु । भद्रं कर्णेभिः । स्वस्तिन इन्द्रः । शान्तिश्शान्तिश्शान्तिः ॥

Colophon :

— — —

142

Sl. No. 732 ऊर्ध्वपुण्ड्रोपनिषत् Ms. No. B. 126-927/2

Beginning :

अथ प्रणिपत्य नारदो ब्रह्माणमन्वयुङ्क्त । अधीहि भगवो मे । किं पवित्राणां पवित्रम् ? केन वा कर्माणि सफलानि ? किं दुश्चरं तपो मर्त्यानाम् ? केन सुकरेणा-मृतत्वमेति ? स होवाच— साधु तेऽनुयोगः । शृणु भो पवित्रं सुलभं सुकरम् । यद्विष्णु-क्षेत्रं तत्र मृत्स्नां श्वेतामुद्धृताऽसीत्युद्धरेत् । अमृतमेव श्वेतमृत्स्ना भवति ॥

End :

एवं विदित्वा यो धारयति स वैदिको भवति स सर्वकर्मार्हो भवति । एतेन तेजस्वी ब्रह्मवर्चस्वी भवति । कायिकात् पापात्पूतो भवति । स विष्णुसायुज्यमाप्नोति । य एवं वेदेत्युपनिषत् ॥

Colophon :

ऊर्ध्वपुण्ड्रोपनिषत् समाप्ता ॥

143

Sl. No. 733 **एकाक्षरोपनिषत्** Ms. No. P. 3581/18

Beginning :

॥ सहनाववत्विति शान्तिः ॥

एकाक्षरं त्वक्षरेत्रास्ति सोमे
सुषुम्नायां चेह दृढी न एकः ।
त्वं विश्वभूर्भूतपतिः पुराणः
पर्जन्य एको भुवनस्य गोप्ता ॥ १ ॥

End :

त्वं भूर्भुवः स्वस्त्वं हि स्वयम्भूरथ विश्वतोमुखः । य एवं नित्यं वेदयते गुहाशयं प्रभुं पुराणं सर्वभूतं हिरण्मयम् । हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठति । ॐ तत्सत् ॥

Colophon :

इत्येकाक्षरोपनिषत् समाप्ता ॥

144

Sl. No. 739 **एकाक्षरोपनिषद्भाष्यम्** Ms. No. B. 247/30

Beginning :

यत्रोङ्कारात्मकं प्रोक्तं ब्रह्मनामैकमक्षरम् ।
एकाक्षरोपनिषदं व्याख्यास्ये सर्वगर्भिताम् ॥

अक्षरे अविनाशिनि परस्मिन् ब्रह्मणि तन्नामधेयत्वेन यदेकाक्षरमस्ति तत्प्रणवाख्यमक्षरं चन्द्रेऽस्ति ॥

End -

यद्यपि कर्मेन्द्रियज्ञानेन्द्रियविषयत्वेन नामरूपयोः तारतम्यमस्त्येव; तथापि नाम्न एव चक्षुःप्रवर्तकत्वात् प्रवर्त्यापेक्षया प्रवर्तकस्याधिक्याच्च नाम्न एव आधिक्यसिद्धिः। + + + +

तस्मात् एकाक्षरप्रणवोपासनमेव वरमित्यवगन्तव्यम् ॥

Colophon :

इति एकाक्षरोपनिषद्भाष्यं समाप्तम् ॥

145

Sl. No. 742 ऐतरेयोपनिषत् Ms. No. P. 1958/9

Beginning :

आत्मा वा इदमेक एवाग्र आसीत्; नान्यत् किञ्चन मिषत् स ईक्षत लोकान्नु सृजा इति ॥ १ ॥ स इमान् लोकानसृजत। अम्भो मरीचीर्मरमापोऽदोम्भःपरेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः। पृथिवी मरो या अधस्तात्ता आपः ॥

End :

स एतेन प्रज्ञेनात्मना अस्माल्लोकादुत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा अमृतः समभवत् समभवत्; इत्योम् ॥

Colophon :

इति ऐतरेयोपनिषत् समाप्ता ॥

146

Sl. No. 775 ऐतरेयभाष्यटीका Ms. No P. 3446/9

Beginning :

× × × त ईश्वरानुग्रहात्पुनः।
पृथिव्यादीनि भूतानि यथाशास्त्रं व्यचारयत् ॥ १९ ।

परमात्मन उत्पन्नं जगदात्मैव नेतरत् ।
मृदो जाता घटा यद्वन्मृद्रूस्त्वेव तथेष्यताम् ॥
पटश्शराव इत्यादिविकाराणां मृदः पृथक् ।
तत्वान्नास्ति प्रतीतेस्तु नामरूपे प्रकल्पिते ॥

End :

जीवन्नेव स्थितप्रज्ञो मुक्तस्स्याद्वामदेववत् ।
म्रियतां यत्र तत्रास्य वपुस्सोऽयं न जायते ॥ १०८ ॥
ऐतरेयब्रह्मविद्या व्याख्याता संग्रहादिमाम् ।
सुस्थिरामनुगृह्णातु विद्यातीर्थमहेश्वरः ॥

Colophon :

इति ऐतरेयभाष्यटीका ॥

147

Sl. No. 776 ऐतरेयोपनिषद्भाष्यम् Ms. No. C. 1500/3

Beginning :

आत्मा वा इदमित्यादिना केवलात्मविद्यारम्भस्यावसरं वक्तुं वृत्तं कीर्तयति– परिसमाप्त-मिति ॥ तत्परिसमाप्तिः कथं गम्यत इत्याशङ्क्य तत्फलोपसंहारादित्याह– सैषेति ॥ परा गतिः परं गन्तव्यफलमित्यर्थः ॥

End :

विद्योत्पत्तेरूर्ध्वं असंभावनाविपरीतभावनोत्पादकविघ्नाः परिह्रियन्ते । अवतु वक्तारमित्य-स्यार्थः अध्यायपरिसमाप्त्यर्थः ; द्वितीयारण्यपरिसमाप्त्यर्थश्च ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्येन्द्रपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वती-विरचिता ऐतरेयभाष्यटीका समाप्ता ॥

148

Sl. No. 779 ऐतरेयोपनिषद्व्याख्या Ms. No. P. 1632/2

Beginning :

इत्थमध्यायत्रयेण प्राणविद्या प्रपञ्चिता । तावता ब्रह्मविद्यायां पुरुषस्य सुखाधिकारः सम्पन्नः । कर्मकाण्डोक्तकर्मभिः + + + + + + उपदेष्टुं आदौ तत्त्वं सङ्ग्रहेण सूचयति । आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषदिति ॥

End ;

विद्योत्पत्तेः ऊर्ध्वमसम्भावनाविपरीतभावनोत्पादका विघ्नाः परिह्रियन्ते । अवतु वक्तारं इत्यभ्यासो अध्यायपरिसमाप्त्यर्थः । द्वितीयारण्यकपरिसमाप्त्यर्थश्च ॥

Colophon :

इति विद्यारण्यकृता आत्मषट्कदीपिका समाप्ता ॥

149

Sl. No. 785 ऐतरेयोपनिषद्भाष्यम् Ms. No. B. 246/8

Beginning :

भद्रं कर्णेभिरिति शान्तिः । भद्रं वो अभिवादय मनः ॥

अखण्डानन्दबोधाब्धिं नत्वा श्रीसुन्दरेश्वरम् ।
ऐतरेयोपनिषदो भाष्यं विरचयाम्यहम् ॥

आत्मा वा इदमेक एवाग्र आसीदित्येवमाद्यायामस्यामुपनिषदि अम्भो मरीचीर्मरमाप इत्यादिना जगदुत्पत्तिः । यथाण्डनुखाद्वाचोऽग्निरित्यादिना संसारोत्पत्तिश्चावगम्यते ॥

End :

स सम्यग्ज्ञान्यखण्डाकारवृत्त्युपेतस्सन् एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्येत्यादिव्याख्यातम् । अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा अमृतः समभवत् अमृतः समभवदिति द्विर्वचनं उपनिषत्समाप्तिद्योतनार्थम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ ऐतरेयोपनिषद्भाष्यं समाप्तम् ॥

150

Sl. No. 790 ऐतरेयोपनिषद्भाष्यव्याख्या (भाष्यार्थरत्नमाला) Ms. No. P. 4026

Beginning :

श्रीमदानन्दतीर्थार्यहृदयामलमन्दिरम् ।
जानकीजानिमानन्दसान्द्रं वन्दे निरञ्जनम् ॥
\+ + +
महैतरेयभाष्यस्य गुरूक्तार्थोऽनुवर्ण्यते ।
टीकास्पष्टः सङ्ग्रहेण कृपां कुर्वन्तु सज्जनाः ॥

अथ भगवान् सर्वज्ञमुनिः एष पन्था इत्यादौ अधिकृतं विशिष्टमिष्टं नारायणं ग्रन्थादावुपश्लोकयन् शरणं प्रार्थयते— नारायणमिति ॥

End :

॥ तथा चेति ॥ ब्रह्ममीमांसाया बादरायणोपज्ञत्वस्य प्रसिद्धत्वात्तत्र बादरायणग्रहणम् । यथा सर्व × × × × द्योतकं तथेत्यर्थः ॥

Colophon :

इति श्रीमद्विट्ठलाचार्यपुत्रेण श्रीमत्तीर्थाचार्यचरणसेविना श्रीनिवासेन विरचितायां श्रीमन्महैतरेयोपनिषद्भाष्यार्थरत्नमालायां प्रथमप्रपञ्चकः पर्यवसितः ॥

151

Sl. No. 792 ऐतरेयोपनिषद्भाष्यव्याख्या Ms. No. P. 5724

Beginning -

श्रीमदानन्दतीर्थार्यहृदयामलमन्दिरम् ।
जानकीजानिमानन्दसान्द्रं वन्दे निरञ्जनम् ॥
\+ + +
महैतरेयभाष्यस्य गुरूक्तोऽर्थोऽनुवर्ण्यते ।
टीकास्पष्टः सङ्ग्रहणे कृपां कुर्वन्तु सज्जनाः ॥

अथ भगवान् सर्वज्ञमुनिः एष पन्था इत्यादावधिकृतं + + + नारायणं +
प्रार्थयते— नारायणमिति ॥

End :

गुणपूर्तिसम्भावनाय सर्वंकृतित्वं चोक्तगुणेश्चानन्दस्य फलरूपत्वात् + + + +
अनुभूयमानानन्दस्योच्चताहेतुत्वाद्वा ज्ञानस्य पृथगुक्तिरिति सर्वमवदातमिति अशेषमतिमङ्गलम् ॥

श्रीमध्वहृत्पङ्कज + + । + गुरवोऽपयन्तु ॥

विठलार्यसुपुत्रेण श्रीमत्तीर्थार्यसेविना ।

श्रीनिवासेन रचिता रत्नमालाऽतिनिर्मला ॥

Colophon :

इति श्रीमद्विठलाचार्यपुत्रेण श्रीमत्तीर्थाचार्यचरणसेविना श्रीनिवासेन रचितायां महैतरेय-भाष्यार्थरत्नमालायां द्वितीयप्रघट्टकेऽष्टमोऽध्याय: ॥

152

Sl. No. 798 ऐतरेयोपनिषद्भाष्यविवरणम् Ms. No. C. 1048

Beginning :

यस्यागात् त्रिविधा प्रजा निरवभाक् यस्याश्रयान्मुक्तिभाक्

य: क्षेत्रे प्रपदं प्रपद्य रमते यत्सृष्टमेतज्जगत् ।

या चाप्यामरवल्लभा जगति य: ख्यात: शतर्च्यादिना

नाम्ना पञ्चविधापि योनिजभिदा राहित्यवान् विस्तृत: ॥

+ + + + +

महाभूत्यर्थग्रहणाय भाष्यविवृतौ यत्नं वयं कुर्महे ॥ + + +

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां + + + अनुग्रहाय ऐतरेयोपनिषदं यथावद्व्या-ख्यातुकाम: श्रीमत्पूर्णप्रज्ञाचार्य: + + + इष्टदेवतां प्रणमति— नारायणमिति ॥

End :

भक्त्यतिशयेन पुनरपि भगवन्तं प्रणमति— पूर्णेति ॥ + + +

आचार्यवाचामभिसन्धिसिद्धा-

नामर्त्यसङ्घा अपि वक्तुमीशा: ।

यथावबोधाभिहितार्थभाष्ये-

ऽप्यस्मासु सन्त: करुणां क्रियासु: ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भाष्यविवरणे विश्वेश-तीर्थविरचिते × × मोऽध्यायः । समाप्तश्चायं ग्रन्थः ॥

153

Sl. No. 808 ऐतरेयोपनिषत्खण्डार्थः Ms No. P. 4838/1

Beginning :

एष नारायणो देवो वासुदेवादिरूपवान् ।
महिदासो महाभूतिः प्राणेशो भूतिदो भवेत् ॥
श्रीमदानन्दतीर्थार्यान् जयतीर्थादिसद्गुरून् ।
प्रणमामि महाभाग्यान् राघवेन्द्रगुरून् सदा ॥
महैतरेयखण्डार्थो व्यासतीर्थादिभिर्लघुः ।
सङ्गृहीतः स एवार्थो विस्तराल्लिख्यते मया ॥

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तदुपायमजानतां अधिकारिणामनुग्राहाय ऐतरेयाख्य-भगवता दृष्टायां + + + महाविभूत्याख्यायाः + + + अस्या उपनिषदः ऐतरेय एव ऋषिः ॥

End :

तस्मात् भगवान् विष्णुः सर्ववेदप्रतिपाद्यत्वेन + + + सर्वैरधिकारिभिः सर्वद ध्येयो ज्ञेयश्चेति सिद्धम् । + + + +

रुद्रादिसर्वदेवेषु मुख्यप्राणस्थिताय च ।
महैतरेयरूपश्रीकृष्णाय स्वामिने नमः ॥
महैतरेयखण्डार्थसङ्ग्रहात्प्राणनायकः ।
महाविभूतिमध्वार्यो हृदन्तस्थः प्रसीदताम् ॥
ज्ञानतोऽज्ञानतो वाऽपि खण्डार्थस्य च सङ्ग्रहात् ।
दोषदृष्टिर्न कार्याऽत्र पण्डितैर्दोषवर्जितैः ॥

आचार्योक्तार्थकथनटीकाकर्तृत्वसङ्ग्रहात् ।
विशेषेण बुधाः सर्वे दयां कुर्वन्तु सज्जनाः ॥

Colophon :

इति श्रीमन्मैतरेयोपनिषत्खण्डार्थसङ्ग्रहे कृष्णाचार्यकृते तृतीयप्रघट्टके द्वितीयोऽध्यायः ॥

154

Sl. No. 811 — कठरुद्रोपनिषत् — Ms. No. P. 4136/19

Beginning :

ॐ सह नाववत्विति शान्तिः ॥ देवा ह वै भगवन्तमब्रुवन् । अधीहि भगवन् ब्रह्मविद्याम् । स प्रजापतिरब्रवीत् । सशिखान् केशान् निष्कृष्य(त्य) विसृज्य यज्ञोपवीतं निष्कृष्य(त्य) पुत्रं दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञः त्वं वषट्कारः त्वमोङ्कारस्त्वं स्वाहाकारः त्वं स्वधा त्वं धाता विधाता इति । अथ पुत्रो वदति ॥

End :

अन्तःकरणसम्बन्धात्प्रमातेत्यभिधीयये ।
तथा तद्वृत्तिसम्बन्धात्प्रमाणमिति कथ्यते ॥
अज्ञातमपि चैतन्यं प्रमेयमिति कथ्यते ।
तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते ॥
सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत्सुधीः ।
एवं यो वेद तत्त्वेन ब्रह्मभूयाय कल्पते ॥
सर्ववेदान्तसिद्धान्तसारं वच्मि यथार्थतः ।
स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते ॥

इत्युपनिषत् ॥ सह नाववत्विति शान्तिः ॥

Colophon :

कठोपनिषत्समाप्ता ॥

155

Sl. No. 816 **कठोपनिषद्भाष्यम्** Ms. No. B. 247/43

Beginning :

चैतन्यमेकमपि सप्तविधं ययोक्तं
सम्यग्विचार्य निरुपाधिकमाद्यमेकम् ।
ध्यायन् विमुक्तिफलमेति न संशयोऽत्रे-
त्येनां कठोपनिषदं विवृणोमि साध्वीम् ॥

नन्विह सशिखान् केशान् निष्कृष्य पुत्रं दृष्ट्वा त्वं ब्रह्मेत्यादि वदेत् । अथ पुत्रो वदत्यहं ब्रह्मेत्याद्युक्तम् । नैवं सन्यासस्वीकारविधिरुपपद्यते ॥

End :

स्वयं मृत्वा स्वयम्भूत्वेत्यात्मनः परस्यावशिष्यमाणस्य जननमरणवचनं जीवजननमरणयोरपि स्वस्य साक्षित्वेन सर्वदावस्थानाभिप्रायं मन्तव्यम् ॥

Colophon :

इति कठोपनिषद्भाष्यं समाप्तम् ॥

156

Sl. No. 820 **कठवल्युपनिषत्** Ms. No. P. 1682/3

Beginning :

स वा एष महानजः अयमात्मा अन्नादो वसुदानो विन्दते वसु । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

End :

सर्वं पूर्णं सहोत्तरवाक्यं श्रीमते नारायणाय नमः वेदोऽयं ब्रह्मा विदुः देवानाम × × × × वेदितव्यं य एवं वेदेत्युपनिषत् ॥

Colophon :

समाप्तोऽयं कठवल्लीखण्डः ॥

157

Sl. No. 821 **कठोपनिषद्** Ms. No. P. 1958/4

Beginning :

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥
तँ ह कुमारँ सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यत ॥ २ ॥

पीतोदका जग्धतृणाः दुग्धदोहा निरिन्द्रियाः ॥
अनन्दा नाम ते लोकाः तान् स गच्छति ता ददत् ॥ ३ ॥

End :

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् ।
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युः अन्योऽप्येवं यो विदध्यात्ममेव ॥

Colophon-

इति कठोपनिषत् ॥

158

Sl. No. 854 **कठोपनिषद्भाष्यम्** Ms. No. B. 245/3A

Beginning :

प्रणम्य करणैश्श्रीमत्सुन्दरेश्वरसद्गुरुम् ।
काठकोपनिषद्वल्लीर्व्याख्यास्ये ग्रन्थसङ्ग्रहात् ॥

॥ उशन् कामयमानः ॥ ह वै इति वृत्तार्थस्मरणार्थौ निपातौ । वाजमन्नं तद्दानादि-निमित्तं श्रवो यशो यस्य स वाजश्रवाः ॥

End :

एवं नचिकेतवत् यो अन्यः पुमानध्यात्मं कार्यकारणसङ्घातादुपरि स्वयं विद्योतमानं परमात्मनं वित् विद्यात् सोऽपि ब्रह्म प्राप्तो भवतीति वाक्यशेषः । शिष्याचार्ययोर्विद्याङ्गत्वेन शान्तिरुच्यते– सह नाववतु स जीवेश्वरातीतः + + सर्वकल्मषप्रशमनार्थं ओमिति मङ्गळार्थ-मिति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ कठवल्ल्युपनिषद्भाष्ये द्वितीया-ध्यायस्य तृतीया वल्ली समाप्ता ॥

159

Sl. No. 864 कठोपनिषद्भाष्यटीका (पदार्थकौमुदी) Ms. No. P. 91/4

Beginning :

प्रणम्य वामनं देवं श्रियं मध्वगुरूंस्तथा ।
काठकोपनिषद्भाष्यव्याख्यानं क्रियते मया ॥

इह हि विषयविरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः आत्यन्तिकानिष्टनिवृत्तीष्टप्राप्ति-
+ + + काठकोपनिषदं यथावद्व्याचिख्यासुः + + + ॥

End :

× × × × न्दतीर्थर्यहृत्पद्म जगतो हरिः ।
निर्दोषो गुणसम्पूर्णः प्रीयतामिन्दिरापतिः ॥
प्रीतस्स भगवान् विष्णु × × × × ।
× × × × × न मह्यं किञ्चिदप्यृतम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य काठकोपनिषद्भाष्यस्य टीकायां व्यासतीर्थ-
पूज्यपादशिष्यवेदेशभिक्षुविरचितायां पदार्थकौमुद्यां द्वितीयोऽध्यायः ॥

160

Sl. No. 875 कलिसन्तारणोपनिषद्भाष्यम् Ms. No. A. 167/32

Beginning :

यन्नोपायः कलिं तर्तुं मुक्तष्पोडशनामतः ।
नारायणस्य व्याख्यास्ये कलिसन्तारणश्रुतिम् ॥

द्वापरान्त इति ॥

End :

यदाऽस्य षोडशकस्य नाम्नः सार्धकोटिं रामनाम्नां षट्कोटिं कृष्णनाम्नां षट्कोटिं हरिनाम्नां
द्वादशकोटिं + + चेत्येवं चतुर्विंशतिकोटिनाम्नां जपेन ब्रह्महत्यादिकं तरतीत्यादि स्पष्टार्थम् ।
सद्योमुक्त्यभिधानं तु परब्रह्मप्रकाशद्वारेणेत्यभिप्रायः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ कलिसन्तारणोपनिषद्भाष्यं समाप्तम् ॥

161

Sl. No. 880 **कालाग्निरुद्रोपनिषत्** Ms. No. P. 667/2

Beginning :

ॐ अथ कालाग्निरुद्रं भगवन्तं परमेष्ठिनं सनत्कुमारः पप्रच्छ । अधीहि भगवन् त्रिपुण्ड्र् सतत्वं ; किं द्रव्यं ? किं स्थानम् ? कति प्रमाणम् ? का रेखाः ? के मन्त्राः ? का शक्तिः ? किं दैवतम् ? कः कर्ता ? किं फलम् ? इति च ॥

End:

एवं त्रिपुण्ड्रविधिं भस्मना करोति यः + + + स सर्वान् वेदानधीतो भवति + + + सर्वेपि प्रवरहितप्रज्ञानघनः प्रत्यगर्थो ब्रह्माहमस्मीति ॥

Colophon :

— — — —

162

Sl. No. 902 **कालाग्निरुद्रोपनिषद्भाष्यम्** Ms. No. A. 136/36

Beginning :

माहात्म्यं भस्मनो यत्र प्रोच्यते क्रममुक्तये ।
कालाग्निरुद्रोपनिषद्भाष्यमारभ्यतेऽधुना ॥

अथेति मङ्गलार्थश्शब्दः । कालाग्निरुद्रोपनिषत् संवर्तक इति यः प्रळयकालभवोऽभि-स्तन्मयस्य रुद्रस्य जगत्संहर्तुर्योपनिषत्तस्यास्संवर्तकः प्रवर्तकोऽग्निः ऋषिः । स्पष्टमन्यत् ॥

End :

अत्रोच्यते— न हि भस्मधारणहीनस्योपनिषदध्ययनाधिकारोऽस्ति ; अतस्तत्कर्तावश्यकमेव ।(?) अर्थवादाभिप्रायेण तदध्ययनस्य फलमुक्तम् । वाकारश्चैतमर्थमवगमयति । तस्मादनवद्यम् ॥ ।

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ कालाग्निरुद्रोपनिषद्भाष्यं समाप्तम् ।

163

Sl. No. 904 **कालिकोपनिषत्** Ms. No. P. 5795/3

Beginning :

अथ अथर्वणे सौभाग्यकाण्डे कालिकोपनिषल्लिख्यते–

अथ हैनं ब्रह्मरन्ध्रे ब्रह्मरूपिणीमाप्नोति सुभगां त्रिगुणितां मुक्तासुभगां कामरेफेन्दिरा-समष्टिरूपिणीं एतानि त्रिगुणितानि । तदनु कूर्चद्वयम् व्योमषष्ठस्वरां + + + + दक्षिणे कालिके चेत्यभिमुखगतां तदनु बीजसप्तकमुच्चार्य बृहद्भानुजायामुच्चरेत् ॥

End :

ओं ओओं सत्यं नान्यप्रकारेण सिद्धिर्भवतीति कालिकामनोर्वा तारामनोर्वा त्रिपुरामनोर्वा सर्वस्य दुर्गामनोर्वेत्यों शिवम् ॥

Colophon :

इत्याथर्वणसौभाग्यकाण्डे कालिकोपनिषत्समाप्ता ॥

164

Sl. No. 905 **कालिकोपनिषत्** Ms. No. C. 3596

Beginning :

॥ श्रीः ॥ सह नाववतु + + + ॐ शान्तिः । अथ हैनां ब्रह्मरन्ध्रे ब्रह्मरूपिणीं मा × × ×: × तिसुभगां चिद्गुणितोक्तां सुभगां कामरूपैन्दिराश्लिष्टरूपिणीं एतानि त्रिगुणितानि । तदनु कूर्चद्वयम् ॥

End :

निरुपद्रवे एकाकी शिवगेहे लक्षं तदर्धं जपित्वा देयं ॐ ॐ सत्यं नान्यस्य प्रकारेण सिद्धिर्भवतीति कालिकामनोर्वा तारामनोर्वा त्रिपुरामनोर्वा सर्वांशे दुर्गामनोर्वान्यो वा शिवम् ॥

Colophon :

इत्याथर्वणे सौभाग्यकाण्डे कालिकोपनिषत्समाप्ता ॥

156

Sl. No. 906 **कालिकोपनिषत्** Ms. No. C. 3600

Beginning :

ॐ अथ हैनां ब्रह्मरन्ध्रे ब्रह्मरूपिणीं आप्नोति सुभगाम् । सुभगाबीजमाह कामः ककाररेफ इन्दिरासमष्टिरूपिणीं एतत्त्रिगुणितामादौ कृत्वा तदनु कूर्चद्वयम् ॥

End :

तासां तु समतावेदागुप्तसाधनसाधने ।
या सा विद्या महाचण्डा तास्तामेकविधिस्स्मृतः ॥
महाचीनक्रमेणैव छिन्नमस्ताविधिस्स्मृतः ।
× तिस्तत्र न कर्तव्या सिद्धिहानिस्तु जायते ।
विशुद्धचित्तोऽत्र भवेत् सिद्धिः स्यादपरं तथा ॥

Colophon :

इत्याथर्वणे कालिकोपनिषत्समाप्ता ॥

166

Sl. No. 908 **कुण्डल्युपनिषत्** Ms. No. P. 5002/8

Beginning :

अथातो धर्मजिज्ञासा । अथातो ब्रह्म जिज्ञासा । ज्ञानं बुद्धिश्च । ज्ञानं मोक्षकारणम् । मोक्षस्य सर्वात्मबुद्धेः । पञ्चविषयप्रपञ्चं तेषां दशज्ञानस्वरूपम् । त्यागो मोक्षः । अधर्मकारणं ; ज्ञानमेव । ज्ञानं ; प्रपञ्चेश्वरः ।

End :

अथ सिद्धिर्भवति इत्याज्ञा परमेश्वरी । बस्याचारविहीनोऽपि बदीये ते उपेक्षकः । यदि ज्येष्ठैरेव मन्येत दीव्येते नन्दने वने । दीव्येते नन्दने वने ॥

Colophon :

इति कुण्डल्युपनिषत् समाप्ता ॥

167

Sl. No. 909 **कुण्डिकोपनिषत्** Ms. No. B. 247/34

Beginning :

ॐ आप्ययन्त्विति शान्तिः ।

ब्रह्मचर्याश्रमे क्षीणे गुरुशुश्रूषणे रतः ।
वेदानधीत्यानुज्ञात उच्यते गुरुणाऽऽश्रमी ॥
ब्राह्मीमिष्टिं यजेत्तासां अहोरात्रेण निर्वपेत् ।
संविभज्य सुतानर्थे ग्राम्यकामान् विसृज्य च ॥

End :

स्वमेव सर्वतः पश्यन् मन्यमानः स्वमद्वयम् ।
स्वानन्दमनुभुञ्जानो निर्विकल्पो भवाम्यहम् ॥
गच्छंस्तिष्ठन्नुपविशन् शयानो वान्यथापि वा ।
यथेच्छया वसेद्विद्वान् आत्मारामः सदा मुनिः ॥

इत्युपनिषत् ॥

Colophon :

— — —

168

Sl. No. 913 **कुण्डिकोपनिषद्भाष्यम्** Ms. No. B. 247/34

Beginning :

चतुरो ब्रह्मचर्यादीनाश्रमान् गच्छतः क्रमात् ।
आत्मनिष्ठोच्यते यत्र व्याख्यास्ये कुण्डिकां श्रुतिम् ॥

वानप्रस्थाश्रमे विहितैः कन्दमूलकैः स्वशरीरे क्षुद्बाधां समाप्य अथैदशाहारैः कालक्षेपो समाभून् इति + + + + नाश्रु पातयेत् । + + + + त्यक्तगृहस्थाश्रमः सद्य एव सन्यस्तुमर्हतीत्यभिप्रायः ॥

End :

तस्मात् न कथञ्चनास्य विधिप्रतिषेधाभावेप्यगम्यागमनभक्ष्याभक्ष्यविभागशास्त्रोल्लङ्घनादि-लोकशास्त्रविरुद्धाचारप्रसक्तिः ॥

Colophon :

इति अप्पयदीक्षिताचार्यकृतिषु कुण्डिकोपनिषद्भाष्यं समाप्तम् ॥

169

Sl. No. 914 **कुण्डिकोपनिषद्भाष्यम्** Ms. No. B. 428/2

Beginning -

चतुरो ब्रह्मचर्यादीनाश्रमान् गच्छतः क्रमात् ।
आत्मनिष्ठोच्यते यत्र व्याख्यास्ये कुण्डिकाश्रुतिम् ॥

वानप्रस्थाश्रमे विहितैः कन्दमूलकैः स्वशरीरे क्षुद्बाधां समाप्य अथेदशाहारैः कालक्षेपो ममाभूत् इति + + + + नाश्रु पातयेत् । + + + + त्यक्तगृहस्थाश्रमः सद्य एव सन्यस्तुमर्हतीत्यभिप्रायः ॥

End .

अयं तु सदा मुनिः मौनशीलः ब्रह्मैकमननशीलो वा भवति । तस्मान्न कथञ्चनास्य विधिप्रतिषेधाभावेऽप्यगम्यागमनभक्ष्याभक्ष्यविभागशास्त्रोल्लङ्घनादिलोकशास्त्रविरुद्धाचारप्रसक्तिः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षितरचार्यकृतिषु कुंडिकोपनिषद्भाष्यं समाप्तम् ॥

170

Sl. No. 916 **कूचिरुद्रोपनिषत्** Ms. No. P. 7348

Beginning :

ॐ सहनाववतु + + शान्तिः शान्तिः शान्तिः ।

अणोरणीयान्महतो महीया-
नात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुप्रसादान्महिमानमीशम् ॥

End :

मधु मनिष्ये मधु जनिष्ये मधु जनिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ + + + शान्तिः ॥

Colophon :

इति कूचिरुद्रं समाप्तम् ॥

171

Sl. No. 917 **कृष्णोपनिषत्** Ms. No. 2367/4

Beginning :

भद्रं कर्णेभिः शृणुयाम देवाः + + शान्तिश्शान्तिश्शान्तिः । ॐ श्रीमहाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो घनवासिन्यो(नो) विस्मिता बभूवुः । तं होचुः— नोवद्यमवतारान्वै गण्यन्ते ; आलिङ्गामो भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ । अन्ये येऽवतारास्ते हि गोपा न स्त्रीश्च नो कुरु ॥

End :

तदेतद्दिवा अधीयमानो(यानो) रात्रिकृतं पापं नाशयति । नक्तमधीयानो दिवसकृतं पापं नाशयति । तदेतद्वेदान्तरहस्यम् । तदेतदुपनिषदां रहस्यम् । एतदधीयानः सर्वक्रतुफलं लभते ; शान्तिमेति ; मनश्शुद्धिमेति ; सत्तीर्थफलं लभते ; य एवं वेद ; देहबन्धाद्विमुच्यते ; इत्युपनिषत् ॥

Colophon :

कृष्णोपनिषत्समाप्ता ॥

172

Sl. No. 918 **गोपालोपनिषत्** Ms. No. P. 5360/3

Beginning :

भद्रं कर्णेभिः + + + शान्तिः ।

श्रीमहाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुः । तं होचुर्नो ह्यमवतारान्वै गण्यन्ते । आलिङ्गामो भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ । अन्ये येऽवतारास्ते हि गोपा न स्त्रीश्च नो कुरु ॥

End :

तस्माद्भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ।
भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम् ॥

इत्युपनिषत् ॥ भद्रं कर्णेभिः + + + शान्तिः ॥

Colophon :

इति गोपालोपनिषत् ॥

173

Sl. No. 920 | कृष्णोपनिषत् | Ms. No. C. 3682/66

Beginning :

यो रामः कृष्णतामेत्य सार्वात्म्यं प्राप्य लीलया ।
अतोषयद्देवमौनिपटलं तं नतोऽस्म्यहम् ॥

ॐ भद्रं कर्णेभिरिति शान्तिः । श्रीमहन्महाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुः । तं होचुर्नोवद्यमवतारान्वै गण्यन्ते आलिङ्गामो भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ ; अन्ये येऽवतारास्ते हि गोपा न स्त्रीश्च नो कुरु ॥

End :

अठनकाण्डं जगद्बीजं धृतं पाणौ स्वलीलया ।
गरुडो वटभाण्डीरस्सुदामा नारदो मुनिः ॥
वृन्दा भक्तिः क्रिया बुद्धिः सर्वजन्तुप्रकाशिनी ।
तस्मान्न भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ॥
भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम् ॥

Colophon :

इति कृष्णोपनिषत्समाप्ता ॥

174

Sl. No. 921 | कृष्णोपनिषद्भाष्यम् | Ms. No. A. 167/24

Beginning :

कृष्णावतारे मां यूयं भूत्वाऽलिङ्गथ गोपिकाः ।
इति श्रीरामवचनं श्रुत्वा सन्तुष्टमानसैः ॥
रुद्रादिमुनिभिर्यस्यां कृष्णतत्त्वं विशेषतः ।
प्रपञ्च्यते तां व्याख्यास्ये कृष्णोपनिषदं पराम् ॥

श्रीमहाविष्णुमिति ॥ महाविष्ण्वंशभूतम् । सच्चिदानन्दलक्षणं सर्वाङ्गसुन्दरमित्याभ्यां विशेषणाभ्यां सगुणनिर्गुणोभयात्मकत्वं विवक्षितम् ॥

End :

य एवं पूर्वोक्तप्रकारेण वेद– विदितवान् स देहबन्धात्– स्थूलसूक्ष्मकारणाख्यदेहत्रय-संयोगाद्विमुच्यते । विशेषेण सत्यत्वेन प्रातिभासिकत्वेन व्यावहारिकत्वेन च मोक्षं गच्छति । इत्युपनिषत् ॥

Colophon :

द्वितीयः खण्डः ॥ इत्यप्पयदीक्षिताचार्यकृतौ कृष्णोपनिषद्भाष्यं समाप्तम् ॥

175

Sl. No. 956 तलवकारोपनिषद्भाष्यव्याख्या Ms. No. C. 2502/10

Beginning :

प्रयत्नाद्यन्तरेणैव मन आदिप्रवर्तकम् ।
विदितान्यत्वसिद्धं ब्रह्माहमहमद्वयम ॥ १ ॥

केनेपितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदभाष्यव्याख्ययापि न तुतोष भाष्यकारः। शारीरकैर्न्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानैः श्रुत्यर्थसङ्ग्राहकैर्वाक्यैर्व्याचिख्यासुः पूर्वकाण्डेन सम्बन्धमभिधित्सुः पूर्वकाण्डार्थं सङ्क्षेपतो दर्शयति– समाप्तमिति ॥

कर्मणामात्मभूतः प्राणस्तस्य शुद्धत्वादिगुणविशिष्टस्य उपासनं पूर्वत्रातिवृत्तम् । कर्म च नित्यनैमित्तिकाद्यनेकप्रकारमविदुषामतिक्रान्तमित्यर्थः ॥ २ ॥

End :

ब्रह्मेति वेदः । तन्मूलत्वात्तदाश्रया ॥ २०-२२ ॥ तव आदीनि वेदाङ्गानि अन्ते यस्याः ॥ २३ ॥

सत्यकामस्स्वयंसिद्धस्सर्वेशो यस्स्वशक्तितः ।
स एवान्तःप्रविष्टोऽहमुपास्यः सर्वदेहिनाम् ॥

Colophon :

इति केनभाष्यस्य वाक्यार्थप्रधानस्य टिप्पणमिदं समाप्तम् ॥ इति श्रीमत्परमहंस परिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवतः कृतौ तलवकारोपनिषत्क्षुद्रगणे वाक्यविवरणभाष्यस्य टीका समाप्ता ॥

176

Sl. No. 957 **केनोपनिषद्भाष्यम्** Ms.No. B. 1191/६

Beginning :

मनः– ಮನಸ್ಸು, केन ಯಾರಿಂದ, प्रेषितं सत्– ಪ್ರೇರೇಪಿಸಲ್ಪಟ್ಟದ್ದರಿಂದ, ईपितं–ಇಷ್ಟವನ್ನು ಕುರಿತು, पतति– ಬೀಳುತ್ತದೆ + + +

ಈ ಉಪನಿಷತ್ತಿನಲ್ಲಿ ವಿರಕ್ತಿ ಉಳ್ಳವನಿಗೆ ಬ್ರಹ್ಮಜ್ಞಾನವು ಶಿಷ್ಯಾಚಾರ್ಯರುಗಳ ಪ್ರಶ್ನೋತ್ತರವಾಗಿ ಹೇಳಲ್ಪಟ್ಟಿರುವುದು. ಒಬ್ಬ ಶಿಷ್ಯನು ಆಚಾರ್ಯನಲ್ಲಿ ಪ್ರಶ್ನೆ ಮಾಡುತ್ತಾನೆ– ಮನಸ್ಸು ಯಾರಿಂದ ಪ್ರೇರಿಸಲ್ಪಟ್ಟದ್ದಾಗಿ ಇಷ್ಟವಾದ ವಸ್ತುಗಳನ್ನು ಬಯಸುವುದು ?

End :

ಯಾವನು ಈ ಕೇನೋಪನಿಷತ್ತಿನಲ್ಲಿ ಹೇಳಿದ ಪ್ರಕಾರ ಬ್ರಹ್ಮವಿದ್ಯೆಯನ್ನರಿಯಲು ಇಲ್ಲಿ ಮೊದಲು ಹೇಳಿದ ಪ್ರಕಾರ ತಿಳಿದುಕೊಂಡನೋ ಅವನು ಸಂಸಾರಕ್ಕೆ ಕಾರಣವಾದ ಅಜ್ಞಾನವನ್ನು ಬಿಟ್ಟು, ಸರ್ವ ಸುಖಕ್ಕೂ ಕಾರಣವಾದ ಬ್ರಹ್ಮದಲ್ಲಿ ಸೇರುವನು.

ಯಾವನು ಅಂಗಾಂಗಳೊಂದಿಗೆ ಬ್ರಹ್ಮವಿದ್ಯೆಯನ್ನು ತಿಳಿಯುವನೋ ಅವನು + + + ಶ್ರೀವೈಕುಂಠದಲ್ಲಿ ನಿತ್ಯಾನಂದದೊಂದಿಗೆ ರಮಿಸುವನು .

Colophon :

— — —

177

Sl. No. 959 **केनोपनिषद्भाष्यम्** Ms. No. B. 245/2b

Beginning :

आप्यायन्त्विति ।। आप्यायन्तु अप्ययं प्राप्नुवन्तु मम साधकस्याङ्गानि + + +

नत्वा श्री सुन्दराचार्यं पदवाक्यप्रमाणतः ।
केनोपनिषदो भाष्यं यथावद्वच्म्याम्यहम् ।।

केनेति । सङ्कल्पविकल्पात्मकं मनः केन प्रेषितं सत् इषितमिष्टं विषयजातं पतति गच्छतीत्यर्थः ।।

End :

आद्यस्य खण्डद्वयस्य निर्गुणब्रह्मविषयत्वं अनन्तरस्य खण्डद्वयस्य सगुणब्रह्मविषयत्वञ्चोप-
क्रमोपसंहारादिलिङ्गैः स्पष्टमवगम्यत इत्यतोऽभ्युदयमात्रप्रयोजनोत्तरखण्डद्वयव्याख्यानेष्वप्रवृत्तिरिति
चावगन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयाचार्यकृतौ तलवकारोपनिषद्भाष्यं समाप्तम् ॥

178

Sl. No. 971 केनोपनिषद्भाष्यटीका Ms. No. C. 55

Beginning :

प्राणादेरीशितारं निखिलगुणनिधिं सर्वदेवाद्यगम्यं
व्यक्ताव्यक्तात्परं तं परमसुखनिधिं सर्वदोषातिदूरम् ।
सर्वज्ञं सर्वदेवेष्टदमपि निखिलं भासयन्तं स्वभासा
वन्दे विष्णुं सदाऽहं निखिलगुणसमूहात्परं मुक्तगम्यम् ॥ १ ॥

\+ + + + + + + + + + +

श्रीमदाचार्यसान्निध्यबलाद्यस्तस्य भाववित् ।
प्रकटीकृत्य तं सम्यग्जयतीर्थोऽभिभासते ॥

\+ + + + +

नत्वा रमापतिं सर्वदेवानामिष्टदं हरिम् ।
भाष्यं तलवकारस्य व्याख्यास्येऽहं यथामति ॥

इह + + तलवकारोपनिषदं + + भगवानानन्दतीर्थमुनिर्यथावद्व्याचिख्यासुः
\+ + नारायणस्तुतिनतिं + + निबध्नाति– अनन्तेति ॥

End :

एवं समापितभाष्यो भगवानाचार्योऽपि भगवन्नतिरूपमङ्गलमाचरति– स इति ॥
श्रीमदानन्दतीर्थार्यहृत्सरोजे व्यवस्थितः ।
आनन्दादिगुणोद्रिक्तः प्रीयतां कमलापतिः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य तलवकारोपनिषद्भाष्यस्य विवरणं वेदेशतीर्थ-
भिक्षुविरचितं समाप्तम् ॥

179

Sl. No. 972 केनोपनिषद्भाष्यटीका (दीपिका) Ms. No. C. 1016

Beginning :

नत्वा रमापतिं सर्वदेवानामिष्टदं हरिम् ।
भाष्यं तलवकारस्य व्याख्यास्येहं यथामति ॥

इह विविधसांसारिकदुःखदर्शनेन शमदमादिमतो × × रक्तस्याधिद्वारिणो मोक्षार्थं + + + शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति– अनन्तेति ॥

End :

योऽधिकारी एतां सप्रतिष्ठां सावयवां उपनिषदं स पाप्मानं अपहृत्य नैतै देशतः + + + सर्वोत्तमे धिष्ण्ये प्रतितिष्ठति । द्विरुक्तिरादरार्था । एवं समापितभाष्यो भगवानानन्द-तीर्थार्थः अन्ते प्रचयादिसाधकं भगवत्स्तुतिरूपं मङ्गलमाचरति– य इति ॥

Colophon :

एवं तलवकारोपनिषद्भाष्यस्य दीपिका ।
कृता वेदेशयतिना समाप्ता मध्वसत्कृतः ॥

180

Sl. No. 974 तलवकारोपनिषद्भाष्यटीका Ms. No. C. 2129

Beginning :

अजीजयत्पूर्वदेवान् देवान्योर्धमवापि यत् । (?)
अवीभसद्भासवादीन् श्रीजानिर्नोऽस्तु सम्पदे ॥ १ ॥

तलवकारोपनिषदं व्याकरिष्यन् भगवानाचार्यः चिकीर्षितग्रन्थस्य निर्विघ्नपरिसमाप्त्यादि- + + + निबध्नाति– अनन्तेति ॥

End :

निमीलितात्मा तुच्छेनाभ्व × हितं × × यदासीदिति श्रुतेः । गुणतोऽप्ययोग्यया नम-आदिरूपया निबाहितः सः पुरातनः पुरुषो विष्णुरयं किल कृष्ण इति परमार्थः । अन्तेऽपि मङ्गलमाचरति– य इति ॥ मे प्रेष्ठाया इति अशेषमतिमङ्गलम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमत्तलवकारोपनिषद्भाष्यस्य विवरणं श्रीमत्सत्यविजयपूज्यपादशिष्येण सत्यप्रिययतिना कृतं समाप्तम् ॥

181

Sl. No. 975 **केनोपनिषद्भाष्यटीका** Ms. No. C. 2372

Beginning :

प्राणेन्द्रिय × × × × × श्रीमध्व × × × कपिलाख्ये × × × × + काश्मीरप्रदानाय × × माध × × विद्युत्कुमुद × × × × × दीपिका । नारायणेन विदु × × × × गुरुप्रसादतः ॥ श्रीमत्तलवकारस्थ × × × रस्य × ।

End :

विद्यया ब्रह्मापरोक्षज्ञानेन । अमृतत्वं विद्यया निवृत्तिलक्षणं । विन्दति– नान्यः पन्था अयनाय विद्यत इति वचनात् । इति विद्धीति पूर्वेणान्वयः । एतदपि अनेन × × व्याचष्टे नातिवद्यत (?) इति ॥ केवलं सर्वोऽपि मोक्षाः ज्ञानेन वेद्यः प्राप्यो न किंतु ज्ञानेनावेद्यो अलभ्योऽपि । अति– आनन्दातिशयः । कर्मणा ज्ञानेन प्रका × × ॥

Colophon :

— — —

182

Sl. No. 980 **केनोपनिषत्खण्डार्थप्रकाशिका** Ms. No. C. 1785

Beginning :

व्यासतीर्थोक्तिमाश्रित्य श्रीपूर्णप्रज्ञनामकम् ।
नत्वा तलवकारोपनिषदर्थः प्रकाश्यते ॥

इहामुत्र फलभोगविरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः आत्यन्तिकानिष्टनिवृत्तये + + + तलवकारोपनिषत्प्रवृत्ता । तत्रादौ + + + चतुर्मुखं उमापतिः पृच्छति– केनेति ॥ ईषितं– इष्टं, साध्वसाधु वा मनः, पतति– प्रवर्तते ॥

End:

एतदुपनिषद्वेत्तुः फलमाह– य इति ॥ यो वा एतामुपनिषदं एवं वेद सः + + + ज्ञानवति लोके प्रकाशरूपे ज्येष्ठे सर्वज्येष्ठे विष्णौ प्रतितिष्ठति । सर्वोपनिषदर्थावधारणात् द्विरुक्तिः ॥

विद्याधीशनयव्यासरघूत्तममुनिस्तुतम् ।
रमारमणमिष्टार्थं प्रपद्ये मध्ववल्लभम् ॥

Colophon:

इति श्रीविद्याधीशार्यशिष्येण नृसिंहभिक्षुणा विरचिता तलवकारोपनिषत्खण्डार्थप्रकाशिका समाप्ता ॥

183

Sl. No. 918 केनोपनिषदर्थप्रकाशिका **Ms. No. P. 5098**

Beginning:

श्रीप्राणेशं पूर्णगुणं नत्वा प्रह्लाददैवतम् ।
मया तलव × × × र्थः प्रकाश्यते ॥

अस्या उपनिषदः × भाष्योक्त × एवार्थो मि × × मत × × नां बुध्यारोहायास्मिन् ग्रन्थे प्रपञ्चयिष्यते ॥

वैजयन्ते समासीनं महान्तं चतुराननम् ।
विष्णुं विविदिषुस्तत्वं पर्यपृच्छत्सदाशिवः ॥

इति भाष्यम् ॥

End:

योऽधिकारी एवमुक्तविषया एतामुपनिषदं वेद सः + + + स्वर्गे स्वरूपभूतसुखमहानात्मके लोके, ज्योतिरूपे ज्ञेये श्रेष्ठे, परब्रह्मणि प्रतितिष्ठति । प्रतितिष्ठतीति द्विरुक्तिः अवधारणार्था । प्रतितिष्ठत्येवेत्यर्थः ॥

Colophon:

तलवकारोपनिषदर्थप्रकाशः सम्पूर्णः ॥

184

Sl. No. 982 **कैवल्योपनिषत्** Ms. No. P. 1643/5

Beginning :

ॐ सहनाववतु + + शान्तिः । अथाश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच–
अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् ।
यथाऽचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् ॥

End :

न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ।
एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ॥
समस्तसाक्षि सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥
+ + + + +
अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् ।
तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते ॥

कैवल्यं पदमश्नुत इति ॥

Colophon :

इति कैवल्योपनिषत् समाप्ता ॥

185

Sl. No. 1014 **कैवल्योपनिषद्भाष्यम्** Ms. No. A. 166/2

Beginning :

यत्रकैवल्यसिद्धिः स्यात् वरिष्ठब्रह्मविद्यया ।
कैवल्याख्योपनिषदं व्याख्यास्येऽन्वर्थसंज्ञिकाम् ॥

अथेति मङ्गलार्थश्शब्दः । आश्वलायनाख्यो महर्षिर्भगवन्तं धर्मज्ञानवैराग्ययशश्श्रीमन्तं परमेष्ठिनं ब्रह्माणं परिसमेत्योपसङ्गम्योवाच– कथमिति तदाह ॥

End :

एतत्कैवल्योपनिषदुक्तप्रकारेण सप्रतियोगिकपरमात्मज्ञानिनां करामलकवत् सद्य एव कैवल्यमुक्तिः सिध्यतीति भावः । कैवल्यं फलमश्नुत इत्यभ्यास उपनिषत्परिसमाप्तिद्योतनार्थः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ कैवल्योपनिषद्भाष्यं समाप्तम् ॥

186

Sl. No. 1016 **कौलोपनिषत्** Ms. No. P. 5795/2

Beginning :

शं नः कौलिकः । शं नो वारुणी । शं नः शुद्धिः । शं नोऽग्निः । शं नः सर्वं समभवत् ॥

नमो ब्रह्मणे; नमः पृथिव्यै ; नम ओषधीभ्यः ; नमोऽग्नये ; नमो वायवे ; नमो गुरुभ्यः ॥

End :

न तिष्ठेन्नियमेन । निपमाण मोक्षः । कौलप्रतिष्ठां कुर्यात् । सर्वसमो भवेत् । अनन्यभावेन वर्तेत ॥

पठेदेतानि सूत्राणि प्रातरुत्थाय देशिकः ।
आज्ञासिद्धिर्भवेत्तस्य इत्याज्ञा परमेश्वरी ॥

Beginning :

इति कौलोपनिषत् ॥

187

Sl. No. 1017 **कौलोपनिषत्** Ms. No. P. 1664/2

Beginning :

भद्रं कर्णेभिः + दायुः । स्वस्ति न इन्द्रो + ओं शान्तिः शान्तिः ॥ शं नः कौलिकः । शं नो वारुणिः । शं नः शुद्धिः । शं नोऽग्निः । शं नस्सर्वमभवत् + अथातो धर्मजिज्ञासा । ज्ञानं बुद्धिश्च । ज्ञानं मोक्षैककारणम् । मोक्षस्सर्वात्मतासिद्धिः ॥

End :

पठेदेतानि सूत्राणि प्रातरुत्थाय देशिकः ।
आज्ञासिद्धिर्भवेत्तस्य इत्याज्ञा परमेश्वरि ॥
यश्चाचारविहीनोऽपि यो वा पूजां न कुर्वते ।
यदि × × न मन्येत नन्दते नन्दने वने ॥

ओम् शान्तिः ॥

Colophon :

इति कौलोपनिषत् ॥

188

Sl. No. 1019 कौलो(कालो)पनिषत् Ms. No. P. 8225

Beginning :

अथातो धर्मजिज्ञासा । ज्ञानं मोक्षकारणम् । मोक्षात्सर्वदा बुद्धिः । पञ्चविषयाः प्रपञ्चाः । तेषां दशज्ञानस्वरूपाः । त्यागो मोहः ॥

End :

यश्चाचारविहीनोऽपि नारकी मूढ एव सः ।
उपतिष्ठत ज्येष्ठेन मन्यते नन्दने वने ॥

Colophon :

कालोपनिषत्समाप्ता ॥

189

Sl. No. 1025 कौलोपनिषद्भाष्यम् Ms. No. P. 5795/2a

Beginning :

श्रीगुरुचरणाब्जकिरणविसरणनिर्धूतद्वद्वतावरणः ।
भास्करराय: कौलोपनिषदमाथर्वणीं विकासयति ॥

वक्ष्यमाणातिरहस्यार्थोपदेशेऽवश्यंभाविविघ्ननिरासाय देवताः प्रार्थयते– शमिति । कुलमार्गप्रवर्तकः कौलिकः परशिवः शं विघ्ननिरासकस्वात्मानन्दप्रापको नोऽस्माकं समभवत्–भूयात् ॥

End :

पूर्वोक्ताचारान् नानुतिष्ठति संशयापन्नमनस्कत्वात् उक्तविद्यां सपर्यामपि न करोति । वचनव्यत्ययः छान्दसः । अयं पन्थाः सर्वोत्तम इति मन्यते एतादृशोऽप्युपासकाभास उक्तफलालाभेऽपि स्वर्गमात्रं लभत एव, किमुत तदुपासकस्य यथोक्तफलप्राप्तिरिति भावः ॥

Colophon :

इति श्रीश्रीमद्भासुरानन्दनाथविरचितं कौलोपनिषद्भाष्यं समाप्तम् ॥

190

Sl. No. 1029 **कौपीतक्युपनिषत्** Ms. No. P. 1682/10

Beginning :

ॐ चित्रो ह वै गाङ्गर्यायणिः यक्ष्यमाणः आरुणिं वव्रे । स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति । तं हासीनं पप्रच्छ गौतमस्य पुत्रास्ति संवृतं लोके यस्मिन् माधास्यस्यन्यमुताहो वाध्वा तस्य मा लोके धास्यसीति ॥

End :

स यावद्ध षा इन्द्र एतमात्मानं न विजज्ञे तावदेनमसुरा अभिबभूवुः । स यदा विजज्ञेऽथ हत्वाऽसुरान् विजित्य सर्वेषां देवानां + + + आधिपत्यं परीयाय । तथो एवैवं विद्वान् सर्वान्– षाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद ॥

Colophon :

इति कौपीतकीब्राह्मणोपनिषदि चतुर्थोऽध्यायः ॥

191

Sl. No. 1030 **कौपीतक्युपनिषत्** Ms. No. P. 1973/29

Beginning -

प्रतर्दनो ह वै दैवो दासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च । तं हेन्द्र उवाच – प्रतर्दन वरं ते ददानीति । स होवाच प्रतर्दनः ॥

End :

हत्वाऽसुरान् + + + देवानामाधिपत्यं परीयाय + + + सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यं आधिपत्यं परीयाय । एवैवं विद्वान् सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यं आधिपत्यं परीयायेति य एवं वेद य एवं वेद ॥

Colophon :

इति कौपीतकीब्राह्मणोपनिषत् समाप्ता ॥

192

Sl. No. 1044 **कौषीतक्युपनिषद्व्याख्या** Ms. No. B. 799/2

Beginning :

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
कौषीतकीश्रुतिव्याख्यां करवाणि यथामति ॥

अर्चिरादिगतितत्प्राप्यदेशविशेषतद्विशिष्टब्रह्मानुभवप्रकारोपदेशपराख्यायिकेयमारभ्यते ॥

End :

स्वाराज्यशब्दितं मोक्षं च प्राप्नोतीत्यर्थः । व्यासार्यैस्तु सर्वान् पाप्मनोऽपहत्येत्यनेनापहतपाप्मत्वादिगुणाष्टकमुक्तम् ॥

Colophon :

— — —

193

Sl. No. 1046 **कौषीतक्युपनिषद्भाष्यम्** Ms. No. A.166/30

Beginning :

यस्यां मार्गद्वयं प्रोक्तं भोगमोक्षार्थकं नृणाम् ।
कौषीतक्यभिधानेमां व्याख्यास्ये विमलाशयाम् ॥

चित्राख्यः गर्गा गर्गेः पुत्रः वक्ष्यमाणः यष्टुकामस्सन् आरुणिं ऋषिं याजयितुं वव्रे । स स्वपुत्रं श्वेतकेतुं याजयेति प्रजिघाय– प्रेरितवान् । स श्वेतकेतुः + + संवृतं + + पप्रच्छ ॥

End :

तमेतमात्मानमेन आत्मानोऽन्वपश्यन्तीत्युक्त्या द्रष्टॄणां जीवात्मत्वाद्दृश्यस्य परमात्मत्वाच्च व्यवहारदशायां तत्त्वम्पदार्थयोर्जीवब्रह्मणोऽर्भेदः परमार्थदशायां तयोरभेदश्च सुनिर्धारित इत्यवगन्तव्यम् ॥

Colophon :

इति चतुर्थोऽध्यायः । इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ कौषीतक्युपनिषद्भाष्यं समाप्तम् ॥

194

Sl. No. 1048 **क्षुरिकोपनिषत्** Ms. No. P. 1973/21

Beginning :

ॐ क्षुरिकां संप्रवक्ष्यामि धारणां योगसिद्धये ।
× × × × × × ×॥
निश्शब्दं देशमासाद्य तत्रासनमवस्थितः ।
कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च ॥ २ ॥

End :

प्राणायामसुतीक्ष्णेन मात्राधारेण योगवित् ।
वैराग्योपलवृष्टेन छित्वा तन्तुं न बध्यते ॥ इति ॥

Colophon :

इति क्षुरिकोपनिषत्समाप्ता ॥

195

Sl. No. 1057 **क्षुरिकोपनिषद्भाष्यम्** Ms. No. A. 166/42

Beginning :

प्राणसन्धारणा क्षुर्या यस्यां सम्प्रोच्यते श्रुतौ ।
क्षुरिकोपनिषद्वाचं सभाष्यां कुर्महेऽधुना ॥

यद्यपीह प्राणधारणाया एव प्राधान्येनाभिहितत्वात् क्रममुक्त्यर्थकतैवास्या उपनिषद इति ब्रूयुः ; तथापि 'यथा निर्वाणकाले तु + + व्रजेत्' इत्युपसंहारे सर्वकर्मक्षयाभिधानात् सद्यो मुक्त्यर्थकता वक्तुं शक्या ॥

End :

यद्यपीतरासां च नाडीनां पर्यवसाने ब्रह्मण्येव विलयो भवति ; तथापि तत्प्रकृतिभूतसम्पत्तिद्वारा ता विलीयन्ते । सुषुम्ना तु ब्रह्मणि साक्षात् विलीयते ; इत्यवगन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ क्षुरिकोपनिषद्भाष्यं समाप्तम् ॥

196

Sl. No. 1060 **गणेशोपनिषत्** Ms. No. P. 1633/6

Beginning :

ॐ पूर्णमदः पूर्णमिदं × + शान्तिः शान्तिः शान्तिः। नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि। त्वमेव केवलं धर्ताऽसि। त्वमेव केवलं हर्ताऽसि। + + + ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्॥

End :

अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्॥

Colophon :

— — — — —

197

Sl. No. 1061 **गणपत्युपनिषत्** Ms. No. P. 2210/7

Beginning :

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि। त्वमेव केवलं हर्ताऽसि। त्वमेव केवलं खल्विदं ब्रह्मासि। त्वं साक्षादात्माऽसि। त्वं ऋतं सत्यं। अव त्वं माम्। + + + अव धातारम्॥

End :

सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा स सिद्धमन्त्रो भवति। महापापैः प्रमुच्यते; महादोषात्प्रमुच्यते। स सर्वविद्भवति; स सर्वविद्भवति। य एवं वेद। सह नाववतु। ॐ शान्तिः शान्तिः॥

Colophon :

— — —

198

Sl. No. 1064 **गणपत्युपनिषत्** Ms. No. P. 8253

Beginning :

नमस्ते गणपतये। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव केवलं कर्ताऽसि। त्वमेव केवलं भर्ताऽसि। त्वमेव केवलं हर्ताऽसि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्माऽसि। ऋतं वच्मि। + + अव त्वं माम्। + + अव धातारम्॥

End :

इन्द्रः ममाचार्यकल्पः स सर्वविद्भवति ; ब्रह्मभूयाय कल्पते ; स गणेशात्मन्यवस्थीयते। न च पुनरावर्तते । स मुक्तो भवति । इत्युपनिषत् । सह नाववतु + + शान्तिः ।।

Colophon :

इत्यथर्वशीर्षे गणपत्युपनिषत्समाप्ता ।।

199

Sl. No. 1073 **गणपत्युपनिषद्भाष्यम्** Ms. No. B. 247/49

Beginning :

यस्यां गणपतिः प्रोक्तः सगुणो निर्गुणोऽपि च ।
एनां तु पश्यतां स्यात्तां सिद्धिमुक्ती न संशयः ।।

कथमेक एव गणपतिस्सगुणो निर्गुणश्च भवेत् । तमःप्रकाशयोरिवान्योन्यविरुद्धत्वेन + + सामानाधिकरण्यासम्भवात् ।।

End :

तस्मात्प्रतिमासन्निधावपि निष्कामजापका महाबुद्धयस्सर्वविदस्स्युरिति युक्तमेव श्रुतिवचनं मन्तव्यम् ।।

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतिषु गणपत्युपनिषद्भाष्यं समाप्तम् ।।

200

Sl. No. 1076 **गरुडोपनिषत्** Ms. No. P. 1468

Beginning :

ॐ नमो भगवते गरुडाय विष्णुवाहनाय, त्रैलोक्यपरिपूजिताय, वज्रनखवज्रतुण्डाय वज्रपक्षालङ्कृतशरीराय, ओमीकेह्येहि श्रीमहागरुड + + + अप्रिन्नाविश आविश + + + विषं हर हर हुं फट् स्वाहा ।।

End :

अमृतकलशहस्तं कान्तिसम्पूर्णगात्रं सकलविबुधवन्द्यं वेदशाखैरचिन्त्यम् ।
द्विविधसुलभपक्षैर्धूयमानाण्डगोलं सकलविषविनाशं चिन्तयेत्पक्षिराजम् ।।

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने ।
श्रुतिसिन्धुसदोत्पातमन्दराय गरुत्मते ॥

Colophon :

— — —

201

Sl. No. 1077 — गरुडोपनिषत् — Ms. No. P. 973/27

Beginning :

अस्य श्रीगरुडोपनिषदो ब्रह्मा ऋषिः + + विनियोगः ।

आजानुतः सुवर्णाभं आकट्योस्तुहिनप्रभम् ।
कुंकुमारुणमाकाण्ठात् आकेशान्तं सितेतरम् ॥

End :

शतं ब्राह्मणान् ग्राहयित्वा चक्षुषा मोक्षयति चक्षुषा मोक्षयति। सहस्रं ब्राह्मणान् ग्राहयित्वा मनसा मोक्षयतीत्याह भगवान् ब्रह्मा ॥

Colophon :

गारुडोपनिषत्समाप्ता ॥

202

Sl. No. 1082 — गरुडोपनिषत् — Ms. No. C. 461/54

Beginning :

अस्य श्रीगारुडविद्यामहामन्त्रस्य ब्रह्मविद्या ऋषिः । अनुष्टुप् छन्दः । श्रीमन्महागरुडो देवता । प्रणवं बीजम् । स्वाहा शक्तिः । मन्त्रोक्तविषनाशनार्थेजपे विनियोगः । + +

आजानुतः सुवर्णान्तं आकाट्यां तु हिनप्रभम् ।
कुङ्कुमारुणमाकण्ठमाकेशान्तं सितोदरम् ॥

End :

यावज्जीवं न हिंसन्ति सर्पाः । ग्राहयित्वा चक्षुषा मोहयति । चक्षुषा मोक्षयति । सहस्रं ब्राह्मणान् ग्राहयित्वा मनसा मोक्षयित्वाऽऽह भगवान् ब्रह्मा - ब्रह्मयाज्ञवल्क्यः ॥

Colophon :

इति श्रीगरुडोपनिषत् समाप्ता ॥

203

Sl. No. 1083 **गरुडोपनिषत्** Ms. No. P. 4473/6

Beginning :

ब्रह्मविद्यां प्रवक्ष्यामि । ब्रह्मा नारदाय, नारदो बृहत्सेनाय, बृहत्सेनो बृहस्पतये, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजो जीवितकामेभ्यः, जीवितकामः शिष्येभ्यः प्रायच्छत् । तदेतस्या महागरुडब्रह्मविद्यायाः काश्यप ऋषिः । अनुबादीनि छन्दांसि । श्रीमहागरुडो देवता । ओं:बीजम् । क्षि शक्तिः । पं कीलकम् । श्रीमहागरुडप्रसादसिद्ध्यर्थे जपे विनियोगः ।

आजानुतासुवर्णान्तं आकट्याद्तुहिनप्रभम् ।
कुङ्कुमारुणमाकण्ठमाकेशान्तं सितोदरम् ॥

End :

य इमां महाविद्याममावास्यायामधीयानो धारयन् द्वादशवर्षं न तं हिंसन्ति सर्पाः । अष्टौ ब्राह्मणान् ग्राहयित्वा त्रीणि मोक्षं जयति + + + + इत्याह भगवान् ब्रह्मा ॥

Colophon :

इत्याथर्वणगरुडोपनिषत्समाप्ता ॥

204

Sl. No. 1090 **गरुडोपनिषत्** Ms. No. P 1723/33

Beginning :

सहनाववत्विति शान्तिः । ब्रह्मविद्यां प्रवक्ष्यामि यां ब्रह्मविद्यां ब्रह्मा नारदाय प्रोवाच ; नारदो बृहत्स्येनाय, बृहत्स्येन इन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजो जीवत्कामुकेभ्यः शिष्येभ्य; प्रायच्छत् । तदेतदस्याः श्रीमहागरुडब्रह्मविद्यायाः + + ब्रह्मा ऋषिः ॥

End :

गरुत्मन्तं तार्क्ष्यं कश्यपनन्दनम् । (?)
द्वादशैतानि नामानि गरुडस्य महात्मनः ॥

प्रभाते संस्मरेद्यो वै स्नातो वा यदि मानवः ।
विषं नाशयते तस्य न हिंसन्ति च पन्नगाः ॥

सह नाववत्विति शान्तिः ॥

Colophon :

इति गरुडोपनिषत् समाप्ता ॥

205

Sl. No. 1092 गरुडोपनिषत् Ms. No. C. 1982/10

Beginning :

ॐ भद्रं कर्णेभिः + ओं शान्तिश्शान्तिः । अस्या ब्रह्मविद्यायाः ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीमहागरुडो देवता । + + ध्यानम्–

अमृतकलशहस्तं धेनुमुद्रां कराग्रैः
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।
द्विविधसुलभपक्षैर्धूयमानाण्डकोशं
सकलविषविनाशं पक्षिराजं नमामि ॥

End :

एवं ध्यायेत्त्रिसन्ध्यायां अन्नं (?) गरुडरूपिणम् ।
बिषं नाशयते शीघ्रं शीघ्रमिबा + × रम् ॥

Colophon :

— — — — — —

206

Sl. No. 1093 गरुडोपनिषत् Ms. No. P. 7552/2

Beginning :

सकलविषहरताक्ष्र्यगरुडोपनिषन्महामन्त्रस्य जपं करिष्ये । शन्नो मित्रः + + + शान्तिः । अस्य श्रीगरुडोपनिषद्ब्रह्मविद्यामहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । गरुडात्मा श्रीमन्नारायणो देवता । + + + + +

स्वस्तिको दक्षिणं पादं वामपादं तु कुञ्चितम् ।
प्राञ्जलीकृतदोर्युग्मं गरुडं हरिवल्लभम् ॥ १ ॥

End :

अमृतकलशहस्तं कान्तिसम्पूर्णगात्रं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।
द्विविधसुलभपक्षैः धूयमानाण्डगोलं
सकलविषविनाशं चिन्तयेत्पक्षिराजम् ॥

शन्नो + + + + शान्तिः । सह नाववतु + शान्तिः ॥

Colophon :

इति गरुडोपनिषत्समाप्ता ॥

207

Sl. No. 1094 गरुडोपनिषद्भाष्यम् Ms. No. A. 167/30

Beginning :

सगुणा गारुडा यत्र ब्रह्मविद्या समीर्यते ।
विषबाधां विनिघ्नन्तीं व्याख्यास्ये गारुडश्रुतिम् ॥

ओमिति । गरुडस्य इयं गारुडा, सा च सा सगुणब्रह्मविद्या च; तां प्रवक्ष्यामीति श्रीनारायणवचनम् ॥

End :

सहस्रं ब्राह्मणान् ग्राहयित्वा तु (मनसा) चिन्तामात्रेण मोचयेत् । सर्वं विषं जलेनादाय भूमौ जन्त्वन्तरबाधां विनैव मुञ्चति । स्पष्टमन्यत् । इत्येवं भगवान् ब्रह्मा नारदायाह– उवाचेत्युपनिषत् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ गारुडोपनिषद्भाष्यं समाप्तम् ॥

208

Sl. No. 1096 गरुडोपनिषद्दीपिका Ms. No. C. 2069/2

Beginning :

गरुडोपनिषद्ब्रह्मप्रोक्ता खण्डत्रयान्विता ।
चतुश्चत्वारिंशत्तमीग्रन्थसन्धेधुनोच्यते (?) ॥

अथ गरुडोपनिषन्महामन्त्रस्य ब्रह्मा ऋषिः । अमृता गायत्री छन्दः । श्रीगरुडात्मा देवता । हलों बीजानि । सर्वांशशक्तयः + + + महामन्त्रस्तु तवर्तकारीमित्यारभ्य यदि वा महिळापुत्रकः स्वयमित्यन्ता द्वितीयखण्डरूपः ॥

End :

द्विरुक्तिः समाप्त्यर्था । इति गरुडोपनिषत्– गरुद्भ्यां पक्षाभ्यां डयत आरोगच्छति इति गरुडः । तद्देवताका उपनिषत् । इति– समाप्ता ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पृष्टपदवाक्यानां गारुडे दीपिका शुभा ॥

Colophon :

इति गारुडोपनिषद्दीपिका समाप्ता ॥

209

Sl. No. 1097 गर्भोपनिषत् Ms. No. P. 1958/1

Beginning :

पञ्चात्मकं पञ्चसुवर्तमानं
षडाश्रयं षड्गुणयोगयुक्तम् ।
तत्सप्तधातु त्रिमलं द्वियोनि
चतुर्विधाहारमयं शरीरम् ॥

भवति पञ्चात्मकमिति ; कस्मात् ? पृथिव्यापस्तेजोवायुराकाशमित्यस्मिन् पञ्चात्मके शरीरे ॥

End :

शरीरमिति कस्मात् ? + + त्राणि स्थानानि भवन्ति + + + कफस्याढकं शुक्रं कुडवं मेदः प्रस्थौ द्वावनियतं मूत्रपुरीषं आहारपरिमाणात् । पैप्पलादं मोक्षशास्त्रं परिसमाप्तं पैप्पलादं मोक्षशास्त्रं परिसमाप्तमिति ॥ सह नाववतु + शान्तिः ॥

Colophon :

इति गर्भोपनिषत् ॥

210

Sl. No. 1114 गर्भोपनिषद्भाष्यम् Ms. No. A. 166/14

Beginning :

अथ गर्भोपनिषदं देहोत्पत्त्यवबोधिनीम् ।
व्याख्यास्ये सङ्ग्रहेणैव वैराग्यस्य प्रसिद्धये ॥

पञ्चात्मकमिति ॥ वक्ष्यमाणार्थ एष श्लोकः भवतीति पञ्चात्मकमिति कस्मादित्याशङ्क्याह— पृथिवीति ॥

End :

अत्रोच्यते— नायं दोषः ; देहोत्पत्तिप्रकारश्रवणादिभिस्तुपुष्कलस्य वैराग्यस्योत्पत्तिसम्भवात् । विषयवैराग्यवतो हि ब्रह्मज्ञानादिकमनायासमुत्पद्यते । अत इदं मोक्षसाधनमित्युपपन्नम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ गर्भोपनिषद्भाष्यं समाप्तम् ॥

211

Sl. No. 1115 गायत्र्युपनिषत् Ms. No. B. 664/2

Beginning :

ॐ नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयं परिपृच्छति— त्वं ब्रूहि भगवन् , गायत्र्या उत्पत्तिं श्रोतुमिच्छामि । ब्रह्मोवाच— प्रणवेन व्याहृतयः प्रवर्तन्ते । तमसस्तु परं ज्योतिः कः पुरुषः ? स्वयंभूर्विष्णुरिति ह ताः स्वाङ्गुल्या मथ्यमानात् फेनो भवति ॥

End :

अनेन हृदयेनाधीतेन क्रतुशतेनेष्टं भवति । षट्सहस्रगायत्रीजप्यानि भवन्ति । अष्टौ ब्राह्मणान् ग्राहयेत् ; अर्थसिद्धिर्भवति ।

य इदं गायत्रीहृदयं ब्राह्मणः प्रयतः पठेत् ।
सर्वपापैः प्रमुच्येत ब्रह्मलोके महीयते ॥

ब्रह्मलोके महीयत इति ॥

Colophon :

इति गायत्र्युपनिषत् समाप्ता ॥

212

Sl. No. 1117 **गोपालपूर्वतापिन्युपनिषत्** Ms. No. P. 3136/1

Beginning :

ओं सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

+ + + + +

कुतो मृत्युर्बिभेति ? कस्य विज्ञानेनाखिलं विज्ञातं भाति ? केनेदं विश्वं संसरतीति ? तदु होवाच— ब्राह्मणः श्रीकृष्णो वै परमं दैवतं गोविन्दान्मृत्युर्बिभेति + + + स्वाहेदं संसरतीति ॥

End :

अनेजदेकं मनसो जवीयः नैनद्देवा आप्नुवन् पूर्वमर्षदिति ॥ तस्मात्कृष्ण एव परो देवः ; तस्मात्तं ध्यायेत् ; तद्रसयेत् ; तं भजेदित्यों तत्सदिति ॥

Colophon :

इति गोपालपूर्वतापनीयोपनिषत्समाप्ता ॥

213

Sl. No. 1123 **गोपालपूर्वतापनीयोपनिषद्भाष्यम्** Ms. No. A. 167/22

Beginning :

श्रीकृष्णो वर्ण्यते यत्र प्रभुस्सकळनिष्कळः ।
गोपालतापिनीमेनां व्याख्यास्ये श्रुतिमञ्जसा ॥

सदिति ॥ कृष्णायाक्लिष्टकर्मणे गुरव इत्येते शब्दास्सकळलिङ्गाः । सच्चिदानन्दरूपाय वेदान्तवेद्याय बुद्धिसाक्षिण इत्येते शब्दा निष्कळलिङ्गा इति चिन्त्यम् ॥

End :

तं कृष्णं ध्यायेत् सगुणध्यानद्वारेण निर्गुणध्यानं कुर्यादिति । + + + तं एवम्भूतं रसयेत् ; तं यज्ञेन भजेदित्युपनिषत् । रसयेदित्यादि व्याख्यातमेव ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ गोपालपूर्वतापनीयोपनिषद्भाष्यं समाप्तम् ॥

214

Sl. No. 1126 **गोपालोत्तरतापनीयोपनिषत्** Ms. No. P. 3136/6

Beginning :

एकदा हि व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णं हि वरमूचिरे। उवाच ताः कृष्णः– अमुकस्मै ब्राह्मणाय भैक्षं दातव्यं भवति दुर्वाससं इति ॥

End :

दत्त्वा स्तुतिं पुण्यतमं ब्रह्मणे स्वस्वरूपिणे।
कर्तृत्वं सर्वलोकानां अन्तर्धाने बभूव सः ॥
ब्रह्मणे ब्रह्मपुत्रेभ्यः नारदात्तु श्रुतं यथा।
तथा प्रोक्तं तु गान्धर्वि गच्छ त्वं स्वालयान्तिकम् ॥

Colophon :

इत्याथर्वणरहस्ये श्रीगोपालोत्तरतापनीयोपनिषत् समाप्ता ॥

215

Sl. No. 1130 **गोपालोत्तरतापनीयोपनिषद्भाष्यम्** Ms. No. A. 167/21(a)

Beginning :

इदानीं कृष्णवाक्यबलेन तीर्णयमुनानां व्रजस्त्रीणां दुर्वासिनाख्यमुनिकर्तृको(?)पदेशमाह– एकदेति ॥ व्रजस्त्रियो गोपिकाः सकामास्सत्यः शर्वरीं कृष्णेन सहोषित्वा परेऽहनि + + गोपालं कृष्णमूचिरे– इत्युक्तवत्यः ॥

End :

ब्रह्मण इति ॥ यथा नारायणेन ब्रह्मणे स्वपुत्राय प्रोक्तं तथा + + + ब्रह्मपुत्रान्मुनेर्नारदान्मया श्रुतं तथा तुभ्यं प्रोक्तम्। तस्मात् हे गान्धर्वि त्वं स्वालयस्यान्तिकं गच्छ। यच्छ्रोऽतव्यं तत् त्वया श्रुतमेवेत्यतः त्वं कृतार्थाऽसीत्यभिप्रायः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपाद × × × × अप्पयदीक्षिताचार्यस्य कृतौ गोपालोत्तरतापनीयोपनिषद्भाष्यं समाप्तम् ॥

216

Sl. No. 1133 **चक्रोपनिषत्** Ms. No. B. 123/6

Beginning :

हरिः ओं अथ नित्यानवद्या सच्चिदानन्दमयी माता लोकानां लक्ष्मीः नारायणं परिपृच्छति भगवन् देवदेवेश सर्वादे सर्वमध्यान्त नारायण जगन्मय प्रसीद मे स्वामिन् ; पवित्राणां पवित्रेण त्वयेदं धार्यते चक्रं सुदर्शनं ; येन मामङ्कयित्वा पूतां हृदि वहसि ; किं तत्स्वरूपम् ? किं प्रभावम् ? यदि मे योग्यता श्रोतुं तन्मे ब्रूहीति ॥

End:

यथा मुद्रां बिना राज्ञः पदं वेष्टुं न शक्यते ।
तथा मुद्रां विना मेऽस्य वैकुण्ठो दुष्प्रवेशनः ॥

तस्मात् द्विजातिवर्णैः सर्वाश्रमिभिश्च तप्तचक्रं धार्यम् । + + + + न स भयभाग्भवति । यो धारयति [स हि] पाप्मानं तरति ; स मृत्युं तरति ; विशति वैकुण्ठलोकं मत्सायुज्यमवाप्नोति ; न च पुनरावर्तते ; न च पुनरावर्तते ; इति । य एवं वेद । इत्युपनिषत् ॥

Colophon :

इति चक्रोपनिषत् ॥

217

Sl. No. 1135 **चक्रोपनिषत्** Ms. No. B. 123/2

Beginning :

हरिः ओम् । अथ कात्यायनेति होवाच । परं ब्रह्मेत्येको देवः विश्वतश्चक्षुरिति विश्वात्मा विश्वतोबाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति सम्पतत्रैः द्यावाभूमी जनयन् देव एकः । + + + + तप्तचक्रं द्विभुजे धार्यमित्यग्निहोत्रमेव लोको भवति ॥

End :

कौञ्चकीपुत्रात्कौञ्चकीपुत्रो वैधृमतेयीपुत्राद्वैधृमतेयीपुत्रः कार्षकेयीपुत्रात्कार्षकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात् सञ्जीवीपुत्र आसुरीवासिनः प्राश्नीपुत्रात् प्राश्नीपुत्रः आसुरायणादासुरायण आसुरेरासुरिः ॥

Colophon :

इत्याथर्वणरहस्ये चक्रोपनिषत् समाप्ता ॥

218

Sl. No. 1136 **चिदम्बरोपनिषत्** Ms. No. P. 7635/12

Beginning :

अथ हैनं विधातारं सनत्कुमारस्सर्वेषां जीवलोकानां परमकारुणिकस्तत्त्वबुभुत्सुरुवाच- भगवन् जीवलोका अविद्यासंवृता भवाम्भोधौ निमज्योन्मज्य कुतश्चिद्विश्रामं न यान्ति; तेनैवत्तरन्ति तद्यमेवालोच्य ब्रूहि ॥

End :

गिरीश गिरिजाजाने गरुडासनपूजित ।
पाहि संसारदुःखौघादिति ध्येयं निरन्तरम् ॥

इत्याह भगवान् विधाता । यश्चाधीते चिदम्बरस्वरूपी भवति । इत्यों सत्यमित्युप- निषत् ॥

Colophon :

इति चिदम्बरोपनिषत् समाप्ता ॥

219

Sl. No. 1140 चूलिकोपनिषत् Ms. No. P. 8253/2

Beginning :

अष्टपादं शुचिर्हंसं त्रिसूत्रं मणिमव्ययम् ।
विवर्तमानं तेजसैन्धं सर्वः पश्यन् न पश्यति ॥
भूतसंमोहने काले भिन्ने तमसि चेश्वरे ।
अतः पश्यति सत्त्वस्थं निर्गुणं गुणगुह्वरे ॥

End :

ब्रह्म ब्रह्म वि × नं तु ये विदुर्ब्राह्मणादयः ।
ते लयं यान्ति तत्रैव लीना स्याद्ब्रह्मशायिने ॥

लीना स्याद्ब्रह्मशायिन इति ॥

Colophon :

इत्यथर्ववेदे चूलिकोपनिषत्समाप्ता ॥

220

Sl. No. 1141 **छान्दोग्योपनिषत्** Ms. No. 1468

Beginning :

आप्यायन्तु ममाङ्गानि + + + + शान्तिः । ओमित्येतदक्षरमुद्गीथमुपासीत ; ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥ एषां भूतानां पृथिवी रसः ॥ २ ॥

End :

तद्धैतद्ब्रह्मा प्रजापतय उवाच— + + + + सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते ; न च पुनरावर्तते ; न च पुनरावर्तते ॥

Colophon :

इत्यष्टमोऽध्यायः ॥

221

Sl. No. 1162 **छान्दोग्योपनिषद्विवरणम्** Ms. No. P. 3249/9

Beginning :

श्वेतकेतुरारुणेय आसेत्यध्यायसम्बन्धः । सर्वं खल्विदं ब्रह्म तज्जलानित्युक्तम् । कथं तस्मात् जगदिदं जायते ? तस्मिन्नेव विलीयते ? अ × × च तेन चेत्येतद्वक्तव्यम् । अनन्तरं च तस्मिन् युक्ते × × × च तृप्यतीत्युक्तं तत् एकत्वेन सत्यात्मनः सर्वभूतस्थस्योपपद्यते ॥

End :

प्राणिनां विज्ञानदर्शनात् किं सदात्मविज्ञानं + + + + आत्मबुद्धित्वान्न स्यात् सदात्मत्वविज्ञानम् । तस्मात् विकारानृतादिक्षुज्जीवात्मत्वविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धम् ॥

Colophon :

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगतः कृतौ छान्दोग्योपनिषद्विवरणे षष्ठः प्रपाठकः समाप्तः ॥

222

Sl. No. 1177 छान्दोग्यभाष्यटीका Ms. No. P. 3610/2

Beginning :

कैवल्यलक्ष्मीभवनाररराणामुद्घाटनायोचितकुञ्चिकेव ।

विराजते यस्य विबोधमुद्रा हस्ते तमीळे वटमूलगेहम् ॥

वर्तिष्यमाणाध्यायस्यातीतेन सन्दर्भेण संबन्धं वक्तुं प्रतीकं गृहीत्वा तं प्रतिजानीते— श्वेतकेतुरिति ॥

End :

यावज्जीवं कर्मानुष्ठानविधायकत्वाभ्युपगमेन तस्या विरक्तविषयप्रतिपादकं नाविशेषादिति सूत्रवचास्यापि गृहस्थेनोपसंहाराभ्युपगमेन प्रवृत्तत्वात् । अन्यथा आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येत्यस्य गृहस्थेऽसङ्कोचेनानुपपत्तेरिति पूर्वोक्तविरोधापत्तेश्चेति सिद्धम् ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमत्कैवल्येन्द्रसरस्वतीपूज्यपादशिष्य-ज्ञानेन्द्रसरस्वतीपूज्यपाद-शिष्य-श्रीमदभिनवनारायणेन्द्रसरस्वतीविरचितायां छान्दोग्योपनिषद्भाष्यटीकायामष्टमोऽध्यायः ॥

223

Sl. No. 1178 छान्दोग्योपनिषद्भाष्यम् Ms. No. B. 246/9

Beginning :

स्वात्मारामं प्रणम्याद्य सुन्दरेश्वरसद्गुरुम् ।

छान्दोग्योपनिषद्भाष्यं सङ्ग्रहेण करोम्यहम् ॥

अथेदानीं तत्त्वमसीति नवकृत्वोपदेशप्रधानां सद्विद्यां प्रदर्शयितुं षष्ठोऽध्याय आरभ्यते- श्वेतकेतुरिति नामतः । इह किल आरुणेयः अरुणस्य पौत्रः आस- बभूव ॥

End :

अविद्वांस्त्वनृताभिसन्धी उरुदुःखाग्निना दह्यते ; देहपातानन्तरं यमदूतैर्हन्यते चेत्ततोऽयं विद्वानयं अविद्वानिति प्रत्यक्षशास्त्राभ्यलिङ्गैर्विभज्य ज्ञातुं शक्यत एव । ऐतदात्म्यमिदं सर्व-मित्यादि व्याख्यातम् । तद्धास्य विजिज्ञाविति विजिज्ञाविति द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ छान्दोग्योपनिषद्भाष्ये षष्ठः प्रपाठकः समाप्तः ॥

224

Sl. No. 1185 **छान्दोग्योपनिषद्दीपिका** Ms. No B. 210/1

Beginning :

शेषं समानम् । सम्प्रदायशुद्धिं दर्शयति । एत........स वै तद्विद्वान् नाहम....हिदास ऐत्तरेय इति एतद्यज्ञो वा सन्न .... मविद्वान्- महिदासः । ....प्रत्यहमित्यर्थः । तदुक्तिमेव दर्शयति– स किम....एत....वर्तसि । योऽहमन्नेन प्रेष्यामि इति ॥

End :

काममिच्छामो वः ; यस्मादपः पिबतस्ते प्राणो न विच्छेत्स्यते- विच्छेदं नापद्यते । तस्मादापोमयः प्राण इत्युक्तम् । एवमुक्तः पुत्रः पञ्चदशाहानि नाशम् ॥

Colophon :

— — — — — — — —

225

Sl. No. 1193 **छान्दोग्योपनिषद्भाष्यटीका** Ms. No. B. 228

Beginning :

पूर्णानन्दमहाविबोधमखिलं संभासयन्तं रुचा
सर्वत्र प्रभुमीश्वरं गुणनिधिं दिव्याकृतिं केशवम् ॥
जन्माद्यस्य यतो हि सर्वजगतो जन्मादिदोषोज्झितं
नित्यं पूर्णविबोधशर्वगुरुणो ह्यास्यं भजे नित्यदा ॥

\+ \+ \+ \+ \+

छान्दोग्योपनिषद्भाष्यं व्याकरिष्ये यथामति ॥

इह हि नानाविधसांसारिकक्लेशसंदर्शनेन फणिफणेच्छा वा समीपकृतापरसुखानां शमद-दिमतोऽधिकारिणो + + यथावद्व्याचिख्यासुः + + + + आनन्दतीर्थमुनिः + + + मङ्गलं + + निबध्नाति – अत्युद्रिक्तेति ॥

End :

आनन्दतीर्थ इति तु यस्य नाम तृतीयकम् ।
पूर्णप्रज्ञेन तेनेदं कृतं भाष्यं हरेः प्रियम् ॥

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमच्छान्दोग्योपनिषद्भाष्यस्य टीकायां वेदव्यासतीर्थपूज्यपादशिष्यवेदेशभिक्षुविरचितायां पदार्थकौमुद्यां तृतीयोऽध्यायः समाप्तः ॥

226

Sl. No. 1200 जाबालोपनिषत् Ms. No. P.1973/3

Beginning :

बृहस्पतिरुवाच याज्ञवल्क्यम्- यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । तस्माद्यत्र क्वचन गच्छति तदेव मन्येत तदविमुक्तमेव । + + + तस्मादविमुक्तमेव निषेवेत- अविमुक्तं न विमुञ्चेत् । एवमेवैतद्याज्ञवल्क्यः ॥

End :

यथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहः तत्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः + + + स्थण्डिलेष्वनिकेतवास्य प्रयत्नो निर्ममश्शुक्लध्यानपरायणोऽध्यात्म × × × × × × × सन्यासेन देहत्यागं करोति स परमहंसो नामेति ॥

Colophon :

जाबाले चतुर्थः खण्डः । जाबालोपनिषत् समाप्ता ॥

227

Sl. No. 1208 जाबालोपनिषद्भाष्यम् Ms. No. A. 166/5

Beginning :

यत्राविमुक्तसन्यासौ याज्ञवल्क्योऽब्रवीन्मुनिः ।
तां जाबालोपनिषदं व्याख्यास्ये पुरुषार्थदाम् ॥

अत्रादौ बृहस्पतियाज्ञवल्क्ययोस्संवादः ॥ बृहस्पतिरिति ॥ देवाचार्यः याज्ञवल्क्यं महर्षिमुवाच- यदनु कुरुक्षेत्रमित्यादेः प्रथमखण्डस्य तारसारोपनिषदि प्रकृतत्वात्तत्रैव व्याख्या भविष्यति ॥

End :

सन्यासेन देहत्यागं करोतीति सर्वकर्माचरणसाधनीभूतस्य देहस्य त्यागे कृते सति स्वेच्छा चारानवकाशात्। तस्मात् ++ सन्यासधर्माणां प्रपञ्चयिष्यमाणत्वादत्र सङ्ग्रहः कृत इत्यवगन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ जाबालोपनिषद्भाष्यं समाप्तम् ॥

228

Sl. No. 1210 **जाबाल्युपनिषत्** Ms. No. A. 167/33

Beginning :

ॐ आप्यायन्त्विति शान्तिः। अथ हैनं भगवन्तं जाबालिं पैप्पलादिः पप्रच्छ भगवन् मे ब्रूहि-परमतत्त्वरहस्यं। किं तत्वं ? + को मोक्षोपाय ? इति। स तं होवाच– कुतस्त्वया ज्ञातमिति ॥

End :

यो विद्वान् ब्रह्मचारी + + समस्तमहापातकोपपातकेभ्यः पूतो भवति ; स सर्वान् वेदानधीतो भवति ; न स पुनरावर्तते ; इत्यों सत्यमित्युपनिषत् ॥

Colophon:

जाबाल्युपनिषत्समाप्ता ॥

229

Sl. No. 1231 **जाबाल्युपनिषद्भाष्यम्** Ms. No. A. 167/34

Beginning :

पशुपाशविमोक्षाय विभूतेर्यत्र धारणम् ।
साधनं प्राह जाबालिः श्रुतिं व्याख्यातुमुद्यमः ॥

अथेति। जाबालिनामकं + + पैप्पलादिं– पिप्पलादस्यापत्यं पप्रच्छ– पृष्टवान् ॥

End :

इति पृच्छन्तं पैप्पलादिं जाबालिरुवाच– विभूतिधारणादेवेति ॥ तत्प्रकारः कथमित्यादि स्पष्टार्थमन्यत्। कैवल्योपनिषदाद्यासु व्याख्यातञ्च ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ जाबाल्युपनिषद्भाष्यं समाप्तम् ॥

230

Sl. No. 1215 ज्वरोपनिषत् Ms. No. P. 5972/5

Beginning :

त्रिपाद्भस्मप्रहरणः त्रिशिरा रक्तलोचनः ।
स मे प्रीतस्सुखं दद्यात्सर्वामयपतिर्ज्वरः ॥

तत्पुरुषाय विद्महे एकदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ।

End :

जपकर्तुर्ब्राह्मणस्य दक्षिणां ददाति हिरण्यवस्त्रव्रीहितिलानीत्याह भगवान् बोधायनः ॥

Colophon :

— — —

231

Sl. No. 1216 तारसारोपनिषत् Ms. No. P. 4136/21

Beginning :

पूर्णमद इति शान्तिः । बृहस्पतिरुवाच— याज्ञवल्क्यम् । यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । तस्माद्यत्र क्वचन गच्छेत् तदेव मन्येतेतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अत्र हि जन्तोः प्राणेषु उत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे ॥

End :

प्रणवानामयुतं जप्तं भवति । दशपूर्वान् दशोत्तरान् पुनाति ; नारायणपदमवाप्नोति । य एवं वेद । तद्विष्णोः परमं पदं पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् ; इत्युपनिषत् ॥ पूर्ण मद इति शान्तिः ॥

Colophon :

सामवेदस्तृतीयः पादः । तारसारोपनिषत् समाप्ता ॥

232

Sl. No. 1217 **तारसारोपनिषत्** Ms. No. A. 167/13

Beginning :

ॐ पूर्णमद इति शान्तिः । बृहस्पतिरुवाच— याज्ञवल्क्यम् । यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां दैवतेनां ब्रह्मसदनम् । तस्माद्यत्र क्वचन गच्छेत्तदेव मन्येतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां + + + + प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे ॥

End :

प्रणवानामयुतं जप्तं भवति । दशपूर्वान् दशोत्तरान् पुनाति । नारायणपदमवाप्नोति ; य एवं वेद । तद्विष्णोः परमं पदं + + पदमित्युपनिषत् । पूर्णमद इति शान्तिः ॥

Colophon :

सामवेदस्तृतीयः पादः । इति तारसारोपनिषत्समाप्ता ॥

2 33

Sl. No. 1220 **तारसारोपनिषद्भाष्यम्** Ms. No. A. 167/14

Beginning :

संसारतारकं यत्र सारभूतं निगद्यते ।
तारसाराभिधामेनां व्याख्यास्ये श्रुतिमद्भुताम् ॥

बृहस्पतिरिति ॥ देवाचार्यः याज्ञवल्क्याख्यं महर्षिमुवाच— उक्तवान् । कथमिति तदाह— अनित्यनर्थको निपातः ॥

End :

तत्परः परमात्मा श्रीराम इति विभज्योक्तत्वात् । तस्मादद्वैतब्रह्मदृष्ट्या सर्वं समञ्जसमवगन्तव्यम् । तद्विष्णोः परमं पदमित्याद्यन्यत्र व्याख्यातमेव ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ तारसारोपनिषद्भाष्यं समाप्तम् ॥

234

Sl. No. 1223 | तुरीयातीतावधूतोपनिषत् | Ms. No. P. 4136/8

Beginning :

पूर्णमद इति शान्तिः । अथ तुरीयातीतावधूतानां कोऽयं मार्गस्तेषां का स्थितिरिति पितामहो भगवन्तं पितरमादिनारायणं परिसमेत्योवाच । तमाह भगवान्नारायणो योऽयमवधूत-मार्गस्थो लोके दुर्लभतरो न तु बाहुल्यो यद्येको भवति स एव नित्यपूतस्स एव वैराग्यमूर्तिस्स एव ज्ञानाकारस्स एव वेदपुरुष इति ज्ञानिनो मन्यन्ते ॥

End :

त्यक्तवर्णाश्रमाचारस्सर्वदा दिवानक्तं सत्वेनास्वप्नः सर्वत्र सर्वदा संचारशीलो देहमात्राव-शिष्टो जलस्थलकमण्डलुः सर्वदाऽनुन्मत्तो बालोन्मत्तपिशाचवदेकाकी संचरन् सम्भाषणपरस्तद्रूप-ध्यानेन निरालम्बमवलम्ब्य स्वात्मनिष्ठानुकूलेन सर्वं विस्मृत्य तुरीयातीतोऽवधूतवेषेण अद्वैतनिष्ठापरः प्रणवात्मकत्वेन देहत्यागं करोति यस्सोऽवधूतः स कृतकृत्यो भवतीत्युपनिषत् । पूर्णमद इति शान्तिः ॥

Colophon :

तुरीयातीतावधूतोपनिषत् समाप्ता ॥

235

Sl. No. 1227 | तुरीयातीवतावधूतोपनिषत् | Ms. No. 3682/35

Beginning :

तुर्यातीतसन्यासपरिव्राजाक्षमालिका ।
अव्यक्तैकाक्षरं पूर्णा सूर्याक्ष्य्यात्मकुण्डिका ॥

अथतुरीयातीतावधूतोपनिषत्—

तुर्यातीताख्योपनिषद्वेद्यं यत्परमाक्षरम् ।
तत्तुर्यातीतचिन्मात्रं स्वमात्रं चिन्तयेऽन्वहम् ॥

ॐ पूर्णमद इति शान्तिः । अथ तुरीयातीतावधूतानां कोऽयं मार्गस्तेषां का स्थितिरिति ॥

End :

त्यक्तवर्णाश्रमाचारः सर्वदा दिवानक्तसमत्वेनास्वप्नः + + + + सर्वं विस्मृत्य तुरीयातीतावधूतवेषेणाद्वैतनिष्ठापरः प्रणवात्मकत्वेन देहत्यागं करोति यस्सोऽवधूतः । स कृतकृत्यो भवतीत्युपनिषत् ॥

Colophon :

इति तुरीयातीतावधूतोपनिषत् समाप्ता ॥

236

Sl. No. 1228 — तुरीयातीतोपनिषद्भाष्यम् — **Ms. No. B. 247/25**

Beginning :

कुटीचकादींश्चतुरश्चाश्रमांस्त्यजतो यया ।
मुक्तिर्व्याख्यास्यते सैषा तुर्यातीतश्रुतिः परा ॥

नन्विह लोके अवधूतमार्गस्थो दुर्लभतर इत्युक्तम् । न तथा दृश्यते । त्यक्तवर्णाश्रमाणां + + दृश्यमानत्वात् ॥

End :

सूक्ष्मकारणदेहयोर्ब्रह्मणि स्वस्वरूपे विलीनत्वेऽपि प्रारब्धस्य स्थूलदेहस्य भूमौ पतनयोग्यत्वात्तस्यागं करोति । ईदृशो यः सोऽवधूतः कृतकृत्य इति ॥

Colophon :

इत्यप्पयदीक्षितकृतिषु तुरीयातीतोपनिषद्भाष्यं समाप्तम् ॥

237

Sl. No. 123 — तेजोबिन्दूपनिषत् — **Ms. No. P. 5717/9**

Beginning :

तेजोबिन्दुपरं ध्यानं विश्वातीतं हृदि स्थितम् ।
आणवं शाम्भवं शान्तं स्थूलं सूक्ष्मं परं च यत् ॥
दुःखाढ्यं च दुराराध्यं दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
दुर्लभं तत्स्वयं ध्यानं मुनीनां च मनीषिणाम् ॥

End :

शीतोष्णं च क्षुत्पिपासां च सङ्कल्पं च विकल्पकम् ।
न ब्रह्म कुलधर्मं च न मुक्तं ग्रन्थसञ्चयम् ॥
न भयं सुखदुःखं च तथा मानावमानयोः ।
एतद्भ्रमविनिर्मुक्तं तद्ब्रह्म ब्रह्म तत्परम् ॥

तद्ब्रह्म ब्रह्मतत्परम् इति ॥

Colephon :

इति तेजोबिन्दूपनिषत्समाप्ता ॥

238

Sl. No. 1232 तेजोबिन्दूपनिषत् Ms. No. A. 167/9

Beginning :

सह नाववत्विति शान्तिः ॥

तेजोबिन्दुपरं ध्यानं विश्वात्महृदि संस्थितम् ।
आणवं शाम्भवं शान्तं स्थूलं सूक्ष्मं परञ्च यत् ॥ १ ॥
दुःखाढ्यं च दुराराध्यं दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
दुर्लभं तत्स्वयं ध्यानं मुनीनां च मनीषिणाम् ॥ २ ॥

End :

सम्यक् परीक्ष्य दातव्यं मासं षाण्मासवत्सरम् ।
सर्वोपनिषदभ्यासं दूरतस्त्यज्य सादरम् ॥ १०७ ॥
तेजोबिन्दूपनिषदमभ्यसेत्सर्वदा मुदा ।
सकृदभ्यासमात्रेण ब्रह्मैव भवति स्वयम् ॥ १०८ ॥

इत्युपनिषत् ॥

Colophon :

षष्ठोऽध्यायः । तेजोबिन्दूपनिषत्समाप्ता ॥

239

Sl. No. 1234 **तेजोविन्दूपनिषद्भाष्यम्** Ms. No. A. 167/10

Beginning :

सरूपारूपयोर्यत्र ब्रह्मणोरस्ति सङ्गतिः ।
तेजोविन्दूपनिषदं व्याख्यास्ये ग्रन्थसङ्ग्रहात् ॥

तेज इति ॥ तेजः—सप्रतियोगिकत्वेनैव विन्दुवदखण्डवर्तुळाकारम् । तत्परं तद्विषयम् । विश्वात्मनां समस्तजीवानां हृदयेऽवस्थितम् ॥

End :

अथेमामेवोपनिषदं सर्वदाभ्यसेदिति सार्धेनाह सर्वेति । एतद्व्यतिरिक्तसर्वोपनिषदभ्यासं च दूरतस्सन्त्यज्य सादरमिमां तेजोविन्दुसंज्ञामुपनिषदं सर्वदा ब्रह्मानन्दसहितोऽभ्यसेत् । सकृत्पारायणफलमाह— सकृदभ्यासमात्रेण स्वयं क्रमेण ब्रह्मैव भवतीत्युपनिषत् ॥

Colophon :

इति षष्ठोऽध्यायः । इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ तेजोबिन्दूपनिषद्भाष्यं समाप्तम् ॥

240

Sl. No. 1277 **तैत्तिरीयोपनिषद्भाष्यव्याख्या (वनमाला)** Ms. No. P. 74

Beginning :

विघ्नेश्वरं विघ्नशान्त्यै वाणीं वाचः प्रवृत्तये ।
गुरून् गूढार्थमानाय प्रणमामि निरन्तरम् ॥
जगन्मङ्गलरूपाय सृष्टिस्थित्यन्तकारिणे ।
नमो लक्ष्मीसमेताय कृष्णाय परमात्मने ॥
परिपूर्णं नित्यशुद्धं निर्विशेषं स्वयंप्रभम् ।
सत्यानन्दस्वरूपं यत्तदहं ब्रह्म निर्भयम् ॥
आचार्यस्य प्रसादेन पूर्वपुण्यैकजन्मना ।
तैत्तिरीयकभाष्यस्य व्याख्यां कुर्वेऽतिभक्तितः ॥

तैत्तिरीयकोपनिषदं व्याचिख्यासुर्भगवान् भाष्यकारः तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन सामान्येनोपलक्षितं सत्यज्ञानात्मना स्वरूपलक्षणेन विशेषतो निश्चितं नमस्करोति– यस्माज्जातमिति ॥

End :

य एवं वेदेत्यत्र एवं शब्दार्थमाह– भृगुवदिति। वेद– सम्पादयतीत्यर्थः । यथोक्तमिति । ब्रह्मभावलक्षणमित्यर्थः । मङ्गलार्थमोंकारमुच्चारयति– ओमितीति ॥

अन्नप्राणमनोबुद्धिसुखैः पञ्चभिरुज्वला ।
भगवत्यर्पिता जीयाद्वनमाला कृतिर्मम ॥
नारायणपदद्वन्द्वं नारदादिभिरादृतम् ।
नमामि शतशो नित्यं नमतां मुक्तिदाकम् ॥

Colophon :

इति श्रीमत्स्वयम्प्रकाशानन्दसरस्वतीचरणारविन्दसंलग्नरजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ तैत्तिरीयकभाष्यव्याख्यायां भृगुवल्लीभाष्यव्याख्या समाप्ता ॥

241

Sl. No. 1280 तैत्तिरीयोपनिषद्भाष्यम् Ms. No. P. 2004/1

Beginning :

. × × × × × × × × × × ×
इह खलु संसारावर्तपरिवर्तपरिश्रान्तमानसैः तदुत्तरणवुभुत्सुभिः सर्वैश्चेतनै × × × समाश्रयणीयः । तत्रापि मुमुक्षुभिर्विशेषतश्चात्यन्तः सेव्यः । तत्रापि तैत्तिरीयारण्यमध्यपातिन्यस्सांहित्य–

End :

य एवं विद्वानित्यादिनैतद्वने (?) फलं दर्शयति– एवमात्मयागबन्मरणानन्तरं सूर्याचन्द्रमसोर्म × × × × × ब्रह्मणः– पुरुषोत्तमस्य, महिमानं– महत्त्वं प्राप्नोति । समाप्तिद्योतिनी वाक्यवृत्तिः । ब्राह्मणग्रहणं प्रदर्शनार्थम् । सर्वोऽपि विद्वान् सूर्याचन्द्रमसोर्महिमानमभिजयति । तस्मादेव हेतोर्ब्रह्मणो महिमानं प्राप्नोति इत्युपनिषत् ॥

Colophon :

इति नारायणदासीयतैत्तिरीयोपनिषद्व्याख्याने याज्ञिक्य उपनिषदः समाप्ताः ॥

242

Sl. No. 1282 **तैत्तिरीयोपनिषद्भाष्यम्** Ms. No .B. 246/6

Beginning :

श्रीमन्तं सुन्दरेशाख्यं तातपादं गुरूत्तमम् ।
प्रणम्य भाष्यं कुर्वेऽहं तैत्तिरीयाभिधश्रुतेः ॥

'शिक्षां व्याख्यास्यामः' इत्यारभ्य 'तेषु वर्तेरन्' इत्यन्तानामुपनिषद्वाक्यानां विस्पष्टार्थत्वात् 'ब्रह्मविदाप्नोति परम्' इत्यारभ्य सङ्ग्रहेण भाष्यं विरच्यते ॥

End :

यः पुनः अन्यो मामदत्वार्थिभ्योऽन्नमत्ति तदन्नं अहमन्नमेव सन् अद्मि प्रत्यद्मि। अहं विश्वं समस्तभुवनं + + + + भुवनमस्यभवं– अभिभवामि । सुवर्णं सुवरादित्य इत्यर्थः । आदित्य इव सकृद्विभातं मदीयज्योतिः, सुवर्णज्योतिः । ज्योतिः प्रकाश इत्यर्थः । इतीयं वल्लीद्वयोपहितोपनिषत् । अम्भस्य पार इत्याद्युपनिषद्वाक्यानि विस्पष्टार्थत्वान्न व्याख्यायन्ते ॥

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ तैत्तिरीयोपनिषद्भाष्य समाप्तम् ॥

243

Sl. No. 1295 **तैत्तिरीयोपनिषत्खण्डार्थः** Ms.No. B. 40

Beginning :

श्रीप्राणतीर्थमानम्य व्यासतीर्थोक्तमार्गतः ।
तैत्तिरीयोपनिषत्सद्दलार्थः प्रकाश्यते ॥

इहामुत्र फलभोगविरक्तस्य शमदमादिमतः मुमुक्षोः अधिकारिणः सांसारिकसर्वानिष्ट-निवृत्तये तैत्तिरीयोपनिषत् प्रवृत्ता ॥

End :

अन्नमयादिनामकानिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवनारायणात्मा विष्णुः । ज्ञानानन्दाद्यनन्तगुणै-रुपेतत्वात् ओम् । सुखपराकाष्ठात्वात् शान्तिः । एतद्विद्याप्रतिपाद्यसर्वार्थावधारणाय शान्तित्रयम् ॥

विद्याधीशार्यशिष्येण नृसिंहाख्येन भिक्षुणा ।
तैत्तिरीयमहाविद्यागुरूक्तार्थः प्रकाशितः ॥

Colophon :

इति तैत्तिरीयोपनिषत्खण्डार्थः समाप्तः ॥

244

Sl. No. 1296 त्रिपाद्विभूतिमहानारायणोपनिषत् Ms. No. C. 2560/1

Beginning :

भद्रं कर्णेभिरिति शान्तिः । ओं अथ परमतत्त्वरहस्यं जिज्ञासुः परमेश्वरः देवमानेन सहस्रसंवत्सरं तपश्चकार । सहस्रवर्षेऽतीतेऽत्युग्रतीव्रतपसा प्रसन्नं भगवन्तं महाविष्णुं ब्रह्मा परिपृच्छति– भगवन् परमतत्त्वरहस्यं मे ब्रूहीति । + + + तदेवोच्यते– त्वमेव सर्वज्ञः + + + + न किञ्चिदस्ति त्वद्व्यतिरिक्तम् ॥

End :

आवयोर्थ इमं संवादमध्येष्यति स नरो ब्रह्मनिष्ठो भवति । श्रद्धावान् अनसूयुरशृणुयात्पठति वा य इमं संवादमावबोस्स पुरुषो मत्सायुज्यमेति । ततो महाविष्णुस्तिरोदधे । ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ॥

Colophon :

उत्तरकाण्डस्समाप्तः । इत्याथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपनिरूपणं नामाष्टमोऽध्यायः ॥

245

Sl. No. 1299 त्रिपाद्विभूतिमहानारायणोपनिषत् Ms. No. C. 3682/22

Beginning :

यत्रापह्नवतां याति स्वाविद्यापदविभ्रमः ।
तत्प्रतिपन्नारायणाख्यं स्वमात्रमवशिष्यते ॥

ओं भद्रं कर्णेभिरिति शान्तिः । अथ परमतत्त्वरहस्यं जिज्ञासुः परमेष्ठी देवमानेन सहस्रसंवत्सरं तपश्चकार । सहस्रवर्षेऽतीते + + + तपसा प्रसन्नं + + महाविष्णुं

ब्रह्मा परिपृच्छति— भगवन् परमरहस्यं मे ब्रूहीति। परमरहस्यवेत्ता + + + त्वमेव सर्वेश्वरः + + + न किञ्चिदस्ति त्वव्यतिरिक्तम् ॥

End :

आवयोर्थ इमं संवादं + + + श्रद्धावाननसूयुः, शृणुयात्पठति वा य इमं संवादमावयोस्स पुरुषो मत्सायुज्यमेति। ततो महाविष्णुस्तिरोदधे। ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ॥

Colophon :

इत्याथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपनिरूपणं नाम अष्टमोऽध्यायः। इति त्रिपाद्विभूतिमहानारायणोपनिषत्समाप्ता ॥

246

Sl. No. 1298 त्रिपुट्युपनिषत् Ms. No. P. 8252

Beginning :

पञ्चात्मकं पञ्चनुवर्तमानं षडाश्रयं षड्गुणयोगयुक्तम्।
तं सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम् ॥

शब्दस्पर्शरूपरसगन्धादयः पञ्च ॥

End :

आनन्दमय्ययं विद्वान् न बिभेति कुतश्चनेति। न बिभेति कुतश्चनेति। अहमानन्दोऽहमानन्दोऽहमानन्दमयः ॥ सह नाववतु + + शान्तिः ॥

Colophon :

इत्यथर्ववेदे त्रिपुट्युपनिषत्समाप्ता ॥

247

Sl. No. 1299 त्रिपुण्ड्रोपनिषत् Ms. No. P. 6521

Beginning :

ॐ नमो ब्रह्मादिभ्यो + + गुरुभ्यः। अथ कालाग्निरुद्रोपनिषदं भगवन्तं सनत्कुमारः पप्रच्छ— किं द्रव्यम्। + स होवाच— भगवान् कालाग्निरुद्रः + + अथ सनत्कुमारः प्रमाणमस्य त्रिपुण्ड्रधारणस्य त्रिधा च रेखा। आललाटादाचक्षुष आभ्रुवोरामध्यतश्च ॥

End :

त्रिपुण्ड्रं भस्मना करोति यो विद्वान् ब्रह्मचारी वानप्रस्थो यतिर्वा स महापातकोपपातकेभ्यः पूतो भवति । देहं त्यक्त्वा + न स पुनरावर्तते ; इत्याह भगवान् कालाग्निरुद्रः । ॐ शान्तिः ॥

Colophon :

— — — —

248

Sl. No. 1304 त्रिपुरतापिन्युपनिषत् Ms. No. B. 636

Beginning :

भद्रंकर्णेभिरिति शान्तिः ॥

त्रिपुरातापिनीविद्यावेद्यचिच्छक्तिविग्रहम् ।
वस्तु चिन्मात्ररूपं तु परतत्त्वं भजाम्यहम् ॥

ॐ, अथैतस्मिन्नन्तरे भगवान् प्रजापतिं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवतीत्येवमादिशक्त्या भूर्भुवस्सुवस्त्रीणि + + व्याप्नोति । सैवेयं भगवती त्रिपुरेति व्यापठ्यते ॥

End :

तस्मादाकाशजं बीजं विद्यात्– एकाक्षरीपीठं + + + + + यो जानीते सोऽमृतत्वं गच्छति । तस्मादेतां विद्यां तुरीयां श्रीकामराजीयामेकादशधा भिन्नां एकाक्षरं ब्रह्मेति यो जानीते स तु तुरीयं पदं प्राप्नोति । य एवं वेदेति महोपनिषत् । पञ्चमोपनिषत् । भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

इति त्रिपुरोपनिषत्तापनीयस्समाप्तिमगमत् ॥

249

Sl. No. 1306 त्रिपुरातापिन्युपनिषत् Ms. No. B. 1039/10

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः । देवा ह वै भगवन्तमब्रुवन्– स्वामिन्नः कथितं स्पष्टं क्रियाकाण्डं सविषयं त्रैपुरमथ परमं निर्विशेषं कथयस्वेति । तान् होवाच भगवान्– तुरीयया माययान्त्यया निर्दिष्टं परं ब्रह्मेति ॥

End :

तस्मादेतां तुरीयां श्रीकामराजीयां एकादशधा भिन्नां एकाक्षरं ब्रह्मेति यो जानीते स तुरीयं पदं प्राप्नोति । य एवं वेदेति महोपनिषत् ॥

Colophon :

इति त्रिपुरातापनोपनिषन् (?) समाप्ता ॥

250

Sl. No. 1308 देवीसुन्दरीतापनीयोपनिषत् Ms No. P. 5795/6

Beginning :

अथैतस्मिन्नन्तरे भगवान् प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवत्येवमादिश्रुत्या भूर्भुवस्सुवरोमिति त्रीणि पुराणि स्वर्गभूपातालानि त्रिपुराणि ॥

End :

शिरसि रूढं प्रज्वलितदहनो ज्वालोल्लासिन्यत्रिमात्रां मेधाया कलाकल्प इति प्रथमस्याहः प्रतिष्ठाकलाया पुरुषादिकलान्तेन तत्त्वषट्केन पुरुषषट्कं रागपंचकं विद्यानियतिकलाकालेषु प्रत्येकं + + + + भुवनेह इति ॥

Colophon :

इत्याथर्वणे सुन्दरीतापनीये षष्ठोपनिषत् ॥

251

Sl No. 1312 त्रिपुरातापिनीभाष्यम् Ms No. B. 570/1

Beginning :

बालार्कायुतभास्करां + + + श्रीषोडशार्णां भजे ॥ १ ॥
प्रोद्यद्विद्युत्सहस्रद्युतिनिरवधिकस्फार + +
+ + + + + षोडशी ब्रह्मविद्या ॥ २ ॥
प्रणम्य परमां देवीं सुरब्रह्मस्वरूपिणीम् ।
त्रिपुरातापिनीभाष्यं करोमि कृपया गुरोः ॥

त्रिपुरा नाम आद्या शक्तिरनवच्छिन्ना पराभट्टारिका शिवादिक्षित्यन्तषट्त्रिंशत्तत्त्वमयसर्वप्रपञ्चात्मिका तदुत्तीर्णा चेति सर्वोपनिषत्सु सिद्धम् ॥

End :

अथ– अनन्तरं, सर्वं– कृत्स्नं, जगत्– स्थावरजङ्गमात्मकं प्रपञ्चजातं, व्याप्य– अन्तर्बहिश्चावृत्त्य, स्थितवत्यासीत्– स्थिताऽभवत् । इत्येवं भगवान्याज्ञवल्क्याचार्यः शिष्याय सामश्रवसे उक्तवानितिशेषः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यराघवानन्दतीर्थचरणारविन्दचञ्चरीकायमाणश्रीरामानन्द-तीर्थविरचितं त्रिपुरापूर्वतापनीभाष्यं समाप्तिमगमत् ॥

252

Sl. No. 1313 त्रिपुरापूर्वतापिन्युपनिषत् Ms. No. SB. 634/3

Beginning :

हरिः ओं। स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । अहं ब्रह्मास्मि । ब्रह्मैवाहमस्मि । ओं विज्ञानं ब्रह्म । प्रज्ञानं ब्रह्म । ओं तत्त्वमसि । + + + + ओं शान्तिः एवं त्रिः ॥

अथ श्रीविद्यामनोः आम्नायस्वरूपमुपदिश्येत– ब्रह्मचारिणे शान्ताय गुरुभक्ताय यथा विद्यामनुः । कस्मिन् उद्भवः तस्य × ब्रूहि इति होवाच । शृणु सौम्य । ब्रह्मोवाच ॥

End :

अथ सुषुम्नामार्गेण तेजोरूपेण उपासकाननुप्रविश्य मेरुशृङ्गे राति प्रकाशरूपेण अथ सर्वं जगद्व्याप्य स्थितवत्यासीदिति भगवान् याज्ञवल्क्यः । य एवं वेद । य एवं वेदेत्युपनिषत् । स यश्चायं पुरुषे । ओं शान्तिः ॥

Colophon :

इति पूर्वतापनीयः समाप्तः ॥

253

Sl. No. 1314 तारसारोपनिषत् Ms. No. B. 634/3a

Beginning :

अथ भगवन् खलु परमहंसात्मकं ब्रूहि– सा ब्रह्मविद्या मनूनां सर्वेषां सुतानां प्रथमा श्रीविद्या । ब्रह्मविद्याऽन्या व्याप्य । आद्यपक्षो यदि ब्रह्मसदृशविद्या वा ब्रह्मैव विद्या वा ॥

End :

अतस्तस्मान्मन्त्रोपहितो शक्तयो घटः कलश इति एकार्थवाचकमन्त्रो देवता । गुरुश्चात्र एकार्थवाचकत्वे तासां मन्त्राणां तथा नीतिं बुध्वा पुरुषार्थिदानुभवेद्य एवं वेद ; य एवं वेदे-त्युपनिषत् । स यश्चायं + + + + ओं विज्ञानमानन्दं ब्रह्म । अयमात्मा ब्रह्म । ओं ब्रह्मज्योतिरथोम् । ओं शान्तिश्शान्तिः ॥

Colophon :

इत्युत्तरतापिनी समाप्ता ॥

254

Sl. No. 1316 **त्रिपुरोपनिषत्** **Ms. No. P. 2350/2**

Beginning :

तिस्रः पथः त्रिपथा विचर्षणी
अत्राकथा अक्षराः सन्निविष्टाः ।
अधिष्ठायैनामजरा पुराणी
महत्तरा महिमा देवतानाम् ॥

End:

इयं महोपनिषत् त्रैपुर्यामक्षयं परमो गीर्भिरीट्टे ।
एषर्ग्यजुःपरमेतच्च सामाऽयमथर्वोऽयमन्या च विद्या ॥
ॐ ऐं ह्रीं ऐं ह्रीं इत्युपनिषत् ॥

Colophon :

त्रिपुरोपनिषत् समाप्ता ॥

255

Sl. No. 1329 **त्रिपुरोपनिषद्भाष्यम्** **Ms. No. P. 5795/1a**

Beginning :

सहस्रदलपद्मे स्वनाथाङ्घ्र्यब्जद्वये सति ।
कमले कमलोत्पत्तिर्न दृष्टेत्युक्तयः कथम् ॥

श्रीसाङ्ख्यायनकल्पसूत्रविधिभिः कर्माणि ये कुर्वते
येषां शाकल एव मन्त्रनिचयः कौषितकं ब्राह्मणम् ।
+ + + + + +
ऋग्भिःषोडशभिर्महोपनिषदं व्याकुर्महे तां वयम् ॥

End :

तत्र वाचामप्रवृत्तेरित्याशयेन श्रुतौ मौनगास्थितम् । उपनिषत् समाप्तेत्यर्थः । इतोऽधिकस्य वक्तव्यांशस्याभावादित्यर्थः ॥

इति भास्कररायेणाग्निजिता त्रिपुरामहोपनिषदर्थाः ।
प्रकटितुमयोग्या अपि विदुषां तोषाय कतिपये कथिताः ॥

Colophon :

इति भास्कररायेणाग्निचिता विरचितं त्रिपुरोपनिषद्भाष्यं समाप्तम् ॥

256

Sl. No. 1333 त्रिपुरोपनिषद्भाष्यम् Ms. No. B. 247/42

Beginning :

यत्र निर्दिश्यते ब्रह्म चिच्छक्त्या तुर्यमायया ।
सैषा व्याख्यास्यते साध्वी त्रिपुरातापिनी श्रुतिः ॥

ननु मनो हृदि निरोधनेनामनीभावं क्षयं गच्छतीत्येतदयुक्तम् ; कुतः ? हृदि प्रत्यगात्मन एव परिच्छिन्नस्य विद्यमानत्वेन तस्मिन् मनोनाशासम्भवात् ॥

End :

यो जानीते सोऽमृतत्वं गच्छतीत्याह— अतः पर एवात्माऽऽकाशः । तस्मादेतां तुरीयां कामराजीयां त्रिपुरां परां शक्तिमेकाक्षरं ब्रह्मेति यो जानीते स तुरीयं पदं प्राप्नोति ॥

Colophon :

इति त्रिपुरोपनिषद्भाष्यं समाप्तम् ॥

257

Sl. No. 1336 त्रिशिखब्राह्मणोपनिषत् Ms. No. P. 3581/34

Beginning :

भद्रं कर्णेभिरिति शान्तिः । त्रिशिखी ब्राह्मण आदित्यलोकं जगाम । तमादित्यं नत्वा भगवन् किं देहः ? किं प्राणः ? किं कारणः ? किमात्मा ? तं होवाच— सर्वमिदं शिव एव विजानीहि ॥

End :

शुद्धसत्त्वे परे लीना जीवसैन्धवपिण्डवत् ।
मोहजालकनिर्मुक्तो विश्वं पश्यति स्वप्नवत् ॥
सुषुप्तिवच्चरति स्वभावपरिनिश्चलः ।
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥

योगी कैवल्यमश्नुत इति ॥

Colophon:

त्रिशिखब्राह्मणोपनिषत्समाप्ता ॥

258

Sl. No. 1342 **त्रिशिखीब्राह्मणोपनिषद्भाष्यम्** Ms. No. B. 447/2

Beginning :

तत्त्वोत्पत्तिक्रमोऽष्टाङ्गयोगः प्रोच्येत एव च ।
सेयं व्याख्यास्यते मुक्त्यै त्रिशिखीब्राह्मणश्रुतिः ॥

अत्र अविद्याशब्दोऽव्यक्तशब्दार्थः । अव्यक्तशब्दोऽविद्याशब्दार्थश्चावगन्तव्यौ । कुतः ? अव्यक्तस्य कारणत्वप्रसिद्धेरविद्यायाः कार्यत्वप्रसिद्धेश्च ॥

End :

न च जीवस्य पूर्वं ब्रह्मणस्सकाशादेवोत्पन्नत्वात्तथा पुनश्चोत्पत्तिस्स्यादिति वाच्यम्; सप्रतियोगिकब्रह्मणस्सकाशादुत्पन्नत्वान्निष्प्रतियोगिके विलीनत्वाच्च । तस्मान्न कथञ्चन पुनरुत्पत्तिप्रसङ्ग इति सर्वमनवद्यम् ॥

Colophon :

इत्यप्पय्यदीक्षिताचार्यकृतिषु त्रिशिखीब्राह्मणोपनिषद्भाष्यं समाप्तम् ॥

259

Sl. No. 1344 **दक्षिणामूर्त्युपनिषत्** Ms. No. B. 247/9

Beginning :

सह नाववत्विति शान्तिः । ॐ मेधादक्षिणामूर्तये नमः । ब्रह्मावर्ते महाभाण्डीरवटमूले महासत्राय समेता महर्षयः + + तत्त्वजिज्ञासवः मार्कण्डेयं + + उपसमेत्य

पप्रच्छुः– केन त्वं चिरजीव्यसि । ज्ञानेनेति स होवाच । किं तत्परमरहस्यशिवतत्त्वज्ञानम् ? + + + सहोवाच– येन दक्षिणामुखः शिवोऽपरोक्षीकृतो भवति– तत्परमरहस्यतत्त्वज्ञानम् ॥

End :

शेमुषी दक्षिणा प्रोक्ता सा यस्यामीक्षणे मुखम् ।
दक्षिणाभिमुखः प्रोक्तः शिवोऽसौ ब्रह्मवादिभिः ॥

सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं स्वसामर्थ्यमाप्य कृतोषवाञ्छितार्थांश्च लब्ध्वा सोऽस्योपासको भवति । य इमां परमरहस्यशिवतत्त्वविद्यामधीते स सर्वपापेभ्यो मुक्तो भवति । य एवं वेद ; स कैवल्यमनुभवति ; इत्युपनिषत् ॥

Colophon :

इति दक्षिणामूर्त्युपनिषत् समाप्ता ॥

260

Sl. No. 1350 दक्षिणामूर्त्युपनिषद्भाष्यम् Ms. No. B. 247/11c

Beginning :

दक्षिणामूर्तिशब्दोऽपि परब्रह्मार्थको मतः ।
दक्षिणामूर्त्युपनिषत्सेयं व्याख्यास्यतेऽधुना ॥

नन्विह येन दक्षिणामुखः शिवोऽपरोक्षीकृतो भवति तत्परमरहस्यशिवतत्त्वज्ञानमित्युक्तम् ॥

End :

अथ कोवास्योपासक इति प्रश्नस्य प्रतिवचनमाह– सर्गादिकाल इति । + + + नचैवमपि सगुणमूर्त्युपासनमेव सावकाशं ; न तु निर्गुणामूर्तदक्षिणाभिमुखोपासनमिति शङ्क्यम् ; तन्निर्गुणस्वरूपापरोक्षज्ञानस्य चाहं शिवोऽस्मीति तदुपासनयैव लब्धत्वात् । तस्मात् य एवं वेद स कैवल्यमनुभवतीति युक्तमुक्तम् ॥

Colophon :

इति दक्षिणामूर्त्युपनिषद्भाष्यं समाप्तम् ॥

261

Sl. No. 1353 **दत्तात्रेयोपनिषत्** Ms. No. A. 167/27

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः । ओं सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तन्मे ब्रूहि भगवन्नित्युक्तः सत्यानन्दचिदात्मकं सात्विकं मामकं धामोपास्वेत्याह । सदा दत्तोऽह-मस्मीति प्रत्येतत् संवदन्ति ; येन ते असंसारिणो भवन्ति ॥

End :

य एवं वेद । अनुष्टुप् छन्दः । + + + दत्तात्रेयो देवता । अष्टमूर्त्यष्ट-मन्त्रा भवन्ति । यो नित्यमधीते + + + + स एव ब्राह्मणो भवति । तस्माच्छिष्यं भक्तं प्रतिगृह्णीयात् । सोऽनन्तफलमश्नुते । स जीवन्मुक्तो भवतीत्याह– भगवान्नारायणो ब्रह्माणमित्युपनिषत् ॥

Colophon :

दत्तात्रेयोपनिषत्समाप्ता ॥

262

Sl. No. 1358 **दत्तात्रेयोपनिषद्भाष्यम्** Ms. No. A. 167/28

Beginning :

श्रीमन्नारायणो यत्र दत्तात्रेयस्य तारकं ।
व्याख्यास्ये ब्रह्मणे प्राह दत्तात्रेयश्रुतीरितम् ॥

ओमिति सत्यक्षेत्रे ब्रह्मा महत्साम्राज्यं यस्य तं नारायणमुवाचेति शेषः । किं संसारतारकं तन्मे ब्रूहीति भगवन्नित्युक्तो नारायणस्सत्यानन्दचिदात्मकं + + + मामकं– मदीयं, धाम– ज्योतिरुपास्वेत्याह ॥

End :

अत्रोच्यते– ओं नमश्शिवायेत्यस्य + + प्रकृते निर्गुणब्रह्मपरत्वात् + + दत्तात्रेयपरत्वं उपपद्यते । कुतः ? + + + सगुणस्यापि दत्तात्रेयस्य परममङ्गळस्वरूप-

स्वाच्च । दत्तात्रेयमन्त्रं यो नित्यमधीते स वारवादिभूतो भवति इत्यादि स्पष्टार्थम् । जीवन्मुक्तो भवतीत्येतत्तु क्रमाभिप्रायं वचनं मन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ दत्तात्रेयोपनिषद्भाष्यं समाप्तम् ॥

263

Sl. No. 1360 दर्शनोपनिषत् Ms. No. A.167/11

Beginning :

ओं आप्यायन्त्विति शान्तिः ॥

दत्तात्रेयो महायोगी भगवान् भूतभावनः ।
चतुर्भुजो महाविष्णुर्योगसाम्राज्यदीक्षितः ॥ १ ॥
तस्य शिष्यो मुनिवरः साङ्कृतिर्नाम भक्तिमान् ।
पप्रच्छ गुरुमेकान्ते प्राञ्जलिर्विनयान्वितः ॥ २ ॥
भगवन् ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् ।
येन विज्ञातमात्रेण जीवन्मुक्तो भवाम्यहम् ॥ ३ ॥
साङ्कृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ।
यमश्च नियमश्चैव तथैवासनमेव च ॥ ४ ॥

End :

यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत्कृत्स्नं तदा भवति निर्वृतिः ॥
एवमुक्त्वा स भगवान् दत्तात्रेयो महामुनिः ।
साङ्कृतिः स्वस्वरूपेण सुखमास्तेति निर्भयः ॥

Colophon :

इति दर्शनोपनिषदुत्तराङ्गचतुष्टयम् । इति दर्शनोपनिषत्समाप्ता ॥

264

Sl. No. 1363 **दर्शनोपनिषद्भाष्यम्** Ms. No. A. 167/12

Beginning :

अष्टांगयोगद्वैविध्यं यत्र सम्यगुदीर्यते ।
दर्शनाख्योपनिषदं व्याख्यास्ये विशदं मुदा ॥
दत्तात्रेयाख्यभगवत्सांकृत्योर्गुरुशिष्ययोः ।
अवधूतोपनिषदि संबन्धोऽस्ति यथाऽत्र च ॥

को नाम दत्तात्रेय इति तत्राह– दत्तात्रेय इति । महांश्चासौ योगश्च महायोगस्सोस्यास्तीति भगवान् सर्वज्ञः । + + + + + + स एव भूतो महाविष्णुः दत्तात्रेयसंज्ञयाऽत्रिमहर्षेः पुत्रो बभूवेति ॥

End :

केचित्तु लोके प्रतिपादितप्रकारकाष्टाङ्गयोगशास्त्रानभिज्ञत्वेन वेदबाह्यतया अष्टाङ्गयोगं निन्दन्ति ; न तावता प्रकृतयोगाभ्यासनिरतानामौपनिषदोत्तमानां का चिद्धानिरस्ति । तस्मान्मुमुक्षुर्योगशास्त्रनिन्दकजनविमुखः सन् अनवरतमुक्तप्रकारकाष्टाङ्गयोगाभ्यासमेव कुर्यादिति स्थितम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ दर्शनोपनिषद्भाष्यं समाप्तम् ॥

265

Sl. No. 1365 **दीपशिखोपनिषत्** Ms. No. P. 1682/4

Beginning :

अथ दीपशिखायां या मात्रा सा मात्रा प × × भिना स भिद्यते । योऽग्निः सूर्ये योगाभ्यासेन वै पुनः × द्वितीयं ष × सुषुम्नाया द्वारं परिशुध्यति ॥

End :

जन्मान्तरसहस्रेषु यदा क्षीयेत किल्बिषः ।
यदा पश्यन्ति योगेन संसारोच्छेदनं परम् ॥

संसारोच्छेदनं परमिति ॥

Colophon :

परिसमाप्तेयमुपनिषद्दीपशिखा ॥

266

Sl. No. 1375 दुर्गोपनिषत् Ms. No. P. 7570-22

Beginning :

हरिः ओं । भद्रं कर्णेभिः + + शान्तिः । सर्वे वै देवा देवीमुपतस्थुः । काऽसि त्वं महादेवि । सा ब्रवीचाहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यञ्च । अहमानन्दानानन्दे ॥

End :

इदमथर्वशीर्षं ज्ञात्वा + + + प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति । य एवं वेदेत्युपनिषत् । भद्रं कर्णेभिः शृणुयाम देवाः । + + + + ओं शान्तिः शान्तिः शान्तिः ॥

Colophon :

इति दुर्गोपनिषत् समाप्ता ॥

267

Sl. No. 1377 देव्युपनिषत् (आथर्वणीदेव्युपनिषत्) Ms. No. P. 2350/1

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः ॥ ओं सर्वे वै देवा देवीमुपतस्थुः । काऽसि त्वं महादेवि । साऽब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यं चाशून्यं च । अहमानन्दानानन्दे । अहं विज्ञानाविज्ञाने । अहं ब्रह्माब्रह्मणी वेदितव्ये । इत्याह अथर्वणऋषिः ॥

End :

इदमथर्वशीर्षं ज्ञात्वा + + + + प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति; भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति । य एवं वेदेत्युपनिषत् ॥

Colophon :

इति तुरीयातीतावधूतोपनिषत् समाप्ता ।

268

Sl. No. 1390 **देव्युपनिषद्भाष्यम्** Ms. No. B. 247/41

Beginning :

यस्यां देव्यब्रवीत्स्वस्या निर्गुणब्रह्मरूपताम् ।
सेयं तु देव्युपनिषत् शुभा व्याख्यास्यतेऽधुना ॥

किमिहाहं ब्रह्मस्वरूपिणीति वदन्ती देवी स्वदेहाभिप्रायेण ब्रह्मतामाह उत देहान्तर्याम्यभिप्रायेणेति संशये + + + + देहाभिप्रायेणेति वाच्यम् ॥

End :

अत्रोच्यते - देवी ह्येषा सगुणनिर्गुणोभयात्मिका सप्रतियोगिकनिष्प्रतियोगिकोभयात्मिका च भवति । + + + + द्वैविध्यं नोररीकुर्यात् । ततस्तस्य न कदापि भोगमोक्षौ भवितुमर्हतः तस्मान्न कश्चिदपि विरोधोऽत्र मन्तव्यः ॥

Colophon :

इति देव्युपनिषद्भाष्यं समाप्तम् ॥

269

Sl. No. 1393 **देशिकोपनिषत्** Ms. No. P. 3581/22

Beginning :

सह नाववत्विति शान्तिः ॥

आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः ।
मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः ॥
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः ।
एवं लक्षणसम्पन्नो गुरुरित्यभिधीयते ॥

End :

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥

गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टा च तस्माद्गुरुतरो गुरुः ॥

तस्माद्गुरुतरो गुरुरिति ॥

Colophon :

इति देशिकोपनिषत्समाप्ता ॥

270

Sl. No. 1394 द्रमिडब्रह्मोपनिषत् Ms. No. B. 545

Beginning :

अथ प्रणिपत्य भगवान् याज्ञवल्क्यः ब्रह्माणं विधिवदुपसन्नः पप्रच्छ– अधीहि भगवो मे किं पवित्राणां पवित्रम् ; केन वा कर्माणि सफलानि ? केनामृतत्वमेति ? + + + स होवाच– साधु, तेन शृणु । भो ! श्रीमन्नारायणः स्वाङ्गुलीभिर्मथ्यमानात्फेनो भवति । + + + + सरस्वत्या द्रामिडी ब्रह्मसंहिताश्चत्वारो वेदाः नारायणांशभूतशठारिणा प्रकाश्यन्ते । + + + + एते गायत्र्यात्मकाश्चतुर्विंशतिसंख्याकाश्चतुस्सहस्रगाथाः द्रामिडश्रुतयो वासुदेवविषयभूताः प्रवर्तन्ते ॥

End :

यो वा एतां द्रामिडीं वेद + + + + स सर्वेषु तीर्थेषु स्नातो भवति । + + + + सम्यक् ज्ञानं लब्ध्वा तद्विष्णोः परमं पदमवाप्नोति । न च पुनरावर्तते ; न च पुनरावर्तते– इत्याह भगवांश्चतुर्मुखः ; य एवं वेदेत्युपनिषत् ॥

Colophon :

— — —

271

Sl. No. 1395 द्वयोपनिषत् Ms. No. P. 1682/2

Beginning :

अथातः श्रीमद्द्वयोत्पत्तिः । वाक्यो द्वितीयः । षट्पदान्यर्था दश । पञ्चविंशत्यक्षराणि । पञ्चदशाक्षरं पूर्वं दशाक्षरं परम् । + + + + दशमे व्यक्षराणि । एतन्मन्त्रस्य प्रपत्तिः । पूर्वे नारायणः प्रोक्तः । अनादिसिद्धो मन्त्ररत्नः ॥

End :

यत्सकृदुच्चारित: संसारविमोचनं भवति । सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति । सर्वान् कामानवाप्नोति सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥

Colophon :

परिसमाप्तेयं योगशिखोपनिषत् (?) ॥

272

Sl. No. 1399 **धर्मसूक्ष्मोपनिषत्** **Ms. No. B. 634/5**

Beginning :

हरि: ओं । शन्नो वारुणि:, शन्न: शुद्ध:, शन्नोऽग्नि:, शन्न: सर्वं समभवत् । नमो ब्रह्मणे ; नम: पृथिव्यै ; नम ओषधीभ्य: ; नमोऽग्नये ; नमो वायवे + + + शान्ति: ।

अथातो धर्मजिज्ञासा । ज्ञानं मोक्षैकसाधनं । मोक्ष: सर्वज्ञत्वाशक्ति: । पञ्च विषया: प्रपञ्च: । तेषां ज्ञानस्वरूपो योगो मोक्ष: ॥

End:

पठेदेतानि सूक्तानि पूजान्ते साधकोत्तम: ।
आज्ञासिद्धिर्भवेत्तस्य तदाज्ञापकमीश्वरि ॥
विद्याचारविहीनोऽपि यदि पूजां न मन्यते ।
यदिज्ये(?) मावमन्येत मोदते नन्दने वने ॥

मोदते नन्दने वन इति । ओं शान्ति: शान्ति: शान्ति: । सह नाववतु । सह नौ भुनक्तु + + + शान्ति: ॥

Colophon:

— — —

273

Sl. No. 1400 **ध्यानबिन्दूपनिषत्** **Ms. No. P. 3581/29**

Beginning :

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
तच्छ्रुत्वा च पठित्वा च सर्वपापै: प्रमुच्यते ॥

बिष्णोर्नाम महायोगी महाकायो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥

End:

भ्रुवोर्मध्ये ललाटे तु नासिकायां तु मूलतः ।
अमृतस्था विजानीयात् विश्वस्यायतनं महत् ॥

विश्वस्यायतनं महदिति ॥

Colophon:

ध्वान्त[ध्यान]बिन्दूपनिषत् समाप्ता ॥

274

Sl. No. 1401 ध्यानबिन्दूपनिषत् Ms. No. P. 5592/11

Beginning :

ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वमुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥ ९ ॥
अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अन्तरिक्षं यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥ १० ॥

End :

अर्धमात्रात्मकं कृत्वा कोशभूतं तु पङ्कजम् ।
कर्षयेन्नाळमार्गेण भ्रुवोर्मध्ये लयं नयेत् ॥
भ्रुवोर्मध्ये ललाटे तु नासिकायां तु मूलतः ।
अमृतस्थानं विजानीयाद्ब्रह्मस्यायतनं महत् ॥

ब्रह्मस्यायतनं महदिति ॥

Colophon :

इत्यथर्ववेदे ध्वान्त[ध्यान]बिन्दूपनिषत्समाप्ता ॥

275

Sl. No. 1402 **ध्यानविन्दूपनिषत्** Ms. No. P. 5717/6

Beginning :

वालाग्रशतसाहस्रा तस्य भागस्य भागतः ।
तस्य भागस्य भागार्धं एतज्ज्ञेयं निरञ्जनम् ॥
पुष्पमध्ये यथा गन्धः पयोमध्ये च सर्पिषः ।
तिलमध्ये यथा तैलं पाषाणेऽपि तु काञ्चनम् ॥

End :

अर्धमात्ररुजं कृत्वा कूपमोकं तु पङ्कजम् ।
कर्षयेन्नाळमार्गेण भ्रुवोर्मध्ये लयं नयेत् ॥
भ्रुवोर्मध्ये ललाटस्था नासिकायां तु मूलतः ।
मूतस्थानं विजानीयाद्ब्रह्मस्यायतनं महत् ॥ (?)

ब्रह्मस्यायतनं महदिति । ओं ॥

Colophon :

इति ध्यानविन्दूपनिषत् ॥

276

Sl. No. 1403 **ध्यानविन्दूपनिषत्** Ms. No. B. 247/2

Beginning :

सह नाववत्विति शान्तिः ।
यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नाऽन्यो भेदः कदाचन ॥ १ ॥
बीजाक्षरं परं विन्दुं नादान्तस्योपरि स्थितम् ।
सशब्दश्चाक्षरे क्षीणे निश्शब्दं परमं पदम् ॥ २ ॥

End :

कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ।
स्वात्मानं पुरुषं पश्येत् मनस्तत्र लयं गतम् ॥ १०१ ॥

रत्नानि ज्योतिस्नानादं तु बिन्दुमाहेश्वरं पदम् ।
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥ १०२ ॥

Colophon :

ध्यानबिन्दूपनिषत् समाप्ता ॥

277

Sl. No. 1404 **ध्यानबिन्दूपनिषत्** Ms. No. B. 452/I/1

Beginning :

सह नाववत्विति शान्तिः ।

यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नाऽन्यो भेदः कदाचन ॥

बीजाक्षरं परं बिन्दुं नादान्तस्योपरि स्थितम् ।
स शब्दश्चाक्षरे क्षीणे निरशब्दं परमं पदम् ॥

End :

तदात्मा राजते तत्र यथा व्योम्नि दिवाकरः ।
कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ॥

स्वात्मानं पुरुषं पश्येन्मनस्तत्र लयं गतम् ।
रत्नानि ज्योतिस्ननादं तु बिन्दुं माहेश्वरं पदम् ॥
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥

इत्युपनिषत् ॥

Colophon :

ध्यानबिन्दूपनिषत्समाप्ता ॥

278

Sl. No. 1409 ध्यानबिन्दूपनिषद्भाष्यम् Ms. No. B. 247/2

Beginning :

नादोपरितना बिन्दुमात्रा यस्यां प्रपञ्चिता ।
ध्यानबिन्दूपनिषदं व्याख्यास्ये मुक्तिदायिनीम् ॥

अत्रानाहतातपरस्य बिन्दोरभिहितत्वादयं खण्डयोग्येवेत्याशङ्कीत, तथापि तत्क्षये तु निरञ्जनमित्युक्त्या वालाग्रशतभागार्धभागरूपस्य खण्डबिन्दोः क्षयावगमात् अखण्डबिन्दुरेव मननाख्यध्यानयोगगोचरो विवक्षित इति मन्तव्यम् ॥

End :

एवमुभयथाऽप्यभावात्त्वम्पदलक्ष्यार्थभूतः प्रत्यगात्माऽल्यमिदं ज्योतिरिदन्तयैव दृश्येत ; इदन्तया ज्योतिर्दर्शिनः तत्त्वमस्यादिवाक्यार्थश्रवणस्याप्यभावात् । तस्मादनवद्यम् । यः स्वात्मानं परमपुरुषानन्यमखण्डमित्यर्थः । पश्येत्– तन्मनस्तत्र लयं गतं भवति । तत्पदं विन्द्वाख्या षष्ठीमात्रावगन्तव्या ॥

Colophon :

इति ध्यानबिन्दूपनिषद्भाष्यं समाप्तम् ॥

279

Sl. No. 1413 — नादबिन्दूपनिषत् — Ms. No. P. 3621/12

Beginning :

अकारो दक्षिणः पक्षः उकारस्तूत्तरः स्मृतः ।
मकारस्तस्य पुच्छं वा अर्धमात्राधरस्तथा ॥
पदौ रजस्तमस्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणं चक्षुरधर्मोऽथोपरस्स्मृतः ॥
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनी ।
स्वर्लोकः कटिदेशे तु नाभिदेशे महर्जगत् ॥

End :

तद्युक्तस्तन्मयो जन्तुः शनैर्मुञ्चेत् कळेबरम् ।
सुस्थितो योगचारेण सर्वसङ्गविवर्जितः ॥
ततो विलीनपाशोऽसौ विमलः केवलः प्रभुः ।
तेनैव ब्रह्मभावेन परमानन्दमश्नुते ॥

इति ॥

Colophon :

नादबिन्दूपनिषत् समाप्ता ॥

280

Sl. No. 1416 नादबिन्दूपनिषत् Ms. No. B. 453/1

Beginning :

वाङ्मे मनसीति शान्तिः ॥

अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारः पुच्छमित्याहुरर्धमात्रा तु मस्तकम् ॥१ ॥
पादादिकं गुणस्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणश्चक्षुरधर्मो योऽपरस्स्मृतः ॥ २ ॥

End :

अवस्थात्रयमन्वेति न चित्तं योगिनस्सदा ।
जाग्रन्निद्राविनिर्मुक्तस्वरूपावस्थतामियात् ॥ ५४ ॥

दृष्टिस्स्थिरा यस्य विना स दृश्यं
वायुः स्थिरो यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनाऽवलम्बं
स ब्रह्म तारान्तरनादरूपः ॥

इत्युपनिषत् ॥

Colophon:

नादबिन्दूपनिषत्समाप्ता ॥

281

Sl. No. 1419 नादबिन्दूपनिषद्भाष्यम् Ms. No. B. 247/1

Beginning :

ब्रह्मज्ञानोद्भवो यस्य मुच्यते योगनिष्ठया ।
नादबिन्दूपनिषदस्त्वेषा व्याख्या विधीयते ॥

ननु तैत्तिरीयोपनिषदि पुच्छभूतस्य ब्रह्मणः प्रतिष्ठात्वमुक्तम् । इह त्वर्धमात्रायाः प्रतिष्ठाभूतायाः शरस्थानीयत्वमुच्यते । कुत एवं वैषम्यमिति चेन्नायं दोषः + + + शरीरं तत्त्वमुच्यत इत्यनेन ब्रह्मतत्त्वस्यैव प्रणवस्वरूपत्वावगमाच्च । + + + प्रणवस्य सर्वात्मकत्वं प्रदर्शितमित्यवगन्तव्यम् ॥

End :

उन्मन्यष्टकं मनोन्मन्यष्टकं च निस्सङ्कल्पसमाधौ च भवतः। तत उन्मन्यारूढस्य ब्रह्मविद्वरत्वं सिद्धम्; वैश्वर्यष्टकमध्यमाष्टकवन्निर्वृत्तिकसमाधेर्ब्रह्मवरीयाविषयकत्वात् । + + +
एवं मनोन्मनीपर्यवसन्नत्वादियं श्रुतिर्न मननमात्रावसन्नेति शङ्कयम् ॥

Colophon :

इति नादबिन्दूपनिषद्भाष्यं समाप्तम् ॥

282

Sl. No 1422 नादोपनिषत् Ms.No. P. 1973/11

Beginning :

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनःपुनः ॥
परमं ब्रह्मविद्याया उल्कावच्चान्यथोत्सृजेत् ॥
ओंकारं रथमारुह्य विष्णुं कृत्वाऽथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥

End :

समानस्तस्य मध्ये तु गोक्षीरधवलप्रभः ।
अपाण्डुर उदानश्च व्यानो ह्यर्चिसमप्रभः ॥
यस्यैतन्मण्डलं भित्त्वा मारुतो याति मूर्धतः ।
यत्र तत्र म्रियेतापि न स भूयोऽभिजायते ॥

इति ॥

Colophon :

इति नादोपनिषत् (?) [अमृतबिन्दूपनिषत्] समाप्ता ॥

283

Sl. No. 1423 नादोपनिषत् Ms. No. A.159/21

Beginning :

ओं । भूमौ दर्भासने सम्यक् सर्वदोषविवर्जिते ।
कृत्वा मनोमयां रक्षां जप्त्वा वै रथमण्डलम् ॥
\+ + + + +

ओमित्येकाक्षरं ब्रह्म ह इत्येतेन रेचयेत् ।
पूरयेच्च मकारेण कुर्यादेवं पुनः पुनः ॥

End :

समानापानमध्ये च गोक्षीरस्फटिकप्रभः ।
अपाण्डर उदानश्च व्यानो ह्यर्चिसमप्रभः ॥
यस्यैतन्मण्डलं भित्वा मारुतो याति मूर्धतः ।
यत्र यत्र मृतो वापि न स भूयोऽभिजायते ॥

न स भूयोऽभिजायत इति ॥

Colophon :

इति नादोपनिषत्समाप्ता ॥

284

Sl. No. 1424 नारदपरिव्राजकोपनिषत् Ms. No .P. 3581/36

Beginning :

भद्रं कर्णेभिरिति शान्तिः । अथ कदाचित्परिव्राजिकाभरणो नारदस्सर्वलोकसञ्चारं कुर्वन् अपूर्वपुण्यस्थलानि पुण्यतीर्थानि तीर्थीकुर्वन्नवलोक्य चित्तशुद्धिं प्राप्य निर्वैरश्शान्तो दान्तस्सर्वतो निर्वेदमासाद्य, स्वरूपानुसन्धानमनुसन्धाय आनन्दविशेषगण्यं मुनिजनैरुपसङ्कीर्णं नैमिशारण्यं पुण्यस्थलमवलोक्य + + नारदमवलोक्य + + शौनकादिमहर्षयः + + + भगवन् ब्रह्मपुत्र कथं मुक्त्युपायोऽस्माकं वक्तव्यमित्युक्तस्तान् स होवाच नारदः ॥

End :

सखा योऽसीन्द्रस्य विप्रोऽसि नात्र्नरश्शर्म मे भव । बलापं तन्निवारयेति दण्डं परिग्रहे जगज्जीवनं जीवनाधारभूतं माते (?) ॥ ३८ ॥

Colophon :

इति खिलसंहितोपनिषद्रहस्ये तृतीयोपदेशः ॥

285

Sl. No. 1425 **नारदपरिव्राजकोपनिषत्** Ms. No. B. 244/1

Beginning :

अथ कदाचित् परिव्राजकाभरणो नारदः सर्वलोकसञ्चारं कुर्वन् + + + नैमिशारण्यं पुण्यस्थलमवलोक्य शौनकादिमहर्षयः + + + भगवन् ब्रह्मपुत्र कथं मुक्त्युपायोऽस्माकं वक्तव्यमित्युक्तस्तान् स होवाच नारदः ॥

End :

स्वेनावृतं सर्वमिदं प्रपञ्चं पञ्चात्मकं पञ्चसु वर्तमानम् ।
पञ्चीकृतानन्तभवप्रपञ्चं पञ्चीकृतस्वावयवैरसम्भृतम् ॥
परात्परं यन्महतो महान्तं स्वरूपतेजोमयशाश्वतं शिवम् ॥ ९८ ॥

Colophon :

— — — — — —

286

Sl. No. 1427 **नारदपरिव्राजकोपनिषत्** Ms. No. C. 3682/13

Beginning :

पारिव्राज्यधर्मपूगालङ्कारा यत्प्रबोधतः ।
दशप्रणवलक्ष्यार्थं यान्ति तं राममाश्रये ॥

ओं भद्रं कर्णेभिरिति शान्तिः ।

परिव्राट् त्रिशिखी सीताचूडानिर्वाणमण्डलम् ।
दक्षिणीशरभं स्कन्दं महानारायणीद्वयम् ॥

ओं अथ कदाचित्परिव्राजकाभरणो नारदः सर्वलोकसञ्चारं कुर्वन् + + + नैमिशारण्यं + अवलोक्य शौनकादिमहर्षयः + + + ब्रह्मपुत्र कथं मुक्त्युपायोऽस्माकं वक्तव्य इत्युक्तस्तान् स होवाच नारदः ॥

End :

स्वस्वरूपज्ञः परिव्राट् + + + + सुखदुःखातीतः स्वयंज्योतिःप्रकाशः सर्ववेद्यः सर्वज्ञः सर्वसिद्धिदः सर्वेश्वरः सोऽहमिति तद्विष्णोः परमं पदम् ॥

यत्र गत्वा न निवर्तन्ते योगिनस्सूर्यो न तत्र भाति न शशाङ्कोऽपि ; न स पुनरार्तते ; न स पुनरावर्तते ; न स पुनरावर्तते ; तत्कैवल्यमित्युपनिषत् ॥

Colophon :

नारदपरिव्राजकोपनिषत्समाप्ता ॥

287

Sl. No. 1428 **नारदपरिव्राजकोपनिषद्भाष्यम्** Ms. No. B. 244/2

Beginning :

ओमित्युच्चार्य मन्त्रं प्रथममथ गुरुं सुन्दरेशञ्च नत्वा
भद्रं कर्णेभिरित्यप्यधिकनियमतश्शान्तिमेकां पठित्वा ।
व्याख्यास्ये नारदीय्यां श्रुतिमिह तु परिव्राजकाख्यां रहस्यां
तेनायं सुप्रसन्नो भवतु विधरणस्सेतुरेषां परात्मा ॥

इह खल्वीशादिमुक्तिकाष्टोत्तरशतोपनिषत्सु + + + अस्यां नारदपरिव्राजकोपनिषदि + + + प्रायेण सन्यासाश्रमविषयत्वादथ कदाचित्परिवाजकाभरणो नारद इत्युपक्रमे अथशब्दो मङ्गलार्थ एव ॥

End :

पश्चात् तत्त्वमसि वाक्यार्थश्रवणादिना सर्वप्रपञ्चावसाने सति सकृदेकधा वेदितव्यम् । इतः परमासमाप्ति श्वेताश्वतरोपनिषदि व्याख्यातत्वान्नेह व्याख्यातम् ॥

Colophon :

इति नारदपरिव्राजकोपनिषत् समाप्ता ॥

288

Sl. No. 1429 **नारदपरिव्राजकोपनिषद्भाष्यम्** Ms. No. B. 454/2

Beginning :

ओमित्युच्चार्यमन्त्रं प्रथममथ गुरुं सुन्दरेशं च नत्वा
भद्रं कर्णेभिरित्यप्यधिकनियमतश्शान्तिमेकां पठित्वा ।
व्याख्यास्ये नारदीय्यां श्रुतिमिह तु परिव्राजकाख्यां रहस्यां
तेनायं सुप्रसन्नो भवतु विधरणस्सेतुरेषां परात्मा ॥

इह खल्वीशादिमुक्तिकाष्टोत्तरशतोपनिषत्सु + + + अस्यां नारदपरिव्राजकोपनिषदि + + + प्रायेण सन्यासाश्रमविषयत्वादथ कदाचित्परिव्राजकाभरणो नारद इत्युपक्रमेऽथशब्दो मङ्गलार्थ एव ॥

End :

व्रीहिर्वा यवो वा + + चैवमादिश्रुतिसिद्धप्रत्यगात्मभेदवशादनेकत्वोपपत्तेः । पश्चात्तत्त्वमसि वाक्यार्थश्रवणादिना सर्वप्रपञ्चावसाने सति सकृदेकधा वेदितव्यम् । इतः परमासमाप्तेः श्वेताश्वतरोपनिषदि व्याख्यातत्वान्नेह व्याख्यातम् ॥

Colophon :

इति श्रीमत्सुन्देश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ नारदपरिव्राजकाभरणभाष्ये नवमोपदेशः । नारदपरिव्राजकोपनिषद्भाष्यं समाप्तम् ॥

289

Sl. No. 1431 नारायणोपनिषत् Ms. No. 1468

Beginning :

अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात् प्राणो जायते । मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते ।

End:

एतदथर्वशिरो योऽधीते + + + पञ्चपातकोपपातकात्प्रमुच्यते । सर्ववेदपारायणस्य पुण्यं लभते । नारायणसायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥

Colophon :

— — —

290

Sl. No. 1432 नारायणोपनिषत् Ms. No. P. 1973/8

Beginning :

पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति । नारायणाद्ब्रह्मा जायते । नारायणादिन्द्रो जायते । + + + नारायणे प्रलीयन्ते । नारायणे प्रवर्तन्ते ॥

End :

अष्टाक्षरं पदमध्येत्यनपब्रवः सर्वमायुरेति । रायस्पोषं गौपत्यं विन्दते; प्राजापत्यं ततोऽमृतत्वमश्नुते ; ततोऽमृतत्वमश्नुत इति ॥

Colophon :

इति नारायणोपनिषत्समाप्ता ॥

291

Sl. No. 1437 नारायणोपनिषत् **Ms. No. P. 5360/6**

Beginning :

सह नाववतु + + शान्तिः । अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात् प्राणो जायते । मनस्सर्वेन्द्रियाणि च ॥

End :

श्रीमन्नारायणसायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ।

योब्रह्माणं विधदाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥
ओं शान्तिः शान्तिः ॥

Colophon :

नारायणोपनिषत् समाप्ता ॥

292

Sl. No. 1438 नारायणोपनिषत् **Ms. No. P. 5546**

Beginning :

ओं पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणाद्ब्रह्मा जायते । नाराय णाद्रुद्रो जायते । नारायणादिन्द्रो जायते ॥

End :

दिशश्च नारायणोऽधश्च नारायणः ; ऊर्ध्वं च नारायणोऽन्तर्बहिश्च नारायणः । ततोऽमृतमश्नुते ; सतोऽमृतमश्नुते ॥

Colophon :

इति द्वितीयोऽध्यायः । इति सूक्ष्मनारायणोपनिषत्समाप्ता ॥

293

Sl. No. 1458 **नारायणोपनिषद्भाष्यम्** Ms. No. A. 166/16

Beginning :

यत्र नारायणोपास्तिश्चतुर्वेदशिरो मता ।
नारायणोपनिषदं व्याख्यास्ये तामिमामिदम् ॥

प्रकृतनारायणः किं सगुणः स्यात् ; उत निर्गुणः ; आहोस्विदुभयात्मक इति सन्दिह्यते। तत्र तावत्प्राप्तं निर्गुण इति । कुतः ? निष्कळङ्कादिशब्दश्रवणात् ॥

End :

तथापि क्षीरपूर्णस्य घटस्य विषबिन्दुसंयोगादिवत् निर्गुणवाचकैर्बहुशब्दैः पूर्णाया अप्यस्या उपनिषदस्त्रिमूर्त्युत्तीर्णनारायणपरत्वाभावेन मन्दफलत्वेऽपि महानारायणोपनिषदैकवाक्या सती कैवल्योत्तमफलेत्यवगन्तव्या ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ नारायणोपनिषद्भाष्यं समाप्तम् ॥

294

Sl. No. 1462 **निरालम्बोपनिषत्** Ms. No. A. 5592/6

Beginning :

ओं पूर्णमद इति शान्तिः ।

येषामज्ञानजन्तूनां समस्तारिष्टशान्तये ।
यद्यद्बोध्यं तदखिलं तदाशङ्क्य ब्रवीम्यहम् ॥

किं ब्रह्म ? क ईश्वरः ? को जीवः ? + + + इत्याशङ्क्याह— ब्रह्मेति च महदहङ्कारपृथिव्यप्तेजोवाय्वाकाशत्वेन बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया समानमद्वितीयं + + + अनिर्वाच्यं चैतन्यं ब्रह्म ईश्वर इति च ॥

End :

सर्वधर्मान् परित्यज्य + + ब्रह्मैवाहमस्मीति निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो यतिः + + + अवधूतस्स ब्राह्मण इति । निरालम्बोपनिषदं योऽधीते गुर्वनुग्रहतस्सोऽग्निपूतो भवति ; सर्वान् कामान् भुङ्क्ते ; न स भूयोऽभिजायते इति ॥

Colophon :

इति निरालम्बोपनिषत् समाप्ता ॥

295

Sl. No. 1474 निरालम्बोपनिषद्भाष्यम् Ms. No. A. 167/4

Beginning :

निर्विकारं निरालम्बं ब्रह्म यत्र विविच्यते ।
निरालम्बोपनिषदं तां व्याख्यातुं प्रयत्यते ॥

तत्रादावेतदुपनिषच्छ्रवणाधिकारिणो निर्दिशति— येषामिति । न विद्यते ज्ञानं येषां ते अज्ञानास्ते च ते जन्तवश्च । तेषां समस्ताज्ञानाद्यरिष्टशान्तये शास्त्रेषु यद्यद्बोद्धव्यं वेदितव्यमस्ति तत्तदखिलमप्याशङ्क्याहं वेदपुरुष इत्यर्थः । ब्रवीमि— वदामि ॥

End :

इदानीमेतदुपनिषदध्ययनमात्रवतः ब्रह्मलोकादनावृत्तिलक्षणं फलमभिधायोपनिषदमुपसंहरति— निरालम्बोपनिषदमित्यादिना । पुनर्नाभिजायत इत्यभ्यास उपनिषत्समाप्तिद्योतनार्थः ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ निरालम्बोपनिषद्भाष्यं समाप्तम् ॥

296

Sl. No. 1476 निर्वाणोपनिषत् Ms. No. P. 3581/32

Beginning :

सह नाववत्विति शान्तिः । अथ निर्वाणोपनिषदं व्याख्यास्यामः । परमहंसः सोऽहं परिव्राजकाः पश्चिमलिङ्गाः मन्मथक्षेत्रपालाः । गगनमहासिद्धान्तम् । अमृतकल्लोलनदी । अक्षयं निरञ्जनः ऋषिः ॥

End :

कुण्डलिनीबद्धः परातवादमुक्तो जीवन्मुक्तः शिवयोगमुद्रा च । खेचरी मुद्रा च । परमानन्दी तीर्थपादुका पूजायामतितीर्थपादुका पूजयाम्यहमितीति ॥

Colophon :

निर्वाणोपनिषत्समाप्ता ॥

297

Sl. No. 1478 निर्वाणोपनिषत् Ms. No. P. 8251

Beginning :

अथ निर्वाणयोगोपनिषद उच्चारणं व्याख्यायते विधिः– परमहंसः सोऽहं परिव्राजकाचार्याः पश्चिमलिङ्गम् । दिव्यशक्तयः मन्मथक्षेत्रपालाः । शान्तिस्स्मशानम् । गगनसिद्धान्तम् । अजयनिरञ्जना अमृतकल्लोला नदी । अक्षयं निरञ्जनं ऋषिः ॥

End :

कथं रागविरागश्च नः कल्पयति विपश्चितः । विन्दति विन्दति न हि न हि तत्र छन्दोलक्षणं न हि नहि तत्र समरसमग्नो भावितपूतः प्रलपन्नपि तद्भावितमवधूतः ॥

Colophon :

इत्यथर्ववेदे निर्वाणयोगोपनिषत्समाप्ता ॥

298

Sl. No. 1483 निर्वाणोपनिषद्भाष्यम् Ms. No. B. 247/11a

Beginning :

सन्यासधर्मा यत्रोक्ताः विमुक्त्यर्था विलक्षणाः ।
निर्वाणोपनिषद्व्याख्या सङ्ग्रहेण विधीयते ॥

परमहंसः– परमात्मा सोऽहमिति निश्चयवन्तः । परिव्राजकाः– परितो व्रजन्तीति । मन्मथक्षेत्रपालाः– विषयविमुखा इत्यभिप्रायः ॥

End :

यस्य च ब्रह्मचर्येण परब्रह्मनिष्ठया सर्वोपशान्तेः सङ्ग्रहो भवति सः + + + + स्वेच्छाचारो भवितुमर्हति । देहनाशनं देहात्मबुद्धिविनाशकमखण्डाकारब्रह्म सम्यग्दर्शनमेव च निर्वाणमन्ते अभिधीयते । तस्माल्लोकवेदानिन्द्याचारः परब्रह्मनिष्ठ एव स्वेच्छाचारार्हः इत्यवगन्तव्यम् ॥

Colophon:

इति निर्वाणोपनिषद्भाष्यं समाप्तम् ॥

299

Sl. No. 1486 निर्लेपोपनिषत् Ms. No. P. 7635/11

Beginning :

ओं ; अथ हैनं पैप्पलादं कात्यायनो ब्रह्मविष्णू ब्रह्मपरः परं ब्रह्मान्वेषमाणोऽनुन्मत्तवदाचरन्निदमाह– भगवन् केनैतस्मिन् संसारे–

सक्तोऽपि पङ्के शृणु वाक्यमेतत्
साशात् सारं सर्ववेदान्तगुह्यम् ।
कामक्रोधौ लोभमोहौ मदश्च
मात्सर्यं च त्यज्यते येन योगी ॥

End :

एवं स्थित्वा संसृतौ वर्तमानः संसारीव सुखदुःखादिभोक्ता ।
उन्मत्तमूकबधिरान्धवत्सदा विभाव्यमानो मूढधीभिर्विमुक्तः ॥

इत्याह भगवान् पिप्पलादो हृदि लिङ्गं धृत्वा मूढोऽपि परं ज्योतिः प्रविशति परं ज्योतिः प्रविशत्यों सत्यमित्युपनिषत् ॥

Colophon :

— — — —

300

Sl. No. 1490 **नृसिंहपूर्वतापिनीयोपनिषत्** Ms. No. P. 1973/15

Beginning :

भद्रं कर्णेभिः + + + + शान्तिः । आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामः समवर्तत । इदं सृजेयमिति । तस्माद्यत्पुरुषो मनसाऽभिगच्छति । तद्वाचा वदति + + + तदेषाभ्युक्ता । कामस्तदेको समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥

End :

य एतं मन्त्रराजं नारसिंह्मानुष्टुभं नित्यमधीते + + + स सर्वमधीते । + + + मन्त्रराजाध्यायकस्य यत्र सूर्यो न तपति, + + + तत्सदानन्दं + + यत्र गत्वा न निवर्तन्ते योगिनः । तदेतदृचाभ्युक्तम्— तद्विष्णोः परमं + + तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् । तदेतन्निष्कामस्य भवति, निष्कामस्य भवति ॥

Colophon :

इति पूर्वतापनीयोपनिषदि पञ्चमोपनिषत् । पूर्वतापनीयोपनिषत् समाप्ता ॥

301

Sl. No. 1500 **नृसिंहपूर्वतापिनीव्याख्या** Ms.No.A.166/33a

Beginning :

प्रशान्तं या श्रुतिः प्राह नृसिंहं सङ्गवर्जितम् ।
व्याख्यास्ये तां रहस्यार्थगर्भिणीं तापिनीमिह ॥

आपो वा इदमित्यादिना : प्रजापतेः प्रपञ्चसृष्टिविषयककामवता मनसा— नारसिंहं मन्त्रराजं सृष्टिसाधनत्वेनापश्यत् तेनेति ॥

End :

ननु सात्विकं मोक्षद्वारमिति फलद्वयमत्र पूर्वमुक्तम् ; इह तु निष्कामस्य भवतीत्युच्यते । अत उपासकस्य भोगसिद्धिरिति चेन्नैष दोषः । सदानन्दादिलक्षणविष्णुपदप्राप्तिमात्रं हि

निष्कामस्य भवतीत्युक्तम् । नैतेन बुभुक्षोर्भोगसिद्धिः शंक्या । सोऽग्निं स्तम्भयतीत्यादिना सर्वैश्वर्यावधारणात् ॥

Colophon :

इति श्रीसुन्दरेश्वरतातापादशिष्यस्य अप्पयदीक्षिताचार्यस्य कृतिषु नृसिंहपूर्वतपिनीभाष्यं समाप्तम् ॥

302

Sl. No. 1502 नृसिंहाथर्वशिरोपनिषत् Ms. No. P. 8942

Beginning :

ओं । पूर्णमदः + + + पूर्णमेवावशिष्यते । ओम् शान्तिः शान्तिः शान्तिः । अथ पुरुषो ह वै नृसिंहोऽकामयत प्रजाः सृजेयेति । लक्ष्मीनृसिंहात्प्राणो जायते । मनः सर्वेन्द्रियाणि खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥

End :

ओं नमो लक्ष्मीनृसिंहायेति मन्त्रमधीयानः पञ्चपातक-उपपातकात् मुच्यते । सर्ववेद-पारायणपुण्यं लभते । लक्ष्मीनृसिंहसायुज्यमवाप्नोति । य एवं वेदेत्युपनिषत् । ओं तत्सत् । पूर्णमदः + शिष्यते । ओम् शान्तिः शान्तिः शान्तिः ॥

Colophon :

— — — — —

303

Sl. No. 1503 नृसिंहोत्तरतापिन्युपनिषत् Ms. No. P. 1973/16

Beginning :

देवा ह वै प्रजापतिमब्रुवन्– अणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेति । तथेत्योमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं + + + तदप्योङ्कार एव ॥

End :

तदेषः श्लोकः ।

ओतमोतेन जानीयात् अनुज्ञातारमान्तरम् ।
अनुज्ञामद्वयं लब्ध्वा उपद्रष्टारमात्रजेत् ॥ ९ ॥

Colophon :

इत्युत्तरतापिनी समाप्ता ॥

304

Sl. No. 1511 **नृसिंहोत्तरतापिन्युपनिषद्भाष्यम्** Ms. No. A. 165/34

Beginning :

अथेदानीं पूर्वोपनिषद्भागे तुरीयोपनिषदि प्रपञ्चितानामपि + + पुनरिह प्रपञ्च्यमानत्वात् पौनरुक्त्यमाशङ्क्येत ; तन्निवृत्त्यर्थं + + उत्तरतापिन्यारभ्यते–

\+ + + + + + +

नन्वात्मन औपाधिकत्वे सम्भवत्यपि परब्रह्मणस्तदनुपपन्नं अद्वैतहानिप्रसङ्गादित्यत आह–लिशरीरं परं ब्रह्मेति ॥

End:

ओतमिति । ओतं– तुरीयविश्वं, ओतेन अर्धमात्रास्थूलेन जानीयात । + + + + अर्धमात्रातुरीयेण तुरीयतुरीयास्मस्वरूपं प्राप्नुयादिति ॥

Colophon:

इति नवमः खण्डः । इति श्रीमत्सुन्दरेश्वरशिष्यस्य अप्पयदीक्षिताचार्यस्य कृतौ नृसिंहोत्तरतापिनीयोपनिषद्भाष्यं समाप्तम् ॥

305

Sl. No. 1513 **पञ्चदशोपनिषत्** Ms. No. P. 8245

Beginning :

वैतथ्यस्य प्रकरणम् ॥

वैतथ्यं सर्वभूतानां स्वप्नमाहुर्मनीषिणः ।
अन्तस्थानात्तु भेदानां संवृतत्वेन हेतुना ॥
अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥

End :

सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम् ।
दुर्दर्शमिति गम्भीरमजं शाम्यं विशारदम् ॥
बुध्वापदमनानात्वं मनःकर्म यथा बलम् ॥
मनः कर्म यथा बलमिति ॥

Colophon :

इत्युपदेशग्रन्थे अलातशान्त्याख्यप्रकरणं चतुर्थं समाप्तम् । इत्यथर्वणवेदे पञ्चदशोपनिषत्समाप्ता ॥

306

Sl. No. 1514 पञ्चब्रह्मोपनिषत् Ms. No. P. 5529/1

Beginning :

अथातः पशुपतेः पाशुपतं योगविधिं व्याख्यास्यामः । भस्मना त्रिषवणं स्नायीत । भस्मनि ईश इति अनुस्नानं निर्माल्यं लिङ्गधारी आयतनवासप्रमितसितन् यहुङ्कारनमस्कारजप्योपहारणोपतिष्ठेत् ॥

End :

ऋषिर्विप्रो महानेव वाग्विशुद्धो महेश्वरः ।
स्मशानवासी धर्मात्मा यथालब्धोपजीवतः ॥
लभते रुद्रसायुज्यं सदा रुद्रमनुस्मरेत् ।
छित्वा दोषं हेतुजालस्य मूलं बुध्या चित्तं स्थापयित्वाऽथ रुद्रे ।
एतां क्षेम्यां संविदं चाप्रमादी दुःखस्यायात्यन्तमीशप्रसादात् ॥
ब्रह्म जपेत्— ईशानमिति ॥

Colophon :

इति पञ्चब्रह्मोपनिषत्सूत्राणि समाप्तानि ॥

307

Sl. No. 1515 पञ्चब्रह्मोपनिषत् Ms. No. P. 4136/23

Beginning :

ओं सह नाववत्विति शान्तिः । अथ पैप्पलादो भगवान् भोः किमादौ किं जातमिति । सद्योजातमिति । किं भगव इति । अघोर इति । किं भगव इति । वामदेव इति । किं वा पुनरिमे भगव इति । तत्पुरुष इति । किं वा पुनरिमे भगव इति । सर्वेषां दिव्यानां प्रेरयिता ईशान इति । ईशानो भूतभव्यस्य सर्वेषां देवयोनिनाम् । कति वर्णाः ? कति- भेदाः ? कति शक्तयः ? यत्सर्वं तद्गुह्यम् । तस्मै नमो महादेवाय महारुद्राय प्रोवाच तस्मै भगवान् महेशः ॥

End :

भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात् ।
अतश्च कारणं नित्यमेकमेवाद्वयं खलु ॥
अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि ।
अस्मिन् ब्रह्मपुरे वेश्म दहरं यदिदं मुने ॥
पुण्डरीकन्तु तन्मध्ये आकाशो दहरोऽस्ति तत् ।
स शिवस्सच्चिदानन्दस्सोऽन्वेष्टव्यो मुमुक्षुभिः ।
अयं हृदि स्थितस्साक्षी सर्वेषामविशेषतः ॥
तेनायं हृदयं प्रोक्तं शिवस्संसारमोचकः ॥

इत्युपनिषत् ॥ सह नाववत्विति शान्तिः ॥

Colophon :

पञ्चब्रह्मोपनिषत्समाप्ता ॥

308

Sl. No. 1519 पञ्चब्रह्मोपनिषद्भाष्यम् Ms. No A. 167/18

Beginning :

यत्रोभयात्मकं ब्रह्म प्रोक्तं सगुणनिर्गुणम ।
पञ्चब्रह्मोपनिषदं व्याख्यास्ये पञ्चताहराम् ॥

अथ पैप्पलादो नामतः महर्षिं भगवन्तं पप्रच्छेति शेषः । प्रश्नप्रकारमाह—भो भगवन् किमादौ— पूर्वं किमासित् ? तस्मात् पूर्वसिद्धाद्वस्तुनः किं जातं— प्रथमतः उत्पन्नमिति ॥

End :

अस्मिन् ब्रह्मपुर इत्यादिच्छान्दोग्यभाष्ये व्याख्यातमेव । येनायं साक्षी शिवस्सर्वेषां हृदि स्थितः । तेन हेतुना हृदयमिति प्रोक्त इति ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ पञ्चब्रह्मोपनिषद्भाष्यं समाप्तम् ॥

309

Sl. No. 1521 **पञ्चीकरणोपनिषत्** Ms. No. B. 7732/2

Beginning :

नमस्कृत्य भगवन्तं शौनकऋषिं मरीचिः राजा परिपृच्छति– स्वामिन् पञ्चविंशतितत्त्वानि कथम् मे ब्रूहीति वि × × × × । अथ ऋषिरुवाच– तद्वेदान् बहुधा वदन्ति– यस्मात्तत्पञ्चविंशतितत्त्वोत्पत्तिं प्रवक्ष्यामि । :प्रणवमोंकारं + + + आकाशाद्वायुः । तेजसा आपः इति क्रमात् । आकाशशरीरं ब्रह्मेति प्रथमम् ॥

End :

वायोः पञ्चगुणाः प्रोक्ताः समासात् परिकीर्तिताः ।
कामः क्रोधस्तथालोभः मोहश्चेति भयम् तथा ॥
आकाशस्य गुणाः पञ्च समासात्परिकीर्तिताः ॥

Colophon :

इति पञ्चीकरणोपनिषत् ॥

310

Sl. No. 1522 **पञ्चीकरणोपनिषत्** Ms. No. B. 230/2

Beginning :

ओं भद्रं कर्णेभिरिति शान्तिः । ओं पञ्चीकरणाधिकारनिमित्त उक्तः । अधिकारिणां शिष्याणां सर्वेश्वरकृपया गुरुरूपेण ज्ञानमु (नो) (?) पदेशः । ज्ञानाद्विमुक्तिः । अथ ज्ञानं साधयेत्; ज्ञानादेव कैवल्यमिति श्रुतेः ॥

End :

ओं नमो ब्रह्मादिभ्यो गुरुभ्यो नमः । सर्वभव (?)(सर्वोपद्रव) रहितः प्रत्यगर्थो ब्रह्मैवाहमस्मि ।
भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परापरे ॥
इत्युपनिषत् । भद्रं– शान्तिः ॥

Colophon :

— — —

311

Sl. No. 1530 **परब्रह्मोपनिषत्** Ms. No. B. 247/38

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः । अथ हैनं महाशालः शौनकोऽङ्गिरसं भगवन्तं पिप्पलादं + पप्रच्छ– दिव्ये ब्रह्मपुरे के सम्प्रतिष्ठिता भवन्ति ? + + + तस्मै स होवाच– एतत्सत्यं ब्रवीमि ब्रह्मविद्यां वरिष्ठाम्– देवेभ्यः प्राणेभ्यः परब्रह्मपुरे विरजं + + + + विभाति । स + + + अकर्मा स्वापीव स्थितः ॥

End :

एकयज्ञोपवीती च नैव सन्यस्तुमर्हति ।
तस्मात्सर्वप्रयत्नेन मोक्षापेक्षी भवेद्यतिः ॥
बहिः सूत्रं परित्यज्य स्वान्तस्सूत्रं तु धारयेत् ॥

बहिःप्रपञ्चशिखोपवीतत्वमनादृत्यप्रणवहंसशिखोपवीतित्वमवलम्ब्य मोक्षसाधनं कुर्यादित्याह भगवान् शौनकः इत्युपनिषत् ॥

Colophon :

इति परब्रह्मोपनिषत् समाप्ता ॥

312

Sl. No. 1534 **परब्रह्मोपनिषद्भाष्यम्** Ms No. B. 247/38

Beginning :

सन्यासार्ह इति प्रोक्तो यत्रान्तरुपवीतवान् ।
परब्रह्मोपनिषदं व्याख्यास्ये तामिमां शुभाम् ॥

प्राणेभ्यः–– प्राणिभ्यो जीवेभ्य इत्यर्थः । परब्रह्मपुरे देहे सगुणनिर्गुणजीवप्रत्यगात्मानावभिभज्याह– यो विरजादिविशेषणः प्रत्यगात्मा स मधुकरो. मधूनीव सर्वानिन्द्रियव्यापारान् नियच्छति– सर्वप्रत्याहाराधिष्ठानत्वात् स्वस्याखण्डैकरसांशत्वाच्च ॥

End :

अत्रोच्यते– नात्रैकयज्ञोपवीतित्वाभिधानं ब्रह्मचारिपरं मन्तव्यम् ; बाह्यान्तरोपवीतद्वयस्य विवक्षितत्वात् । तथा चाह– बहिरन्तश्चोपवीती विप्रः सन्यस्तुमर्हति ; इति । तस्मादन्तस्सूत्रवान् कूटस्थात्मदर्श्येव सन्यासार्ह इति सर्वमवदातम् ॥

ColoPhon :

इति परब्रह्मोपनिषद्भाष्यं समाप्तम् ॥

313

Sl. No. 1538 **परमहंसपरिव्राजकोपनिषत्** Ms. No. P. 4136/10

Beginning :

भद्रं कर्णेभिरिति शान्तिः । अथ पितामहस्स्वपितरमादिनारायणमुपसमेत्य प्रणम्य पप्रच्छ– भगवन् त्वन्मुखाद्वर्णाश्रमधर्मक्रमं सर्वं श्रुतं, विदितमवगतम् । इदानीं परमहंस-परिव्राजकलक्षणं वेदितुमिच्छामि । कः परिव्रजनाधिकारी ? कीदृशं परिव्राजकलक्षणं ? कः परमहंसः ? परिव्राजकत्वं कथम् ? तत्सर्वं मे ब्रूहीति । स होवाच– भगवानादिनारायणः ॥

End :

षड्भावविकारशून्यः स ज्येष्ठाज्येष्ठव्यवधानरहितः स स्वव्यतिरेकेण नान्यद्रष्टा आशाम्बरो न नमस्कारो न स्वाहाकारो न स्वधाकारश्च न विसर्जनपरो निन्दास्तुतिव्यतिरिक्तो न मन्त्रतन्त्रो-पासको देवान्तरध्यानशून्यो लक्ष्यालक्ष्यनिवर्तकस्सर्वोपरतः सच्चिदानन्दाद्वयचिद्घनस्स पूर्णानन्दबोधो ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स परमहंसपरिव्राडित्युपनिषत् । भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

परमहंसपरिव्राजकोपनिषत् समाप्ता ॥

314

Sl. No. 1546 **परमहंसोपनिषत्** Ms. No. P. 1682/5

Beginning :

अथ हंसपरमहंसनिर्णयं व्याख्यास्यामः– ब्रह्मचारिणो × × तम × × × भक्ताय हंसहंसेति यदायं सर्वे × × × × ते व्याप्तो वर्तते । यथाऽग्निः क × × × तिलेषु ॥

End :

नादो × × × परीत्य × × × वाघ्यसेत् । तस्मान्मनोविलीने मनस × × गते संकल्पविकल्पे दग्धे पुण्यपापे सदाशिवोम् ॥

Colophon :

परमहंसोपनिषत्परिसमाप्ता ॥

315

Sl. No. 1547 परमहंसोपनिषत् Ms. No. P. 1973/5

Beginning :

अथ योगिनां परमहंसानां कोयं मार्गः तेषां का स्थितिरिति नारदो भगवन्तमुपसमेत्योवाच । तं भगवानाह । योऽयं परमहंसमार्गो दुर्लभतरो + + + + तस्मादहं च तस्मिन्नेवावस्थीयते ॥

End :

सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते । यत्पूर्णानन्दैकबोधः तद्ब्रह्मैवाहमस्मीति कृतकृत्यो भवति ; कृतकृत्यो भवति । ॐ शान्तिः ॥

Colophon :

इति परमहंसोपनिषत्समाप्ता ॥

316

Sl. No. 1557 परमहंसोपनिषद्भाष्यम् Ms. No. A. 166/18

Beginning :

परमहंसाश्रमाचारो यस्यां सम्यक् प्रपञ्चितः ।
परमहंसोपनिषदं व्याख्यास्ये सारसङ्ग्रहात् ।

अथेति । कुटीचक-बहूदक-हंस-परमहंसाख्येषु चतुर्विधेषु सन्यासाश्रमेषु कुटीचकादीनां त्रयाणां बाहुल्येऽपि तुर्यस्य बाहुल्याभावा_ र्लभतर इति ॥

End :

यद्यनिहितेषु तेषु प्रवर्तेत तदा कलत्राद्यर्थं इव रसेनैव स्वर्णादीन् परिग्रहेत् ; ब्रह्महत्यादिदोषवांश्च भवेत् । तस्माद आत्मन्येवावस्थीयते– अवतिष्ठते ; स पूर्णानन्दैकरसबोधः परमहंस एव कृतकृत्य इति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ परमहंसोपनिषद्भाष्यं समाप्तम् ॥

317

Sl. No. 1559 **पाशुपतोपनिषत्** Ms. No. B. 247/3

Beginning :

ओं भद्रं कर्णेभिरिति शान्तिः। अथ ह वै स्वयंभूर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते। कामेश्वरो वैश्रवणः। वैश्रवणो ब्रह्मपुत्रो वालखिल्यः स्वम्भुवं परिपृच्छति– जगतां का विद्या? + + + एत्तदहं श्रोतुमिच्छामि। + + + स्वयम्भूरुवाच– कृत्स्नं जगतां मातृका विद्या + + + मम प्राणात्मिका देवता ॥

End :

योगिनामात्मनिष्ठानां माया ह्यात्मनि कल्पिता।
साक्षिरूपतया भाति ब्रह्मज्ञानेन बाधिता ॥
ब्रह्मविज्ञानसम्पन्नः प्रतीतमखिलं जगत्।
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥

इति ॥

Colophon :

इति पाशुपतोपनिषत्समाप्ता ॥

318

Sl. No. 1564 **पाशुपतोपनिषद्भाष्यम्** Ms. No. B. 463/2

Beginning :

सगुणब्रह्मवशता जगतोऽथाद्वयस्थितिः।
यत्र प्रोक्ता पाशुपतोपनिषत्सा प्रपञ्च्यते ॥

अत्र ब्रह्मवैश्रवणसंवादेऽहोरात्रादयो मत्संवर्धिताः काला इति ब्रह्मणा यदभिहितं एतदौपचारिकमेव मन्तव्यम्– कुतः? ब्रह्मणो द्विपरार्धावसानकत्वेन कालाधीनत्वात् ॥

End :

वरीयसो जाग्रति षट्शताधिकत्रिसहस्रश्वासेषु मिश्राश्त्रिसहस्राणि। + + + + सुषुप्तौ मिश्राश्शताष्टकम्। अमिश्रास्सहस्राणि। नष्टाः द्विशताधिकषोडशसहस्रसङ्ख्याकाः। आहत्य षट्शताधिकैकविंशतिसहस्रश्वासास्सिद्धाः ॥

Colophon :

इति श्रीमत्सुन्देश्वरतानपादशिष्याप्पयदीक्षिताचार्यकृतिषु पाशुपतोपनिषद्भाष्यं समाप्तम् ॥

319

Sl. No. 1566 **पिण्डोपनिषत्** Ms. No. P. 3581/15

Beginning :

सह नाववत्विति शान्तिः ।

ओं । देवता ऋषयस्सर्वे ब्रह्माणमिदमब्रुवन् ।
मृतस्य दीयते पिण्डः कथं गृह्णन्त्यचेतसः ॥
भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा ।
हंसस्त्यक्त्वा गतो देहं कस्मिंस्थाने व्यवस्थितः ॥
त्र्यहं वसति तोयेषु त्र्यहं वसति चाग्निषु ।
त्र्यहमाकाशगो भूत्वा दिनमेकन्तु वायुगः ॥

End:

नवमेन तु पिण्डेन सर्वेन्द्रियसमाहृतिः ।
दशमेन तु पिण्डेन भावानां प्लवनं तथा ।
पिण्डे पिण्डे शरीरस्य पिण्डदानेन सम्भवः ॥

Colophon:

इति पिण्डोपनिषत् समाप्ता ॥

320

Sl. No. 1567 **पैङ्गलोपनिषत्** Ms. No. P. 5592/16

Beginning :

ॐ अथ हैनं पैङ्गळः पप्रच्छ, याज्ञवल्क्यं ज्ञानिनां वरम्– किं कर्म ? का च नः स्थितिः ? इति । स होवाच– अमानित्वादिगुणसंपन्नो मुमुक्षुरेकविंशतिं कुलं तारयेत् । ब्रह्मविन्मात्रेण कुलमेकोत्तरं शतं तारयति ।

आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च ॥

End :

प्रायश्चित्तं गूसतनमं (?) सन्यासं व्रतदारणम् (?) ।
तीर्थयात्राभिगमनं ज्ञानी पञ्च विवर्जयेत् ॥

Colophon :

इति पैङ्गलोपनिषत्समाप्ता ॥

321

Sl. No. 1570 **पैङ्गलोपनिषत्** Ms. No. P. 4136/3

Beginning :

पूर्णमद इति शान्तिः। अथ हैनं पैङ्गलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषा-पूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ । स होवाच याज्ञवल्क्यः— सदेव सोम्येदमग्र आसीत् । तत् नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म । + + + । तत्प्रतिविम्बितं यत्तत् साक्षिचैतन्यमासीत् ॥

End :

नाहं ब्रह्मेति जानाति तस्य मुक्तिर्न जायते ।
य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति ॥

तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि फलानि भवन्ति ; प्रणवानामयुतं जप्तं भवति ; दशपूर्वान् दशोत्तरान् पुनाति ; स पङ्क्तिपावनो भवति ; स महान् भवति । + + + + + । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । ओं सत्यमित्युपनिषत् । पूर्णमद इति शान्तिः ॥

Colophon :

पैङ्गलोपनिषत् समाप्ता ॥

322

Sl. No. 1575 **पैङ्गलोपनिषद्भाष्यम्** Ms. No. B. 247/20

Beginning :

सारांसारतरामपण्डितगुणग्राह्यां सदा पण्डितैः
श्लाघ्यां सर्वरहस्यशोधनपरां सूक्तीभिरेवोक्तिभिः ।
एनां पैङ्गलयाज्ञवल्क्यमुनिसंवादात्मिकामुत्तमां
व्याख्यास्ये भुवि पैङ्गलोपनिषदं पश्यन्तु मुक्तीच्छवः ॥

नन्विह मरुजलादिवद्विवर्तवादमनुसृत्य मूलप्रकृतेः स्वरूपं वदन् याज्ञवल्क्यस्तत्प्रतिबिम्बित॰मिति यदाह तदनुपपन्नम्— कुतः ? वादयोरितरेतरविरुद्धत्वात् । + + + मध्यन्तरे— नायं दोषः ; यस्य कस्यापि मुमुक्षोः प्रपञ्चासत्यत्वनिश्चयस्य प्रथममाचार्येणोत्पादयितव्य-त्वात् विवर्तवादानुसरणं न्याय्यमेव ॥

End :

एवमसम्भवेषु कार्येषु सम्भवत्स्वपि ब्रह्मात्मैक्यसम्यग्ज्ञानहीनस्य न कथञ्चन मुक्तिर्जायते । + + + तस्मात् राजयोगारूढानामपि ज्ञानयोगाभ्यास आवश्यक इति स्थितम् ॥

Colophon :

इति पैङ्गलोपनिषद्भाष्यं समाप्तम् ॥

323

Sl. No. 1578 पैप्पलादोपनिषत् Ms. No. P. 5717/8

Beginning :

अथ हैनं पैप्पलादो ब्रह्माणमुवाच– भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा अधिको ध्येयश्च तत्त्वं मे ब्रूहीति । तस्मै स होवाच पितामहः प्रभुः– हे पैप्पलाद शृणु वाक्यमेतत्–

बहूनि पुण्यानि कृतानि येन तेनैव लभ्यः परमेश्वरोऽसौ ।
यस्याङ्गजोऽहं हरिरिन्द्रमुख्या मोहान्न जानन्ति सुरेन्द्रमुख्याः ॥

End :

एतद्धै पैप्पलाद महाशास्त्रं योऽधीते सर्वपापाद्विमुक्तो भवति ; सर्वाध्यायी भवति ; पवमानाध्यायी भवति ; इत्याह भगवान् ब्रह्मा ॥

Colophon :

इति पैप्पलादोपनिषत् समाप्ता ॥

324

Sl. No. 1586 पैप्पलादोपनिषत् Ms. No. C. 3682/20

Beginning :

सर्वं सन्त्यज्य मुनयो यद्व्रजन्त्यात्मरूपतः ।
तच्छारभं त्रिपाद्ब्रह्म स्वमात्रमवशिष्यते ॥

ओं भद्रं कर्णेभिरिति शान्तिः । अथ हैनं पैप्पलादो ब्रह्माणमुवाच– भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा कतरो ध्येयस्स्यात्तत्त्वमेव नो ब्रूहीति ॥ तस्मै स होवाच–

\+ + + + + +

प्रभुं वरेण्यं पितरं + + + विदधानि तस्मै ॥

+ + + + + +

वेदांश्च सर्वान् + + + पितरं देवतानाम् ॥

End :

एतत्पैप्पलादं महाशास्त्रं योऽधीते श्रावयेद्द्विजः । स जन्ममरणेभ्यो मुक्तो भवति ; तस्मादविमुक्तमाश्रितो भवति ; सततं शिवप्रियो भवति ; शिवसायुज्यमेति ; न स पुनरावर्तते ; न स पुनरावर्तते ; इत्याह भगवान् ब्रह्मेत्युपनिषत् ॥

Colophon :

इति शरभोपनिषत्समाप्ता ॥

325

Sl. No. 1587 पैप्पलादोपनिषद्भाष्यम् Ms.No. B. 247/12a

Beginning :

सगुणोत्कर्षवादिन्यामप्युक्तो निर्गुणः शिवः ।
शैवोपशान्त्यै शरभश्रुतिर्व्याख्यास्यते तु सा ॥

यद्यपीह ब्रह्मविष्णुरुद्राणां मध्ये को वाऽधिकतरो ध्येय इत्युपक्रमानुरोधेन सगुणस्य रुद्राख्यस्य शिवस्यैवाधिक्यमुपपादितम् ; तथापि 'यतो वाचो निवर्तन्ते' + + इति श्लोकैर्निर्गुणस्य परमशिवस्यैव + + + + प्रतिपाद्यमानत्वात् निर्गुणपरत्वमेवास्या उपनिषदो वक्तव्यम् ॥

End:

यद्यपि शास्त्रैकवाक्यत्वं निर्गुणब्रह्मणि सिध्यत्येव ; + + + तथापि व्यावहारिकेतरजन्यजनकतायाश्च वास्तवत्वात्कस्य चिदपि मतवादिनः स्वान्यमतविषयकापकर्षनिर्वाहकत्वं न कदाचन सेत्स्यति । तस्मादलमतिप्रपञ्चेन ॥

Colophon :

इति शरभोपनिषद्भाष्यं समाप्तम् ॥

326

Sl. No 1590 प्रणवोपनिषत् Ms No. B. 159/1

Beginning :

ओंनमस्सारभूताय लोकादीनां परात्मने ।
ब्रह्मणः कोशरूपाय विश्वामित्राय मूर्तये ॥

ओङ्कारयोगं योगानां सारभूतं रसायनम् ।
संसारव्याधितप्तानां व्याख्यास्यामो विमुक्तये ॥

End :

गुरूपदिष्टविज्ञानसारथिं समुपाश्रितः ।
मनसा प्रग्रहेणैव याति विष्णोः परं पदम् ॥ ७३ ॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ ७४ ॥

Colophon :

इत्योंकारयोगाख्यः प्रणवोपनिषत्कल्पः समाप्तः ॥

327

Sl. No. 1591 प्रणवोपनिषत् Ms. No. P.1682/6

Beginning :

प्रसा [दाद्ब्रह्मण]स्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं [ब्रह्मवि]द्यायां ध्रुवम [धृता]ग्निस्संप्रगृह्यते ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ॥
संसारव्याधितप्तानां व्याख्यास्यामो विमुक्तये ॥

End :

यस्मिन् विलीयते शब्दः तत्परं ब्रह्म गीयते ।
ध्रुवन्तं चिन्तयेत् ब्रह्म सोऽमृतत्वाय कल्पते ॥
सोऽमृतत्वाय कल्पत इति ॥

Colophon :

समाप्तेयं ब्रह्मविद्योपनिषत् ॥

328

Sl. No. 1597 ध्यानबिन्दूपनिषद्भाष्यम् Ms. No. B. 247/3

Beginning :

अथ ब्रह्मविद्योपनिषदुच्यते— सह नाववत्विति शान्तिः ।
प्रसादाद्ब्रह्मणऽस्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं ब्रह्मविद्यायां ध्रुवाग्नि सम्प्रचक्षते ॥ १ ॥

ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयं तथा ॥ २ ॥

End :

सच्चिदानन्दमात्रोऽहं स्वप्रकाशोऽस्मि चिद्घनः ।
सत्यस्वरूपसन्मात्रसिद्धः सन्मात्रकोऽस्म्यहम् ॥ १०८ ॥
सर्वाधिष्ठानसन्मात्रस्वात्मबन्धहरोऽस्म्यहम् ।
सर्वग्रासोऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् ॥ १०९ ॥
एवं यो वेद तत्त्वेन स वै पुरुष उच्यते ।

इत्युपनिषत् ॥

Colophon :

ओं ब्रह्मविद्योपनिषत्समाप्ता ॥

329

Sl. No. 1602 प्रणवोपनिषद्भाष्यम् Ms. No. B. 471/2

Beginning :

उत्तरोत्तरमुत्कृष्टा यत्राचार्यास्त्रयो मताः ।
ब्रह्मविद्योपनिषदं व्याख्यास्ये तामिमामिह ॥

नन्वेकस्यामुपनिषद्युक्ता एवार्थाः पुनःपुनरन्यासु चोपनिषत्सु उच्यन्ते । श्रुतार्थानामेव पुनःपुनः हि श्रवणेन हि श्रोतॄणां मुमुक्षूणां वैरस्यमुपजायेत ॥

End :

पाशुपतोपनिषद्भाष्ये ब्रह्मणः प्राणनाशासम्भवात् इत्युक्तिरूपनाशाभिप्राया अवगन्तव्या । दर्शनादिषु चतुर्षु प्राणानामपि स्वरूपनाशसम्भवात् निर्विकल्पादिचतुर्ष्वरूप[illegible]शसंभवाच्च । तस्मात् प्रमाणत्रयानुरोधेन प्रपञ्चितानिमान् सूक्ष्मार्थान् धीमन्तः सूक्ष्मया धियाऽवगच्छेयुरित्यस्मन्मनो विश्वसिति ॥

Colophon :

इति ब्रह्मविद्योपनिषद्भाष्यं समाप्तम् ॥

330

Sl. No. 1604 **प्रश्नोपनिषत्** Ms. No. P. 1958/5

Beginning :

सुकेशा च भारद्वाजः शैव्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनः भार्गवो वैदर्भिः कबन्धी कात्यायनः ते हैते ब्रह्मपराः ब्रह्मनिष्ठाः ब्रह्मान्वेषमाणाः एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ ॥ तान् ह ऋषिरुवाच— + + यथाकामं प्रश्नान् पृच्छत + + + सर्वं ह वो वक्ष्याम इति ॥ २ ॥

End :

ते तमर्चयन्तः त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयिताऽसीति । नम परमऋषिभ्यो नमः परमऋषिभ्यः ॥

Colophon:

इति प्रश्नोपनिषत् ॥

331

Sl. No. 1630 **प्रश्नोपनिषद्भाष्यविवरणम्** Ms. No. B. 1000/2

Beginning :

ब्रह्मा देवानामित्यादिमन्त्रेणैवात्मतत्त्वस्य निर्णीतत्वात् तत्रैव ब्राह्मणेन त × × × नं पुनरुक्तमित्याशङ्क्य तदेवेह विस्तरेण प्राणोपासनादिसाधनसाहित्येनाभिधानान्न पौनरुक्त्यमिति वदन् ब्राह्मणमवतारयति – मन्त्रेति ॥

End :

पितृत्वादेव किं पूज्यतरत्वं परि × × यित्वं स्वामित्वं किमु वक्तव्यमित्यर्थः । वाजसनेयके × × × × × सह दास्यायेत्युक्तमिति भावः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्येन्द्रशिष्यज्ञानेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वती-विरचितं प्रश्नोपनिषद्भाष्यविवरणं समाप्तम् ॥

332

Sl. No. 1631 — प्रश्नोपनिषद्भाष्यविवरणम् — Ms. No. C 1521

Beginning :

यद्बोधादिदं याति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

+ आथर्वणे ब्रह्मा देवानामित्यादिमन्त्रैरेवात्मतत्त्वस्य निर्णीतत्वात्तत्रैव ब्राह्मणेन तदभिधानं पुनरुक्तमित्याशङ्क्य तस्यैवेह विस्तरेण प्राणोपासनादिसाधनसाहित्येनाभिधानान्न पौनरुक्त्यमिति वदन् ब्राह्मणमवतारयति— मन्त्रेति । विस्तरेति ॥

End :

पितृत्वादेव किं पूज्यतरत्वं परिचार्यत्वं स्वामित्वं किन्नु वक्तव्यमित्यर्थः । अत एव वाजसनेयके मां चापि सह दास्यावेत्युक्तमिति भावः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कैवल्येन्द्रशिष्यज्ञानेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वतीविरचितप्रश्नोपनिषद्भाष्यविवरणं समाप्तिमगमत् ॥

333

Sl. No. 1634 — प्रश्नोपनिषद्भाष्यम् — Ms. No. B. 245/4B

Beginning :

सद्गुरुं सच्चिदानन्दस्वरूपं सुन्दराभिधम् ।
नत्वाऽधुनाऽहं व्याख्यास्ये प्रश्नोपनिषदं स्फुटम् ॥

सुकेशा च नामतः, भरद्वाजस्यापत्यं भारद्वाजः, शिबेरपत्यं शैब्यश्च सत्यकामो नामतः, सूर्यस्यापत्यं सौर्यः + + + समिद्भारगृहीतहस्ताः सन्तः भगवन्तं प्रजावन्तं पिप्पलादमाचार्यमुपसम्पन्नाः ॥

End :

नातः परमस्तीति विश्वं श्रुतवन्तस्ते शिष्यास्तमाचार्यं + + एवमूचुः— योऽस्माकमस्मान् अविद्याया अनादिसंसारबीजभूतायाः परं पारं परमात्मानं + नमः परमर्षिभ्यः ब्रह्मविद्यासम्प्रदायकर्तृभ्यः नमः परमर्षिभ्य इति द्विर्वचनं प्रश्नपरिसमाप्त्यर्थम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्यमाप्पयदीक्षिताचार्यकृतौ प्रश्नोपनिषद्भाष्ये षष्ठः प्रश्नः । प्रश्नोपनिषद्भाष्यं समाप्तम् ॥

334

Sl. No. 1644 प्रश्नोपनिषद्भाष्यटीकाटिप्पणम् Ms. No. C. 3095

Beginning :

नारायणं नमस्कृत्य पूर्णबोधान् गुरूनपि ।
षट्प्रश्नोपनिषद्भाष्यटीकाव्याख्यां करोम्यहम् ॥

End :

वचनप्रसूनमालेति । कमला महिळा पत्नी यस्य सः कमलामहिळः । तेन 'वनिता महिला तथा' इत्यमरः ॥

Colophon :

इति श्रीमत्षट्प्रश्नटिप्पणी कलारिनृहरिकृता समाप्ता ॥

335

Sl. No. 1645 प्रश्नोपनिषद्भाष्यटीकाटिप्पणम् Ms. No. C. 60

Beginning :

कमलाकवरीभार इति । कमलायाः कवरीलक्षणो भारः केशपाश इत्यर्थः । तेन भारशब्दस्यैव केशपाशवाचित्वेन कबरीशब्दो व्यर्थ इति शङ्कानवकाश इति ज्ञेयम् । अत एव चमरीणां वालभाराः केशसमूहाः इति व्याख्यातम् ॥

End:

एकस्यैवाग्नेः तापकत्वं यज्ञभागवाहकत्वं च प्राणाधीनमित्युच्यत इति न पौनरुक्त्यमिति भावः । एवमुत्तरत्रापि । प्रज्ञाशब्दो प्रकृतोपयोगितया व्याचष्टे । प्रधारणं शोभामिति यावत् इति । प्रकाशनत्वशक्ति चेति ॥

Colophon:

इति द्वितीयः प्रश्नः ॥

336

Sl. No. 1646 प्रश्नोपनिषद्भाष्यटीका (पञ्चिका) Ms. No. C. 2403

Beginning :

यादवार्यगुरुं नत्वा तदुपादिष्टमार्गतः ।
षट्प्रश्नोपनिषद्भाष्यटीका विव्रियते मया ॥

इह खलु जयतीर्थश्रीचरणाः सुरवरावतारपूर्णप्रज्ञविरचितषट्प्रश्नोपनिषद्भाष्यव्याख्यान-विघ्नपरिसमाप्त्यर्थं रेणुस्तुतिव्याजेन भगवन्तं प्रार्थयति— जयन्तीति ॥

End:

एवं समापितग्रन्थाष्टीकाकाराः स्वकृतां वचनप्रसूनमालां भगवत्यर्पयन्ति— वचनेति ॥

श्रीनिवासेन विदुषा रचिता टिप्पणी शुभा ।
भूयाच्छ्रीव्यासदेवस्य पदयोरर्चिता सदा ॥

Colophon :

इति श्रीमद्यदुपत्याचार्यपूज्यपादशिष्येण श्रीनिवासेन विरचिता षट्प्रश्नोपनिषद्भाष्य-टीकायाः पञ्चिका समाप्ता ॥

337

Sl. No. 1647 प्रश्नोपनिषद्भाष्यटीका (विवरणम्) Ms. No. C. 869

Beginning :

नमो भगवते तस्मै प्राणादिप्रभविष्णवे ।
अमन्दानन्दसान्द्राय वासुदेवाय वेधसे ॥
श्रीमदानन्दतीर्थार्यानुज × × श्चिद्गुरूनपि ।
नत्वा षट्प्रश्नटीकार्थं वक्ष्ये हन्त कृपाबलात् ॥

मङ्गलमाचरति— पान्त्विति । गुरुत्ववाचकभारशब्दस्य पूर्वनिपातः । गुरुतरकबरीसुर-भीकरणोन्मुखा इति माऽवतु ॥

End :

आदरार्थ इति । आदिपदेन पूर्वोक्तस्यावधारणञ्च गृह्यते । नत एवेति । शिष्यशिक्षार्थमेव ॥

विठलाचार्यपुत्रेण श्रीमत्तीर्थार्यसेविना ।
श्रीनिवासेन विवृता टीका षट्प्रश्नभाष्यगा ॥
नमो नमोऽस्तु हरये प्रेष्ठप्रेष्ठतमाय ते ।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥

Colophon :

इति श्रीविठलाचार्यपुत्रेण श्रीमत्तीर्थाचार्यचरणसेविना विरचितं षट्प्रश्नटीकाविवरणं समाप्तम् ॥

338

Sl. No. 1648 षट्प्रश्नोपनिषद्भाष्य टीका टिप्पणी (पञ्चिका) Ms. No. C. 2352

Beginning :

श्रीवासुदेवमानम्य पूर्णबोधगुरूनपि ।
करिष्ये प्रश्नषट्कीयभाष्यव्याख्यानपञ्चिकाम् ॥

जयतीर्थश्रीमच्चरणः षट्प्रश्नभाष्यं व्याचिख्यासुः श्रीमन्नारायणचरणनलिनपरागकर्तृक-स्पावनप्रार्थनरूपं मङ्गलमादौ निबध्नाति– पान्त्विति ॥

End :

कमलापतेः एतादृशमालाधारणेन किं प्रयोजनं इत्यत उक्तम्– सदय इति । भक्तानु-कम्पयैव धारणमिति भावः ॥

अबोधागम्यषट्प्रश्नटीकाव्याख्यानमात्रतः ।
इन्दिरारमणः प्रीतिं पातु मध्वार्यहृद्गतः ॥

Colophon :

इति मङ्गलीध ाचार्यविरचितं षट्प्रश्नभाष्यटीकाविवरणम् समाप्तम् ॥

339

Sl. No. 1649 प्रश्नोपनिषद्भाष्यटीका (भावविवरणम्) Ms. No. C. 2366

Beginning :

श्रीवासुदेवमानम्य × र्ण ××× नपि ।
कार ×××× षट्कीयभष्यव्याख्यानपङ्क्तिकाम् ॥

× × र्थ श्रि × × षट्प्रश्न × × व्याचख्या × × श्रीनारायणनलिनपराग-कर्तृकस्वाव × × × × प्रार्थनरूपमङ्गलं आदौ निबध्नाति- पान्त्विति ॥

End :

वचनेति । वचनान्येव प्रसूनानीति वा समासः । कमलाधार × × × प्रयो-जनमित्यत उक्तम्- सदय इति । भक्तानुकम्पयैव धारणमिति भावः ॥

षट्प्रश्नभाष्यटीकाया किंचिद्व्याख्यानमात्रतः ।

इन्दिरारमणः प्रीतिं यातु मध्वार्य × × × त ।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितषट्प्रश्नभाष्यटीकाभावविवरणं समाप्तम् ॥

340

Sl. No. 1650 प्रश्नोपनिषद्भाष्यटीका Ms. No. C. 2247

Beginning :

गुह्यार्थप्रश्नोपनिषद्भाष्यव्याख्यां कर्तुकामः तदर्थ × × × ये हरिं प्रार्थयते-पान्त्विति ॥ पारावारः समुद्रः । तदितिकर्तव्यतारूपन्यायाः गर्भे यस्येति विग्रहः ॥

End :

× × × ज्ञानपूर्वकोपासनाद्धरेः ।

मोक्षदा फलदा तस्मादाद्यां समाचरेत् ॥

प्राणश्रद्धा शिवेन्द्रेन्दुवरुणाग्निगणाधिपाः ।

मरुत्पावकपर्जन्यस्वाहा बुध उषा शनिः ।

पुष्कराश्चेति हरौ (?) कला षोडशसंज्ञिता ।

इत्याद्यर्थपरिज्ञानं न कार्याय प्रयच्छतु ॥

षट्प्रश्नोपनिषद्भाष्यटीकाव्याख्यां व्यधाम्यहम् ।

श्रीनिवासाभिधो दासः कोनेर्याचार्यसद्गुरोः ॥

Colophon :

इति श्रीषट्प्रश्नोपनिषद्भाष्यव्याख्यानं समाप्तम् ॥

341

Sl. No. 1651 प्रश्नोपनिषत्खण्डार्थः (प्रकाशिका) Ms. No. B. 83-84/4

Beginning :

वासुदेवं प्रणम्यैनं जयार्योत्तमलंबनात् ।
षट्प्रश्नोपनिषत्खण्डसत्तत्त्वार्थः प्रकाश्यते ॥

इह हि सांसारिकविविधदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः + + वासुदेवं ज्ञापयितुमियमुपनिषत्प्रवृत्ता । तत्रादौ + + + श्रद्धाजननायाख्यायिकामाह— सुकेशा इति ॥

End :

शिष्यशिक्षार्थं प्रवर्तकऋषीन् प्रणमति— नम इति । परमऋषिभ्यो पिप्पलादिभ्यो नमः । आदरात् द्विरुक्तिः ॥

विद्याधीशार्यशिष्येण नरसिंहेन भिक्षुणा ।
रचिता श्रीशसन्तुष्ट्यै षट्प्रश्नार्थप्रकाशिका ॥

Colophon :

इति षट्प्रश्नोपनिषत्खण्डार्थप्रकाशिका समाप्ता ॥

342

Sl. No. 1652 नृसिंहपूर्वतापिनीव्याख्या Ms No. C. 2345

Beginning :

प्रणम्य नमनीयं तं नाथं वाचामधीश्वरम् ।
कान्ताशेषकल्याणकलनाकल्पपादपम् ॥
विद्याधीशार्यशिष्येण नृसिंहाख्येन भिक्षुणा ।
विरच्यते श्रीशतुष्ट्यै षट्प्रश्नार्थप्रकाशिका ॥

इह खलु सुखमेव मे स्यात् + + निखिलापेक्षितसुखात्ममोक्षस्य नारायणात्यर्थप्रसादमन्तरेण अनुदयात्तदर्थं + + + आनन्दतीर्थमुनिः षट्प्रश्नोपनिषत्खण्डं व्याख्यातवान् । ततश्च + + + मन्दानां दुरवगाहमिति मामकीनः प्रयत्नः । तत्रादौ वेदपुरुषः सुकेशादिमहर्षिप्रश्नप्रतिवचनपूर्वकं तावत्स्वरूपं प्रतिपादयति— सुकेशेत्यादिना ॥

End :

प्राण एवेति निश्चित्य स × × णजी × लाभि × × मसृजत। × × त × × जीव × × आ × × बुध्यभिमानि × × × ततः स्वयं आकाश अत्र सृष्टिकथनेन तात्पर्यं × × × विशेषप्रमाण × × × ×। तथाहि विशेष × × × × × × × × × × × × ×॥

Colophon :

— — —

343

Sl. No. 1653 **प्रश्नोपनिषद्वाक्यार्थः** Ms. No. P. 446/3

Beginning :

दीर्घस्सुलोपः छान्दस इति। सौर्यायाणिरिति भाव्यम्। सौर्यायणीति दीर्घः सुलोपश्च छान्दसः इति भावः। एष ह वै तत्सर्वमित्यत्र ह वै इति छेदः॥

End :

तेनैव परामर्श इति नियमस्तु आत्मन आकाशः सम्भूतः इत्यादौ व्यभिचरितः रितः। तत्रात्मशब्देन प्रकृतस्य विष्णोः स वा एष पुरुषः इत्युत्तरत्र पुरुषशब्देन परामर्शादित्याहन ह्येवमिति। असति बाधके एवेति नियमः × × × × × × × × × ॥

Colophon :

— — — — —

344

Sl. No. 1655 **प्रसादजाबालोपनिषत्** Ms No. P. 8234

Beginning :

अथ हैनं महेश्वरं पैप्पलादो भगवन्तं सनत्कुमारं पप्रच्छ– शिवनिर्माल्यविधिं ब्रूहीति। स होवाच– शिवस्य पुरस्तात्॥

End :

एतदनुष्ठानात् सर्वलोकपूज्यो भूत्वा शिवपुरं गत्वा शिवसायुज्यमवाप्नोति। ॐ सत्यमों शिवसायुज्यमिति॥

Colophon :

इति प्रसादजाबालोपनिषत्समाप्ता॥

345

Sl. No. 1658 प्राणाग्निहोत्रोपनिषत् Ms. No. C. 3777/15

Beginning :

विनयेनोपसंगम्य ब्रह्माणं नारदोऽब्रवीत् ।
प्राणाग्निहोत्रं विधिवद्वद लोकपितामह ।।

ब्रह्मा उवाच— + + +
प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् ।
यज्जत्वा मुच्यते जन्तुर्जन्ममृत्युजरादिभिः ।।

End :

पञ्चभिः पञ्चकोष्ठ्यम्तु अनन्तं तृप्तिद भवेत् ।
दातुश्चैव तु यत्पुण्यं भोक्तुश्चैव तु यत्फलम् ।।
तत्फलं समवाप्नोति विष्णुसायुज्यमा यान् ।
भोक्ता भोजयिता चैव जगौ तौ स्वर्गगामिनौ ।।

जगौ तौ स्वर्गगामिनौ इति ।।

Colophon :

प्राणाग्निहोत्रोपनिषत्समाप्ता ।।

346

Sl. No. 1659 प्राणाग्निहोत्रोपनिषत् Ms. No. P. 3581/14

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।। अथातस्सर्वोपनिषत्सारं संसारज्ञानातीतमन्त्रसूक्तं शारीरं यज्ञं व्याख्यास्यामः— यस्मिन्नेव पुरुषशरीरे विनाऽप्यग्निहोत्रेण, विनाऽपि साङ्ख्ययोगेन संसारविमुक्तिः भवतीति ।।

End :

अस्य शारीरयज्ञस्य यूपरशनाशोभितस्यात्मा यजमानः । बुद्धिः पत्नी । + + ५ अवभृथं मरणम् । सर्वा ह्यस्मिन् देवताः शरीरेऽधिसमाहिताः ।।

वारणस्यां मृतो वाऽपि इदं वा ब्राह्मणः पठेत् ।
एकेन जन्मना जन्तुः मोक्षं च प्राप्नुयादिति ॥

Colophon :

इत्याथर्वणीये प्राणाग्निहोत्रोपनिषत्समाप्ता ॥

347

Sl. No. 1664 **प्राणाग्निहोत्रोपनिषद्भाष्यम्** Ms. No. A. 167/20

Beginning :

शारीरयज्ञो मोक्षार्थो यत्रोक्तः कर्मरूपकः ।
प्राणाग्निहोत्रसंज्ञाया व्याख्या चारभ्यते श्रुतेः ॥

अथात इति । सर्वोपनिषत्सु सारभूतं संसाराज्ञानाभ्यामतीतमन्त्रसूक्तसंज्ञकं शारीरयज्ञं शरीरे निर्वर्त्यः शारीरस्स चासौ यज्ञश्च— तं व्याख्यास्यामः ॥

End :

ननु भविष्यज्जन्मनेति वक्तुमयुक्तं ; वाराणसीमृतस्यानन्तरजन्मानभ्युपगमात् । अतः तेनैवैकेन जन्मना मुक्तिरिति व्याख्येयमिति । अत्रोच्यते— तस्य जन्मनः पूर्वजन्मनामिव गळितत्वेन निर्देश्यत्वानुपपत्तेरनन्तरजन्मैवाभिप्रेतमिति । मुक्तिकोपनिषदि क्रममुक्त्यभ्युपगमात् वाराणसीमृतस्य कालविळम्बसापेक्षकैवल्यार्थकसारूप्यमपेक्ष्यैकजन्मपरमित्यनवद्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ प्राणाग्निहोत्रोपनिषद्भाष्यं समाप्तम् ॥

348

Sl. No. 1666 **बह्वृचोपनिषत्** Ms. No. A. 167/3-

Beginning :

ओं वाङ्मे मनसीति शान्तिः । देवी ह्येकाग्र आसीत् । सैव जगदण्डमसृजत । कामकलेति विज्ञायते ; शृङ्गारकलेति विज्ञायते । तस्या एव ब्रह्मा अजीजनत् ; विष्णुरजीजनत् ; रुद्रोऽजीजनत् ; सर्वे मरुद्गणा अजीजनन् ; + + + + + सैषा परा शक्तिः ॥

End:

ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥

इत्युपनिषत् ॥

Colophon :

बह्वृचोपनिषत्समाप्ता ॥

349

Sl. No. 1669 बह्वृचोपनिषत् Ms. No. A. 167/40

Beginning :

यस्यां देवी महावाक्यैश्चतुर्भिर्भाष्यते परा ।
बह्वृचाख्योपनिषदं व्याख्यास्ये तां द्विलिङ्गकाम् ॥

देवीति । अग्रे– प्राक् जगदुत्पत्तेः देवी सगुणनिर्गुणोभयात्मिका एका ह्यद्वितीया आसीत् ॥

End :

अयं भावः– लोके अधीतसमस्तवेदमन्त्रोऽपि पुरुषस्तत्परमतात्पर्यभूतपरब्रह्मात्मैक्यापरोक्षज्ञानानुभवहीनश्चेत्तदा तदध्ययनश्रमश्चित्तशुद्धिमात्रप्रयोजनो भवेत् । न तु सद्योमुक्तिप्रयोजनन इति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ बह्वृचोपनिषद्भाष्यं समाप्तम् ॥

350

Sl. No. 1671 बिल्वोपनिषत् Ms. No. B. 913/6

Beginning :

ॐ, सह नाववत्विति शान्तिः । ओम् , अथ सनत्कुमारो भगवन्तं परमेश्वरं परिसमेत्योवाच–

कदाचिदासीनमुवाच बिल्वमुनिर्महेशं भगवन्तमव्ययम् ।
विचार्य वक्तुं तु सनत्कुमारं प्रोवाच तस्मै भगवान् महेशः ॥

पुरा जगन्मातृतपःप्रभावादासीन्महाबिल्ववनस्पतिर्भुवि ।
अभू × × × उद्गतो यस्मात्तस्माद्बैल्वजनिर्द्रुमः ॥

End :

बिल्वं विधानतः स्थाप्य वर्धयित्वा च तद्दळैः ।
यः पूजयति मां भक्त्या सोऽहमेव न संशयः ॥

य एतदधीते ब्रह्महाऽब्रह्महा भवति ; स्वर्णस्तेय्यस्तेयी भवति ; सुरापाय्यपायी भवति ; गुरुवधूगाम्यगामी भवति ; महापातकोपपातकाच्च पूतो भवति ; न च पुनरावर्तते ; न च पुनरावर्तत इति । ओम् , सह नाववत्विति शान्तिः ॥

Colophon :

इति बिल्वोपनिषत् समाप्ता ॥

351

Sl. No. 1672 बृहज्जाबालपूर्वतापनीयोपनिषत् Ms. No. P. 3621/15

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः । आपो वा इदमासत् सलिलमेव । स सप्रजापतिरेकः पुष्करपर्णे समुण्ढः समभवत् । तस्यान्तर्मनसि कामस्समभवत् । इदं सृजेयमिति । तस्मा-द्यत्पुरुषो मनसाऽभिगच्छति ; तद्वाचा वदति ; तत्कर्मणा करोति ; तदेषाऽभ्युक्ता ॥

End :

य एतद्बृहज्जाबालं नित्यमधीते स ऋचोऽधीते + + + + तद्वा एतत् परं धाम बृहज्जाबालोपनिषज्जपशीलस्य, यत्र न सूर्यस्तपति यत्र + + + + यत्र गत्वा न निवर्तन्ते योगिनः । तदेतदृचाऽभ्युक्तम् । तद्विष्णोः परमं पदं + + । विष्णोर्यत्परमं पदम् । ओं सत्यम् । न स पुनरावर्तते सत्यमों सत्येन्नदेतन्निष्कामस्य (?) भवति निष्कामस्य भवति ॥

Colophon :

इति मुक्तिश्रुत्यभिधेयायां बृहज्जाबालोपनिषदि षष्ठं ब्राह्मणम् ॥

352

Sl. No. 16 5 **बृहज्जाबालपूर्वतापनीयोपनिषत्** Ms No. B. 915/2

Beginning :

ॐ, भद्रं कर्णेभिरिति शान्तिः । ओम्, आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे भुसुण्डः समभवत् । तस्यान्तर्मनसि कामः समवर्तत । इदँ सृजेयमिति तस्माद्यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदति ; तत्कर्मणा करोति । तदोषाऽभ्युक्ता ॥

End :

य एतद्बृहज्जाबालं नित्यमधीते स ऋचोऽधीते + + + + + यत्र न दुःखानि प्रविशन्ति सदानन्दं शान्तं शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं परमं पदं, यत्र गत्वा न निवर्तन्ते योगिनः । तदेतदृचाऽभ्युक्तम् । तद्विष्णोः परमं + + विष्णोर्यत्परमं पदम् । ओम् सत्यम् । न स पुनरावर्तते न स पुनरावर्तते । ओम् सत्यम् ॥

Colophon :

इति मुक्तिश्रुत्यभिधेयायां बृहज्जाबालोपनिषदि षष्ठं ब्राह्मणम् । बृहज्जाबालोपनिषदि-पूर्वतापनीयोपनिषत् समाप्ता ॥

353

Sl. No. 1677 **बृहज्जाबालपूर्वतापनीयोपनिषत्** Ms. No. P. 3581/25

Beginning :

भद्रं कर्णेभिरिति शान्तिः । आपो वा इदमासस्सलिलमेव । स तपस्तप्त्वा स एतं भुसुण्डः कालाग्निरुद्रमगमत् । आगत्याहो विभूतेर्माहात्म्यं ब्रूहीति । तथेति प्रत्यवोधत् ॥

End :

यदा मूत्रं रेतः पुरीषं वा विसृजन्ति तदा तेन शिञ्चते (?)पितॄन् तमेव पापकारिणं मृतं पश्य नीललोहितो भैरवस्तं पातयत्यसृङ्मण्डले ज्वलज्ज्वलनकुण्डेष्वन्येष्वपि । ततश्च अप्रमादेन निवसेदप्रमादेन निवसेत् । काश्यां (?) लिङ्गरूपिण्यम् (?) । आपो इदमासन्निति शान्तिः ॥

Colophon :

इति बृहज्जाबालोपनिषत्समाप्ता ॥

354

Sl. No. 1678 बृहज्जाबालोपनिषद्भाष्यम् Ms. No. A. 166/32

Beginning :

भूतिरुद्राक्षयोर्यत्र माहात्म्यं बहुधोच्यते ।
बृहज्जाबालसंज्ञां तां व्याख्यास्ये श्रुतिमद्भुताम् ॥

सलिलजोद्भवो ब्रह्मा । तस्य मनसीदं जगत्सृजेयमिति काम उद्भूतः । + + +
अस्य प्रथमब्राह्मणस्य भुसुण्डकालाग्निरुद्रसंवादात्मकस्य विभूतेर्नामपञ्चकप्रतिपादनप्राधान्यदर्शनात्तद्वि-चारोऽवश्यकार्यः ॥

End :

न चास्यामुपनिषदि सायुज्यमुक्तिः केवलमुक्ता न कैवल्यमिति वाच्यम् । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्युपसंहारेण परमस्य विष्णुपदस्याभिहितत्वेन कैवल्यपदस्य संसिद्धत्वात् । तस्मादनवद्यम् ॥

Colophon :

इति बृहज्जाबालोपनिषद्भाष्यं समाप्तम् ॥

355

Sl. No. 1680 बृहज्जाबालोत्तरतापिन्युपनिषत् Ms. No. P. 1973/31

Beginning :

अथ हैनं भगवन्तं कालाग्निरुद्रं भुसुण्डः पप्रच्छ– कथं रुद्राक्षोत्पत्तिः ; तद्धारणात्किं फलमिति । तं होवाच– भगवान् कालाग्निरुद्रः ॥

End :

द्वितीयं जप्त्वा गाणापत्यमवाप्नोति । तृतीयं जप्त्वा देवदेवमेव प्रविशतीत्यों सत्यं ओं सत्यं ओमित्युपनिषत् ॥

Colophon :

इत्यष्टमं ब्राह्मणम् इति बृहज्जाबालोपनिषत् (?) समाप्ता ॥

356

Sl. No. 1685 **रुद्राक्षजाबालोपनिषत्** Ms No. B. 1039/18

Beginning :

ओं आप्यायन्त्विति शांतिः । अथ हैनं कालाग्निरुद्रं भुसुण्डः पप्रच्छ । कथं रुद्राक्षोत्पत्तिः । तद्धारणात् किं फलमिति । तं होवाच कालाग्निरुद्रः त्रिपुरवधार्थमहं निमीलिताक्षोऽभवम् । तेभ्यो जलबिन्दवो भूमौ निपतितास्ते रुद्राक्षा जाताः ॥

End :

तद्रुद्राक्षे शिरसि धार्यमाणे कोटिप्रदानफलं भवति + + + + पङ्क्तिशत सहस्रपावनो भवति; शिवसायुज्यमाप्नोति; न च पुनरावर्तते; न च पुनरावर्तते; इति ओं सत्यमित्युपनिषत् ॥

Colophon :

इति रुद्राक्षजाबालोपनिषत् समाप्ता ॥

357

Sl. No. 1688 **रुद्राक्षजाबालोपनिषद्भाष्यम्** Ms. No. B. 247/48

Beginning :

रुद्राक्षोत्पत्तिमाहात्म्ये प्रोच्येन यत्र शम्भुना ।
सैषा व्याख्यास्यते मुक्त्यै रुद्राक्षोपनिषन्मया ॥

अत ऊर्ध्वं धारणे फलमित्यर्थः । वक्तुं न शक्नोतीत्युक्त्या मुक्तिरेव संसारबन्धात्फलमभिप्रेतं स्यात् ॥

End :

न च पुनरावर्तते इति द्विरुक्त्या रुद्राक्षधारिणामपुनरावृत्तेर्निश्चितत्वान्निर्गुणसायुज्यमुक्तिरेव प्रकृते द्रुतमवगन्तुम् । + + मामुपेत्य + + इति स्मृतेर्ब्रह्मभवनं गतस्याप्यवगम्यमाना पुनरावृत्तिः सगुणमुक्तस्येत्यतो रुद्राक्षधारणं निर्गुणब्रह्मोपासनाङ्गमिति स्थितम् ॥

Colophon:

इति रुद्राक्षजाबालोपनिषद्भाष्यं समाप्तम् ॥

358

Sl. No. 1720 **बृहदारण्कोपनिषद्वार्तिकटीका (शास्त्रप्रकाशिका)** Ms. No. P. 2881/1

Beginning :

मोहेति (२-१-६) पुमर्थस्तद्धेतुश्च कुतोक्ताबि(?)त्याशङ्कयाह– आत्मेति (२-१-७)। तथा बिद्यासूत्रानुसारेणेति यावत्। तस्य सूत्रितात्मज्ञानस्येत्यर्थः। आक्षेपपूर्वकं प्रयोजनं तदाहुरित्यादावुक्तमित्याह– प्रागिति ॥

End :

निश्शेषेति ॥ पदद्वयस्यार्थमाह– ज्ञातमिति। कार्यकारणात्मकं त्रिविधं जगच्छब्देनाब तस्य वस्त्वेवंरूपं एतच्छब्देनोक्त्वा सामा × × धिकाराभा × × × × ×॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां सुरेश्वरवार्तिकटीकायां शास्त्रप्रकाशिकायां चतुर्थोऽध्यायः ॥

359

Sl. No. 1726 **बृहदारण्यकोपनिषद्वार्तिकसंबन्धोक्तिः** Ms. No. A. 747

Beginning :

त्रियदादिपृथिव्यन्तं जगद्यस्मात्समुद्गतम्।
तस्मै नमोऽस्तु रामाय चित्तवृत्तिमाक्षिणे ॥
\+ \+ \+ \+ \+ \+ \+
आरण्यवृत्तिश्लोकानां संम्बन्धोक्तिमविस्तराम्।
करोमि श्रद्धया शक्त्या न तु स्वल्पज्ञहेतुतः ॥
\+ \+। \+ \+॥ \+ \+। \+ \+ ॥

नमस्कारव्याजेन श्रोतृणां सुखप्रबोधार्थं संक्षेपतो वृत्त्यर्थं दर्शयत्यनेन श्लोकेन ॥

End.

अथासाधारणज्ञानपरिछेद्यत्वमिष्यते इति। एतदपि सर्वपदार्थानां साधारणमित्याह। तच्च सर्वपदार्थानां नियोगं कर्तव्यतया बोधयति; सिद्धमानमन्यथेति चेन्नैतत्सारमित्याह– प्रमाणायत्त-मेतावत्स्वप्रमेयावभासनम् ॥

Colophon :

— — — —

360

Sl. No. 1727 **बृहदारण्यकोपनिषद्वार्तिकसम्बन्धोक्तिः** Ms. No. A. 776

Beginning :

कार्यताकार्यता वा तु मेयायत्ता न मानतः इति । अयमर्थः— वेदशास्त्रमिदमिष्टसाधन-मिति बोधयति— नेदं कर्तव्यमिदमकर्तव्यमिति । तौ तु प्रत्ययौ मानसौ ॥

End :

इदं धीनामगम्यं (?) यत् चित्रं स प्रथते हि ऋक् ।
मन्वादिसृष्टेस्तत्पूर्वमात्मैवाभूदिदं जगत् ॥

इति । अत्रापि मन्वादिसृष्टेरित्याकाशादिसृष्टेरित्यर्थः । पुरुषविधवाक्यस्यार्थकथनायाह— एतावद्वा स्तवं वृत्तमिति । पुरुषविधवाक्यस्यार्थं संक्षेपतो दर्शयति— मोहोत्थं भण्यतेऽधुनेति । एतत्प्रपञ्चयति— कोशपञ्चकताम् ॥

Colophon :

— — — — —

361

Sl. No. 1728 **बृहदारण्यकोपनिषद्भाष्यम्** Ms. No. B. 469/2

Beginning :

जनको ह वैदेह आसांचक्रे— आसनं कृतवान् । दर्शनकामेभ्य इत्यर्थः ॥ अथ ह तस्मिन्नवसरे याज्ञवल्क्य आवव्राज— आगतवान् । आत्मनो योगक्षेमार्थं राज्ञो वा विविदिषां दृष्ट्वा अनुग्रहार्थं आगतं तं याज्ञवल्क्यं राजा यथावत्पूजां कृत्वोवाच ॥

End :

यथा चायमर्थश्चतुर्थपञ्चमषष्ठाध्यायैस्सप्रतियोगिकब्रह्मप्राधान्येन प्रदर्शितः । एवं विद्वान् न कुतश्चन बिभेतीति सिद्धम् ॥ २७ ॥ मैत्रेयीब्राह्मणवंशब्राह्मणयोश्चतुर्थे व्याख्यातत्वादलमति प्रपञ्चेन ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ बृहदारण्यकोपनिषद्भाष्ये षष्ठोऽध्यायः समाप्तः ॥

362

Sl. No. 1738 **बृहदारण्यकोपनिषद्भाष्यटीका** Ms. No. P. 180

Beginning :

लक्ष्मीपतिं सुखमुखैलै (?) र्गुणौघैः
पूर्णव्यपेतनिखिलाद्यमचिन्त्यशक्तिम् ।
प्राणादिसर्वजगतो जनिपूर्वहेतुं
मोक्षैकहेतुमनिशं प्रणमामि विष्णुम् ॥

\+ \+ \+

यत्काण्वोपनिषद्भाष्यं पूर्णप्रज्ञविनिर्मितम् ।
तत्कृपालवमाश्रित्य व्याख्यास्ये तद्यथामति ॥

इहामुत्र फलभोगविरक्तस्य + + + मुमुक्षोः + + + परमानन्दावाप्तेश्च साधनत्वेन प्रवृत्तां काण्वीमुपनिषदं + + व्याचिख्यासुः भगवानानन्दतीर्थमुनिः + + प्रारिप्सितस्यानन्तरायपरिसमाप्तेः + + + मङ्गलमादौ निबध्नाति– प्राणादेरिति ॥

End :

इन्द्र इति । पर्जन्यशब्दस्य शक्रवाचकत्वेऽप्यभिधानमाह– पर्जन्य इति । क्षत्र एव तद्यशो दधातीति वाक्यं प्रागव्याख्यातत्वाद्व्याचष्टे– यशोनिधिरिति । तद्यशः स्वस्यैव तदभावे कथं तद्दानं स्यादित्यतो यशोनिधिरित्युक्तम् । ननु स्वांश–

Colophon :

— — — — — —

363

Sl. No. 1739 **बृहदारण्यकोपनिषद्भाष्यटीका (भावबोधः)** Ms. No. P. 181

Beginning :

योनिमृच्छतीत्यस्य पितृहेति व्याख्यानं कथम् । स्वां योनिं स्वपितरं ऋच्छति गच्छतीत्यर्थप्रतीतेरित्यत आह– गच्छतीति । तत्र धातुं पठति ऋ × × ति धातोः धातुव्याख्यानात् । वसवो रुद्रा आदित्या विश्वे देवा मरुत इति वा यथाश्रुतार्थप्रतीतिनिरासाय व्याचष्टे– विवस्वदिति ॥

End :

परमात्मस्तवनमननाभ्यामेव ग्रन्थः समापनीयो न तु स्वस्तुत्यैवेति भावेन पुनर्भगवन्तं प्रणमति– पूर्णेति । वेधसे सर्वज्ञायेत्यशेषमतिमङ्गलम् ॥

श्रीमदानन्दतीर्थार्यहृत्सरोजाख्यमन्दिरः ।
इन्दिराराध्यपादाब्जः प्रीयतां पुरुषोत्तमः ॥
प्रौढिप्रकाशनार्थं वा न मात्सर्यादिदोषतः ।
कृतेयं भाष्यविवृत्तिः किन्तु मन्दोपकारिणी ॥
बृहदारण्यकभाष्यस्य विवृतिर्या मया कृता ।
तज्जन्यं पुण्यमखिलमवाप्नोतु गुरुर्मम ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचित श्रीमद्बृहदारण्यक[भाष्य]टीकायां [श्रीमद्] रघुवर्यतीर्थपूज्यपादशिष्य रघूत्तमयतिकृतायां परब्रह्मप्रकाशिकायां अष्टमोऽध्यायः ॥

364

Sl. No. 1750 बृहद्रथन्तरोपनिषत् Ms. No. P. 8570

Beginning :

ऊँ बृहद्रथन्तरो वै नाम राजा वै राज्ये पुत्रं निधापयित्वेदमशाश्वतं मन्यमानश्शरीरं वैराग्यमुपेतोऽरण्यान् निर्जगाम ॥

End :

तथा चोभूत उद्भूतत्वाद्भूतं भूतेषु चरति प्रतिष्ठः स भूतानामधिपतिर्बभूवेत्यसावात्मा ऽन्तर्बहिश्चान्तर्बहिश्च ॥

Colophon :

इति चतुर्थपटलः । बृहद्रथन्तरोपनिषत्समाप्ता ॥

365

Sl. No. 1751 **ब्रह्मबिन्दूपनिषत्** **Ms. No. P. 8233**

Beginning :

ॐ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम् ॥

End :

सर्वभूताधिवासं च यद्भूतेषु वसत्यपि । सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवस्सर्वतस्तदस्म्यहं वासुदेवस्सर्वत इति ॥

Colophon :

ब्रह्मबिन्दूपनिषत्समाप्ता ॥

366

Sl. No. 1769 ब्रह्मोपनिषद्भाष्यम् Ms. No. A. 166/2

Beginning :

ब्रह्माख्यं परमं सूत्रं प्रोच्यते यत्र पावनम् ।
एतां ब्रह्मोपनिषदं व्याख्यास्येऽन्वर्थसंज्ञकाम् ॥

अथेति मङ्गळार्थश्शब्दः । पुरुषस्य शिरःपाण्यादिमतश्शरीरस्येत्यर्थः ॥

End :

यथा सामान्यात्मविद्या जीवात्मानं परमात्मानं नयतीति तथा विशेषात्मविद्या परमात्मानं परब्रह्म नयतीति सर्वमनवद्यम् । तत् ब्रह्मोपनिषत् परमित्यभ्यासः उपनिषत्परिसमाप्तिद्योतनार्थः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ ब्रह्मोपनिषद्भाष्यं समाप्तम् ॥

367

Sl. No. 1771 भक्तियोगोपनिषत् Ms. No. P. 7635/10

Beginning :

अथ परमशिवलिङ्गाङ्गसामरस्यभक्तियोगं व्याख्यास्यामः— विविदिषे स्वस्वरूपस्य । न मनोबुद्ध्यहङ्कारचित्तानि ; न श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि ; न वा वाक्पाणिपादपायूपस्थानि तत्कृतान्यभिमन्यते ॥

End:

न योगयुक्तः न चावधूतः परं भावं नयति । शिवभक्तस्य लोके तदेतल्लिङ्गसामरस्य-विविदिषुरिदमधीयात्परं भावमुपैतीति वेदवचनं भवतीति भवति । ओं सत्यमित्युपनिषत् ॥

Colophon :

इति भक्तियोगोपनिषत्समाप्ता ॥

368

Sl. No. 1775 भस्मजाबालोपनिषत् Ms. No. B. 247/47

Beginning :

भद्रं कर्णेभिरिति शान्तिः । ओं अथ जाबालो भुसुण्डः कैलासशिखरावासमोङ्कार-स्वरूपिणं महादेवमुमार्धकृतशेखरं + + + भगवन्तं शिवं प्रणम्य + + पप्रच्छ—ब्रवीहि भगवन् + + त्रिपुण्ड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः ॥

End :

बाह्वोष्षोडशषोडशश्चादशवन्धयोष्षट् । षडङ्गुष्ठयोस्ततस्सन्ध्यां स × × रहरहरुपासीत । अग्निर्हो × × रित्यादिभिरग्नौ । शिवलिङ्गं त्रिसन्ध्यमभ्यर्च्य कुशेष्वासीनो—

Colophon :

इति भस्मजाबालोपनिषदि प्रथमोऽध्यायः ॥ (इति ३१ तमे पत्रे)

369

Sl. No. 1777 भस्मजाबालोपनिषत् Ms. No. B. 913/4

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः । अथ जाबालो भुसुण्डः कैलासशिखरावासं ओङ्कार-स्वरूपिणं महादेवमुमादेहार्धशेखरं + + + + शिवं प्रणम्य + + पप्रच्छ—ब्रवीहि भगवन् वेदसारमुद्धृत्य त्रिपुण्ड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः ॥

End :

इत्येकैकं महान् प्रस्थशतं महान् प्रस्थशतमानैः शतैरभिपूज्य मुक्तो भवति संसारबन्धनात् । शिवलिङ्गरूपिणमार्द्रायां पौर्णमास्याममावास्यां वा महाव्यतीपाते ग्रहणे सङ्क्रान्तावभिषिच्य तिलैः ॥

Colophon:

— — —

370

Sl. No. 1780 भस्मजाबालोपनिषत् **Ms. No. C. 3682/58**

Beginning :

ओम् भद्रं कर्णेभिरिति शान्तिः । अथ जावालो भुसुण्डः कैलासशिखरावासमोङ्कार-स्वरूपिणं महादेवमुमार्धकृतशेखरं सोमसूर्याग्निनयनं अमृतेन्दुरविप्रभं व्याघ्रचर्माम्बरधरं + + + + + शिवं प्रणम्य + + + पप्रच्छ— अधीहि भगवन् वेदसारमुद्धृत्य त्रिपुण्ड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः ॥

End :

चातुर्ग्रहे रेतो मूत्रं वा विसृजन्ति तदा तेऽनुसिञ्चन्ते पीतानलमेव पापकारणं मूतं पश्य-न्नीललोहितं भैरवस्तं पातयंस्त्रिमण्डले ज्वलज्ज्वलन्नग्निकुण्डेष्वन्येष्वपि तत्रश्चाल(?)प्रमोदेन निवसेत्काश्यां लिङ्गरूपिण्यामित्युपनिषत् ॥

Colophon :

इति भस्मजाबालोपनिषत्समाप्ता ॥

371

Sl. No. 1782 भस्मजाबालोपनिषद्भाष्यम् Ms. No. B. 472/2

Beginning :

यस्यां सम्प्रोच्यते मुक्त्यै भस्मधारणवैभवम् ।
सेयन्तु भस्मजाबालश्रुतिर्व्याख्यास्यतेऽधुना ॥

नन्विह शिवनामान्यनिशमुच्चरन्तमित्युक्तम् । कथमेतदुपपद्यते ? शिवस्य स्वनामोच्चारणे किं प्रयोजनम् ? + + + + अत्रोच्यते— शिवनामानि हि सर्वाणि निर्विशेष-परब्रह्मण एव स्वतस्सिद्धानि ; नैवमन्येषां + + देवादीनां निरन्तरोच्चारणभावात् तन्नामान्यभवन् ॥

End :

कुतस्तर्हि ब्रह्मज्ञानमात्रप्रतिपादिकासूपनिषत्स्वेवं भस्मधारणादिस्थूलबाह्यकर्मप्रसक्तिरिति चेन्नायं दोषः ; ज्ञानाङ्गानां चोपनिषत्सु प्रतिपादनावश्यकत्वात् ॥

अस्य द्वितीयाध्यायस्य बृहज्जाबालोपनिषदि प्रकृतत्वेन व्याख्यातपूर्वत्वादिहाव्याख्याततत्व-मगन्तव्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतिषु भस्मजाबालोपनिषद्भाष्ये प्रथमोऽध्यायः । इति भस्मजाबालोपनिषद्भाष्यं समाप्तम् ॥

372

Sl. No. 1784 भावनोपनिषत् Ms.No. P. 2350/12

Beginning :

श्रीगुरुः सर्वकारणभूता शक्तिः । तेन नवरन्ध्ररूपो देहः । नवचक्ररूपं श्रीचक्रम् । वाराही पितृरूपा कुरुकुल्ला बलिदेवता । पुरुषार्थाः सागराः । देहो नवरत्नदीपः । आधारनवमुद्राश्शक्तयः ॥

End :

एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरः जीवन्मुक्तः भवति । स एव शिवयोगीति गद्यते । कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः । य एवं वेद सोऽथर्वशिरोऽधीते ॥

Colophon :

इति भावनोपनिषत् ॥

373

Sl. No. 1799 भावनोपनिषद्भाष्यम् Ms. No. A. 116/2

Beginning :

श्रीनाथाङ्घ्रिपरागैकपरागादपरागधीः ।
भावनोपनिषद्भाष्यं भाषते भास्करस्सुधीः ॥

इह खलु त्रिपुरसुन्दर्याः स्थूलसूक्ष्मपररूपभेदेन त्रिविधाया उपास्तिरूपायाः क्रियाऽपि त्रिविधा कायिकी वाचिकी मानसी चेति । + + अथर्वनामाऽऽदिवेदपुरुषो योगिजनानुजिघृक्षया प्रकाशयन्नादौ सद्गुरोः परं रूपं विधत्ते— श्रीगुरुस्सर्वकारणभूता शक्तिरित्यादिवाक्यद्वयेन ॥

End :

अस्या उपनिषदः ईदृशभावनाप्रतिपादकत्वमिति + + यो वेद स एवाथर्वणशिरोऽध्ययनवान् । अध्ययनकरणकभावनया अर्थाविधि(?)मन्यकत्वादिति भावः । योऽर्थज्ञवित्सकलं

भद्रमश्नुते इति श्रुत्यन्तरे । सकलपदस्वारस्यात्तु शब्दमात्रपाठादपि किं भद्रमस्त्येवेतीति लभति (?) इति शिवम् ॥

इति भावनोपनिषदोऽथर्वणशिरसोऽतनोद्भाष्यम् ।
भास्कररायो विदुषां तुष्ट्यै जीवन्मुमुक्षूणाम् ॥

Colophon :

इति भावनोपनिषद्भाष्यं सम्पूर्णमभवच्छुभम् ॥

374

Sl. No. 1804 — भावनोपनिषद्भाष्यम् — Ms. No. B. 247/44

Beginning :

श्रीचक्राराधनं स्थूलं निन्वते भावनान्तरात् ।
यस्यां व्याख्यास्यते सेयं भावनोपनिषन्मया ॥

अत्र खलु परमकारणभूता शक्तिः श्रीगुर्वनन्येति । नवशक्तिमयं श्रीचक्रं नवरन्ध्ररूप. देहानन्यदिति चैवमादिनिरूपणैरन्यथाभावनारूपं श्रीचक्रोपासनक्रममपि विज्ञायानया चोपनिषदा स्थूलं ब्राह्यं च श्रीचक्रोपासनमेवाभिहितमिति बिन्दुमात्रिकेणेत्यादिश्लोकानुरोधेन केचित् श्रीचक्रं विलिख्योपासते ॥

End :

न च चिन्तितसकार्यसिध्यभिधानात् सगुणोपासनमेवात्रोक्तं स्यादिति शङ्क्यम् ; निर्गुणोपासकानामपि मोक्षकार्यसिद्धेः । तस्मात्सर्वमनवद्यमवगन्तव्यम् ॥

Colophon :

इति भावनोपनिषद्भाष्यं समाप्तम् ॥

375

Sl. No. 1807 — भावार्थोपनिषत् — Ms. No. B. 634/4

Beginning :

श्रीदेव्युवाच—

देवदेव महादेव भक्तानुग्रहकारक ।
पिण्डब्रह्माण्डयोर्ज्ञानं चक्ररूपं वद प्रभो ॥ १ ॥

श्रीईश्वर उवाच -

शृणु देवि प्रवक्ष्यामि रहस्यं त्रिपुरेश्वरि ।
पिण्डाण्डरूपं श्रीचक्रं ब्रह्माण्डात्मकमीश्वरि ॥ २ ॥

End :

चतुरन्वयात्मरूपा वितता सा मातृकामयी विद्या ।
परमेश्वरि पञ्चकृत्यलीले परसंविन्मयपार्वति प्रसीद ॥
पतितं पशुपाशसङ्कटे मां शिशिरय शीतलैरपाङ्गैः ॥

Colophon :

इति भावार्थोपनिषत् समाप्ता ॥

376

Sl. No. 1808 **भिक्षुकोपनिषत्** Ms. No. P. 3621/5

Beginning :

अथ भिक्षुकमोक्षाधिकारिणां कुटीचकबहूदकहंसपरमहंसाश्चेति चत्वारः । तत्र कुटीचका गौतम-भरद्वाज-याज्ञवल्क्य-वसिष्ठ-प्रभृतयः अष्टौ ग्रासान् चरन्तो योगमार्गे मोक्षमेव प्रार्थयन्ते । अथ बहूदकानां दण्डं कमण्डलुं सशिखं यज्ञोपवीतं काषायवस्त्रधारिणो ब्रह्मर्षिगृहेषु मधुमांसं वर्जयित्वा अष्टौ ग्रासान् भैक्षाचरणं कृत्वा मोक्षमेव प्रार्थयन्ते ॥

End :

आत्मनिष्ठाः प्राणसन्धारणार्थं यथोक्तकाले विमुक्ते (?) भैक्षमाचरन्तः शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रशालानदीपुलिनगिरिगह्वरकन्दरनिर्झरस्थण्डिलेषु तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नाः शुद्धमानसाः परमहंसाचरणेन सन्यासेन देहत्यागं कुर्वन्ति । ते परमहंसा नामेति ॥

Colophon :

— — —

377

Sl. No. 1814 **भिक्षुकोपनिषद्भाष्यम्** Ms. No. B. 247/21

Beginning :

कुटीचकादिसन्यासाश्चत्वरो यत्र वर्णिताः ।
भिक्षुकोपनिषत्सेयं मुक्त्यै व्याख्यास्यतेऽधुना ॥

ननु तमेव धीरो विज्ञायेति + + + ज्ञानमार्ग एव मोक्षावगमात् सन्यस्य श्रवणं कुर्यादिति ज्ञानार्थकश्रवणहेतोरेव सन्यासविधानाच्च योगाभ्यासः प्रागेव सन्यासात्कार्य इत्याशङ्कायामाह– अथ भिक्षूणामिति ॥

End :

तस्मात् सर्ववर्णभिक्षावतामपि अतिवर्णाश्रमिणां त्यक्ताशेषलौकिकव्यापारत्वे सति न कश्चिदपि प्रत्यवाय इति मन्तव्यम् ॥

Colophon :

इति भिक्षुकोपनिषद्भाष्यं समाप्तम् ॥

378

Sl. No. 1826 मन्त्रोपनिषत् Ms. No. P. 1973/22

Beginning :

अष्टपादं शुचिं हंसं त्रिसूत्रमणिमव्ययम् ।
त्रिवर्त्मानं तेजसो हंसं सर्वतः पश्यन्न पश्यति ॥

भूतसंमोहने काले भिन्ने तमसि वै खरे ।
अतः पश्यन्ति सत्वस्था निर्गुणं गुणगह्वरे ॥

End :

जन्मान्तरसहस्रेषु यदा क्षीणानुकिल्बिषः ।
तदा पश्यति योगेन संसारोच्छेदनं महत् ॥

संसारोच्छेदनं महदिति ॥

Colophon :

इति मन्त्रोपनिषत्समाप्ता ॥

379

Sl. No. 1829 मन्त्रोपनिषत् Ms. No. P. 3621/13

Beginning :

हरिः ॐ ।

अष्टपादं शुचिं हंसं त्रिसूत्रं गणमव्ययम् ।
त्रिवर्त्मानं तेजसोऽहं सर्वतः पश्यन्न पश्यति ॥

भूतसंमोहने काले भिन्ने तमसि वै स्वरे ।
अतः पश्यन्ति सत्वस्था निर्गुणं गुणगह्वरे ॥

End :

पश्यन्ति व्यक्ततां भूयो जायते बुद्बुदा इव ।
क्षेत्रज्ञाधिष्ठितं चैव कारणैर्विद्यते पुनः ॥
ब्रह्म ब्रह्मेत्ययाथान्ति ये विदुर्ब्राह्मणास्तथा ।
अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः ॥
लीनाश्चाव्यक्तशालिन इति ॥

Colophon :

इति मन्त्रोपनिषत्समाप्ता ॥

380

Sl. No. 1832 मन्त्रोपनिषद्भाष्यम् Ms. No. B. 476/2

Beginning :

मन्त्रैराथर्वणैर्यस्यां ब्रह्मनिष्ठाऽभिधीयते ।
मन्त्रिकोपनिषत्सेयं सभाष्या क्रियतेऽधुना ॥

अष्टपादमिति । भूम्याद्यष्टप्रकृतय एव पादा यस्य तम् । जाग्रत्स्वप्नसुषुप्त्याख्यानि सूत्राणि यस्य तम् । + + अहमहङ्कारे तेजसस्सर्वतः प्रपञ्चात्मना पश्यन्नपि निष्प्रपञ्चात्मना न पश्यति ॥

End :

अन्ये जीवाः पुनःपुनरेतदुत्पत्तिप्रळयवज्जगत् पश्यन्ति । अथ सृष्टिकाले आयान्ति ये ब्रह्म सगुणं ब्रह्म निर्गुणमिति विदुस्ते ब्राह्मणा अत्रैव लयं यान्ति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ मन्त्रिकोपनिषद्भाष्यं समाप्तम् ॥

381

Sl. No. 1852 महानारायणीयोपनिषद्भाष्यम् Ms. No. C. 827

Beginning :

श्रीब्रह्मादिसमस्तविश्वजननस्थेमप्रमोदादिदं
श्रीनारायणमादिपूरुषमहं श्रीभूमिदुर्गाधिपम् ।

वन्देऽस्मद्गुरुराघवेन्द्रहृदयश्रीपूर्णबोधार्चित-
श्रीमद्रामहयास्य कृष्णनृहरिव्यासादिरूपं विभुम् ।।

+ + + + +

इह खलु ऐहिकामुष्मिकफलभोगविरागिणः + + + + परमानन्दावाप्तये प्रवृत्तायाः याज्ञिकीति प्रसिद्धिमस्याः नारायणोपनिषदः + + + मन्त्रान् व्याख्यास्यामः ।।

End :

तस्माद्ब्रह्मण इति द्विरुक्तिः– 'अध्यायान्ते द्विरुक्तिः स्याद्वेदे वा वैदिकेऽपि वा । विचारो यत्र सञ्जातः पूर्वोक्तास्यावधारणे । अनुक्तानां प्रमाणानां श्रीकारश्च कृतो भवेत् ।। विनिन्द्य चेतरान् मार्गान् सम्पूर्णफलता तथा' इति भाष्योदाहृतवचनात् सर्वमतिमङ्गलम् ।।

Colophon :

— — — —

382

Sl. No. 1853 महानारायणीयोपनिषद्भाष्यम् Ms. No. B. 247/13

Beginning :

यत्रोच्यते पादचतुष्टयं तत्स्ततोऽपि साकारनिराकृती च ।
व्याख्यास्यते सा महती त्विदानीं नारायणस्योपनिषद्रहस्या ।।

नन्विह त्वमेव सर्वज्ञ इत्यादिवाक्यैः ब्रह्म परतत्त्वरहस्यं सम्यग्ज्ञातमानित्येवावगम्यते ; कुतः ? अन्यथा बाह्यवाक्योत्पत्त्यसम्भवात् + + + अत्रोच्यते– नैष दोषः ; सद्गुरूपदेशं विना शास्त्रावलोकनजनितज्ञानिभिरप्येवं वक्तुं शक्यत्वात् ।।

End :

आदिनारायणस्योन्मेषनिमेषौ पूर्वेषामहोरात्रिवत्स्याताम् । + + + + न तु वाक्यार्थश्रवणादिमोक्षसाधनवतां मोक्षस्य । सर्वोमुक्त्यर्थकशास्त्राणां तेनैव प्रणीतत्वात् । तस्मात् सर्वमनवद्यम् ।।

Colophon :

इति चतुर्थोऽध्यायः ।।

383

Sl. No. 1856 **महावाक्योपनिषत्** Ms. No. P. 4136/22

Beginning :

भद्रं कर्णेभिरिति शान्तिः । अथ होवाच ब्रह्मा— अपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः । गुह्याद्गुह्यतरैषा न प्राकृतायोपदेष्टव्या । सात्त्विकाय अन्तर्मुखाय परिशुश्रूषते । अथ संसृतिबन्धमोक्षयोः विद्याविद्ये चक्षुषी उपसंहृत्य विज्ञाय । अविद्यालोकान्धस्तमोदृक् । तमो हि शारीरप्रपञ्चमाब्रह्मस्थावरान्तम् ॥

End:

सोऽहमर्कः परं ज्योतिरर्कज्योतिरहं शिवः ।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावहोम् ॥

एतदथर्वशिरो योऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । × × माध्यंदिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमाप्नोतीत्युपनिषत् ॥ भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

महावाक्योपनिषत्समाप्ता ॥

384

Sl. No. 1860 **महावाक्योपनिषद्भाष्यम्** Ms. No. A. 167/16

Beginning :

महावाक्येष्वनुक्तेषु प्रसिद्धेष्वपि यन्महत् ।
हंस इत्यादि वाक्यं च तद्रहस्यादभिधा तथा ॥
अनुसत्याजपा यत्र ब्रह्मध्यानादुदीर्यते ।
महावाक्योपनिषदं व्याख्यास्ये सरळोक्तिभिः ॥

अथ होवाच ब्रह्मा ब्रह्मात्मैक्यापरोक्षानुभवपरामुपनिषदं व्याख्यास्याम इति ॥

End :

स इति सोऽहं ब्रह्मस्वरूप एकः परंज्योतिः अर्कज्योतिषा व्याप्तं दिनं चाहमेव । असावहोवामित्योङ्कारस्वरूपत्वं चात्मन इति एतदथर्वशिरोऽधीत इत्यादि । स्पष्टार्थमन्यत् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ महवाक्योपनिषद्भाष्यं समाप्तम् ॥

385

Sl. No. 1863 **महोपनिषत्** Ms. No. 1468

Beginning :

अथातो महोपनिषदमेव तदाहुः । एको ह वै नारायण आसीत् ; न ब्रह्मा ; नेशानः ; नापो ; नाग्नीषोमौ ; नेमे द्यावापृथिवी ; न नक्षत्राणि ; न सूर्यो न चन्द्रमाः । स एकाकी न रमते । तस्य ध्यानान्तस्थस्य यज्ञस्तोममुच्यते ॥

End :

य इमां महोपनिषदं नित्यमधीते अश्रोत्रियः श्रोत्रियो भवति ; + + + + आचक्षुषः पङ्क्ति पुनाति ; आसप्तमान् पुरुषायुगान् पुनाति ; इत्याह भगवान् हिरण्यगर्भः । अमृतत्वं गच्छत्यमृतत्वं गच्छति इति । य एवं वेद ओम् ॥

Colophon :

— — — — —

386

Sl. No. 1879 **महोपनिषद्भाष्यम्** Ms. No. B.247/22

Beginning :

शुकस्य जनकस्याथ संवादोऽर्भुनिदाघयोः ।
यस्यां महोपनिषदि व्याख्यास्ये तामिमामिह ॥

आदौ निर्विशेषे परस्मिन् आकाशवत्सर्वगते ब्रह्मणि तदभिन्नाकृतिरेको नारायण आसीत् । तदा न ब्रह्मादयो देवा आसन् । अत एकाकित्वान्न रमते ॥

End :

इदानीं ऋभुर्निदाघायोक्तपूर्वाशेषार्थसारसङ्ग्रहोक्तिद्वारा उपनिषदमुपसंहर्तुमाह– संशान्तेति । + + + अशेषा विकल्पा यस्मात्तत्पदं निर्विकल्पसमाधिस्थानं गत्वा हे मुनीश्वर निदाघ स्वस्थः स्वस्वरूपनिष्ठो भव ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ महोपनिषद्भाष्यं समाप्तम् ॥

387

Sl. No. 1882 माण्डूक्योपनिषत् Ms. No. P. 1958/7

Beginning :

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥ २ ॥

End :

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति ; य एवं वेद ॥ ११ ॥

अमात्रः चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद ; य एवं वेद ॥ १२ ॥

Colophon :

इति माण्डूक्योपनिषत् ॥

388

Sl. No. 1909 माण्डूक्योपनिषद्भाष्यम् Ms. No. B 246/4

Beginning :

तुर्यातीतस्वरूपं तं नत्वा श्रीसुन्दरेश्वरम् ।
माण्डूक्योपनिषद्भाष्यं रचयाम्यहमादरात् ॥

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमिति ॥

अस्या माण्डूक्योपनिषदः—

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥

इति श्रुत्युक्तेशादिदशोपनिषदां मध्ये सारभूतत्वात् पृथगेवाधिकारिसम्बन्धविषयप्रयोजनाख्यमनुबन्धचतुष्टयमादौ निरूपणीयम् ।

End:

एवं चतुर्थस्य परमार्थदशापेक्षया चतुर्थत्वं सत्यमेवेत्यत उपचर्यत इत्ययुक्तम्— अव्यवहार्यत्वादिति तु वेदान्तेतरैरित्यवादिष्म । आकाशवत्सर्वगतस्य च निष्प्रतियोगिकत्वमनुपपन्नम्; असर्वगतजीवप्रतियोगिकत्वात् । तस्मात्सप्रतियोगिकसन्मात्र-अर्धमात्रातुर्यस्वरूपः शिव एव मात्रशब्द इति व्याख्यानं समञ्जसमिति स्थितम् ॥

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

389

Sl. No. 1915 माण्डूक्योपनिषद्भाष्यटीका Ms. No. P. 3362/19

Beginning:

नेत्राग्रादिस्थितोऽवस्थाः जाग्रदाद्याः प्रवर्तयन् ।
विश्वादिरूपी भगवान् यस्तं वन्दे श्रियः पतिम् ॥

ओं इहामुत्र भोगविरक्तस्य शमदमादिमतः मुमुक्षोरधिकारिणः अनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादिकां माण्डूक्योपनिषदं यथावद्व्याचिख्यासुः + आनन्दतीर्थमुनिः + + मङ्गलाचरणं कार्यमिति सूचयन् तद्गुणवन्तमुपश्लोकयति— पूर्णेति ॥

End:

एकोऽपीति । एकोपि— निर्विशेषोऽपि, इन्द्रार्चनादिवत् विशेषरहितोऽपि विश्वादिरूपेण चतुर्धा सन् जाग्रदादिचतुर्धाऽव्यवहारभाक् इत्यशेषमतिमङ्गलम् ॥

यः सर्वज्ञ + + + + । + + + + बलभम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य माण्डूक्योपनिषद्भाष्यस्य टीका श्रीमज्जयातीर्थपूज्यपादशिष्यव्यासतीर्थविरचिता समाप्ता ॥

390

Sl. No. 1917 माण्डूक्योपनिषद्भाष्यटीका Ms. No B. 518

Beginning:

अनादिबन्धविध्वंसं लब्ध्वा यद्ज्ञानतः पुमान् ।
मोदते निजरूपेण तं वन्दे विष्णुमादरात् ॥ १ ॥

नेत्राग्रादिस्थितो + + । + + श्रियःपतिम् ॥ २ ॥

इहामुत्र भोगविरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादिकां माण्डूक्योपनिषदं यथावद्व्याचिख्यासुः भगवानानन्दतीर्थमुनिः + + + मङ्गलाचरणमादौ कार्यमिति सूचयन् तदुक्तगुणवन्तमुपश्लोकयन् प्रणमति– पूर्णेति ॥

End :

अभेदोऽपि इन्द्रार्चनादिवत् + + + चतुर्थाव्यवहारभागित्यशेपमतिमङ्गलम् ॥

यः सर्वजीवे नेत्रादौ स्थित्वाऽवस्थाः प्रवर्तयन् ।
मोक्षदश्च रमानाथः तं वन्दे मध्वबल्लभम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमाण्डूक्योपनिषद्भाष्यटीका जयतीर्थपूज्यपादचरणशिष्यव्यासतीर्थविरचिता समाप्ता ॥

Extra Information :

नमस्ते नमस्ते + + + + तुभ्यं नमः ॥ इत्यादयः कतिचन नृसिंहस्तुतिरूपाः श्लोकाः ग्रन्थान्ते वर्तन्ते ॥

391

Sl. No. 1920 माण्डूक्योपनिषद्भाष्यटीका (पदार्थविवृतिः) Ms. No. C. 2180

Beginning :

× × व × श × × प्र × × × × × × × × × × × × × × समाप्यास्तु × × × × शिष्टाचारपर × × × × निष × × × षगुण × × व × × ति × × × गम × × × × नि ाति ॥

End :

विष्णुं वन्दे अभिवादयामि स्तौमि चेत्यर्थ इत्यवोचम × × मङ्गलम् ॥

माण्डूक्योपनिषद्भाष्यं विवृ × × × ग्रहात् ।
तेनेष्ट × × स्तु × × पूज्यो भगवान् बाद × × : ॥

यैरहच्छक × × × शि × × पालुभिः ।
तान् वन्दे यादवाचा × × × बकान् ॥

Colophon :

इति श्रीम × × त्याचार्य × × पादाराधकेन श्रीनिवासेन विरचितायां माण्डूक्योपनिषद्भाष्यविवृत्तिः (?) पदार्थदीपिका समाप्ता ॥

392

Sl. No. 1926 | माण्डूक्योपनिषत्खण्डार्थप्रकाशिका | Ms. No. C. 1559/2

Beginning :

नत्वा श्रीशं च तद्रूपं व्यासतीर्थोक्तमार्गतः ।
मण्डूकोपनिषत्खण्डसत्कार्थः प्रकाश्यते ॥

इह हि सांसारिकदुःखदर्शनेन विरक्तस्य + + दुःखनिवृत्तये + + माण्डूक्योपनिषत्प्रवृत्ता । तत्र + + वरुणः नारायणं + + स्तौति + ओमिति ॥

End :

अमात्र इति । + + + भगवान् येन विदितः स एव मुनिः ज्ञानी । इतरो जनो न ज्ञानी । अव्यवहार्यत्वादिकं ज्ञानिनोऽपि संमतिं दर्शयितुं तत्त्वमुक्तम् । सर्वार्थावधारणार्थां ग्रन्थान्ते द्विरुक्तिः ।

विद्याधीशजयानन्दतीर्थहृत्कमलाश्रयः ।
प्रीयतां नृहरिः श्रीशः श्रुत्यर्थकथनान्मम ॥

Colophon :

इति विद्याधीशार्यशिष्यनृसिंहभिक्षुविरचिता माण्डूक्योपनिषत्खण्डार्थप्रकाशिका समाप्ता ॥

393

Sl. No. 1929 | मुक्तिकोपनिषत् | Ms. No. P. 3581/39

Beginning :

पूर्णमद इति शान्तिः ॥

अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ।
सीताभरतसौमित्रिशत्रुघ्नाद्यैस्समन्वितम् ॥
+ + + + +

भक्त्या शुश्रूषया रामं स्तुवन् पप्रच्छ मारुतिः । +
त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतो राम मुक्तये ॥ +
साधु पृष्टं महाबाहो वदामि शृणु तत्त्वतः ॥

तदेतदृचाप्युक्तम्– तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः बिष्णोर्यत्परमं पदम् । ओमित्युपनिषत् ॥

End :

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥

Colophon :

मुक्तिकोपनिषत्समाप्ता ॥

394

Sl. No. 1934 मुक्तिकोपनिषत् Ms. No. C. 3682/78

Beginning :

ईशाद्यष्टोत्तरशतं वेदान्तपटलाशयम् ।
मुक्तिकोपनिषद्वेद्यं रामचन्द्रपदं भजे ॥

ओं पूर्णमद इति शान्तिः ।

अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ।
सीताभरतसौमित्रिशत्रुघ्नाद्यैस्समन्वितम् ॥

+ + + +

भक्त्या शुश्रूषया रामं स्तुवन् पप्रच्छ मारुतः । +
त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतो राम मुक्तये ॥ +
साधु पृष्टं महाबाहो वदामि शृणु तत्त्वतः ॥

End :

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥

तदेतदृचाप्युक्तं- तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदं सत्यमित्युपनिषत् ॥

Colophon :

इति मुक्तिकोपनिषत्समाप्ता ॥

395

Sl. No. 1936 मुक्तिकोपनिषद्भाष्यम् (मुक्तिचन्द्रिका) Ms. No. B. 244/4

Beginning :

श्रीमत्सुन्दरसद्गुरुं प्रथमतो तत्त्वात्मबोधप्रदं
शान्तिं सप्रणवाञ्च पूर्णमद इत्येतां पठित्वा ततः ।
व्याख्यास्ये खलु मुक्तिकोपनिषदं वेदान्तसारात्मिकां
तेनात्मा परमः प्रसीदतु विभुस्सन्नित्यमुक्तस्सदा ॥ १ ॥
यस्मादष्टोत्तरशततमा मुक्तिकाख्येयमासीत्
तस्माच्चूडामणिमुपनिषद्योपिदस्सन्त आहुः ।
यद्द्रष्टॄणां भवति सुलभा जीवतो देहहेतो-
र्वा(?)मुक्तिश्रुत्या न हि न हि समा कापि वेदान्तवाणी ॥
कथंभूतं रामचन्द्रमित्यत आह— अयोध्यानगर इत्यादिना ॥

End:

अस्या ऋचोऽर्थोऽन्यत्र वर्णित एवेत्यत इह न प्रपञ्च्यते । + +
इमां गुरुमुखाच्छ्रुत्वा लोकेऽस्मिन्मुक्तिचन्द्रिकाम् ।
को न मुच्येत संसारात् बहुदुःखकरादपि ॥
दुर्लभो मानुषो देहस्तत्रापि श्रुतिदर्शनम् ।
तत्राप्यष्टोत्तरशतं तत्रेयं मुक्तिचन्द्रिका ॥

Colophon:

इति श्रीमत्सद्गुरुसुन्दरेश्वरतानपादशिष्याप्पयदीक्षिताचार्यकृतौ अष्टोत्तरशतोपनिषद्भाष्ये मुक्तिचन्द्रिका समाप्ता ॥

396

Sl. No. 1938 **मुक्तियोगोपनिषत्** Ms. No. P. 8237

Beginning :

ओंम् अथ परमलिङ्गाङ्गसामारस्यमुक्तियोगोपासनाविधिं व्याख्यास्यामः— विविदिषे स्वस्वरूपस्य न मनोबुद्ध्यहङ्कारा चित्तानि ॥

End :

तदेतल्लिङ्गाङ्गसामरस्यविविदिषुरिदमधीत्य परमं भावमुपैतीति वेदवचनं भवति भवति ॥

Colophon :

मुक्तियोगोपनिषत् समाप्ता ॥

397

Sl. No. 1970 **मुण्डकोपनिषद्भाष्यम्** Ms No. B. 246/2

Beginning :

नत्वा श्रीसुन्दराचार्यं प्रसन्नमुखपङ्कजम् ।
मुण्डकोपनिषद्भाष्यं सङ्ग्रहाद्रचयाम्यहम् ॥

भद्रं कर्णेभिरित्यादि शान्तिः । ब्रह्मा— हिरण्यगर्भः, देवादीनां— इन्द्रादीनां, प्रथमः— पूर्विकः, गुणैः प्रधानो वा, सम्बभूव ॥

End :

नैतत् ग्रन्थरूपं शब्दब्रह्म अचीर्णव्रतोऽधीते × × × × × नमः परमर्षिभ्यः ब्रह्मादिभ्य इति × × × × विद्यापारम्पर्यक्रम × × भवतीत्य × × × × × × × × ×॥

Colophon :

इति श्रीसुन्दरेश्वरतातपाद × × × प्पयदीक्षिताचार्यकृतौ मुण्डकोपनिषद्भाष्यं समाप्तम् ॥

398

Sl. No. 1978 | मुण्डकोपनिषद्भाष्यटिप्पणी | Ms. No. C. 1003

Beginning :

श्रीपाण्डुरङ्गं सर्वान्तरङ्गं सर्वाङ्गमङ्गलम् ।
इन्दिरामन्दिरं वन्दे वरेन्दीवरसुन्दरम् ॥
\+ \+ \+
गुरुश्रीतिर्मलाचार्यसूनुना कृष्णशर्मणा ।
आथर्वणोपनिषदः श्रीमद्भाष्यमनूच्यते ॥

इह खलु + + अधिकारिजनं + + उद्दिधीर्षुः इयमाथर्वणीमन्त्रोपनिषदिति-कर्तव्यतामन्त्रेण तत्त्वज्ञानकारणतामापद्यते— अतस्तदिति ॥

End :

मम सदा प्रेष्ठ इति । अतिशयेन प्रियः प्रेष्ठः अतिशयेन प्रेष्ठः ; प्रेष्ठतमः ; प्रेष्ठात्प्रेष्ठतमः— प्रेष्ठप्रेष्ठतमः ॥ निरतिशयप्रिय इत्यर्थः ; इत्यशेषमतिमङ्गलम् ॥

तातश्रीतिर्मलाचार्यगुरुप्रोक्तो मयाऽऽशयः ।
आथर्वणोपनिषदः तद्भाष्यस्यापि दर्शितः ॥

Colophon :

इति श्रीतिर्मलाचार्यसूरिसूनुकृष्णाचार्यविरचितं श्रीमदाथर्वणोपनिषद्भाष्यविवरणं समाप्तम् ॥

399

Sl. No. 1981 | मुण्डकोपनिषद्भाष्यटीका | Ms. No. C. 1558

Beginning :

आनन्दज्ञानशक्त्यादिसम्पूर्णगुणविग्रहम् ।
जन्मादिदोषरहितं प्रणमामि रमापतिम् ॥
नमोऽस्तु वासुदेवाय पूर्णप्रज्ञाय नित्यशः ।
शम्भुपूर्वाश्रमज्येष्ठगुरवेऽभीष्टदायिने ॥
सत्तत्त्वदीपिकाचार्यान् नत्वा नत्वा गुरूनपि ।
आथर्वणोपनिषद्भाष्यं व्याख्यास्यामो यथामति (?) ॥

श्रीमदानन्दतीर्थभगवान् एतद्भाष्यमारभमाणः आनन्दमजरमित्यादिश्लोकेन + + नारायणं नमस्कारोति ॥

End :

अथेदानीं ग्रन्थावसाने + + प्रीयतां नारायण इति प्रार्थयन् तं नमस्करोति–एवमिति ॥

यस्य त्रीण्युदितानि + + यथावबोधम् ।
नारायणार्यवरशिष्यइमां + + नमोनमः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्याथर्वणोपनिषद्भाष्यस्य टीका समाप्ता ॥

400

Sl. No. 1982 मुण्डकोपनिषद्भाष्यटीका (परब्रह्मप्रकाशिका) Ms. No. P. 7422

Beginning :

लक्ष्मीपतिं सुखसुखैरखिलैर्गुणौघैः
पूर्णं व्यपेतनिखिलाघमचिन्त्यशक्तिम् ।
प्राणादिसर्वजगतां जनिपूर्वहेतुं
मोक्षैकहेतुमनिशं प्रणमामि विष्णुम् ॥

+ + +

यत्काण्वोपनिषद्भाष्यं पूर्णप्रज्ञविनिर्मितम् ।
तत्कृपालबमाश्रित्य व्याख्यास्ये तद्यथामति ॥

End :

नव्यासीघूपैरपेक्ष्येन नूतनासु अवरासु तिसृषु इतिहासपुराणपञ्चरात्राख्यासु मातृषु निधावत (?) उपक्रमपर्यालोचनां विनैव शीघ्रमेवार्थं विचारयतीत्यर्थः ॥

+ + + +

प्रौढप्रकाशनार्थं वा न मात्सर्यादिशेषतः ।
कृतेयं भाष्यविवृत्तिः किन्तु मन्दोपकारिणी ॥

बृहदारण्यभाष्यस्य विवृतिर्या कृता मया ।
तज्जन्यं पुण्यमखिलं अवाप्नोतु गुरुर्मम ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्बृहदारण्यकोपनिषद्भाष्यस्य टीकायां श्रीमद्रघुवर्यतीर्थपूज्यपादशिष्यरघूत्तमयतिकृतायां परब्रह्मप्रकाशिकायां अष्टमोऽध्यायः ॥

401

Sl. No. 1986 **मुण्डकोपनिषत्खण्डार्थः (प्रकाशिका)** Ms. No. C- 1559/1

Beginning

श्रीमध्वतीर्थमानम्य व्यासतीर्थोक्तमार्गतः ।
आथर्वणमहामन्त्रसल्लग्नार्थः प्रकाश्यते ॥

इहामुत्रफलभोगविरक्तस्य शमदमादिमतः मुमुक्षोः + + अरिष्टनिवृत्तये + + आख्यायिकामाह– ब्रह्मेति ॥

End :

ऋषिरिति । एतदचीर्णव्रतः नाधीते– नाभ्यसेदिति पुरोवाच– वेदपुरुषः । उपनिषदं ऋषिप्रणामेन समापयति– नम इति । आदराद्द्विरुक्तिः ॥

विद्याधीशार्यशिष्येण नरसिंहेन भिक्षुणा ।
रचिता श्रीशसन्तुष्ट्यै श्रुत्यर्थानुप्रकाशिका ॥

Colophon :

इति श्रीविद्याधीशार्यशिष्यनरसिंहभिक्षुविरचिता आथर्वश्रुत्यर्थप्रकाशिका समाप्ता ॥

402

Sl. No. 1988 **मुद्गलोपनिषत्** Ms. No. P. 4136/1

Beginning :

यत्पुरुषेणेत्यनया सृष्टियज्ञस्समीरितः ।
सप्तास्यासन् परिधयस्समिधश्च समीरिताः ॥ ६ ॥
तं यज्ञमिति मन्त्रेण सृष्टियज्ञस्समीरितः ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः ॥

तस्मादिति च मन्त्रेण जगत्सृष्टिस्समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ॥ ७ ॥

End :

तस्मादेतत्पुरुषसूक्तार्थमतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षितायोपदिशेत् । + + । न बहुशो वदेत् ; यातयामो भवति । अषट्कर्णमुपदिशेत् । कुर्वाणोऽध्येताऽध्यापकश्च इह जन्मनि पुरुषो भवतीत्युपनिषत् । वाङ्मे मनसीति शान्तिः ॥

Colophon :

मुद्गलोपनिषत् समाप्ता ॥

403

Sl. No. 1993 — मुद्गलोपनिषद्भाष्यम् — **Ms. No. B. 247/18**

Beginning :

यस्यां पुरुषसूक्तार्थप्रपञ्चोत्पत्तिनिर्णयौ ।
स्तो मुद्गलोपनिषदं व्याख्यास्ये तामिमां शुभाम् ॥

ननु विष्णोः प्रथमया सहितया देशतो व्याप्तिर्द्वितीयस्य कालतो व्याप्तिरित्येतद्वाक्यद्वयमनुपपन्नम्— कुतः ? मोक्षप्रदत्वाभिधानात् । + + अत्रोच्यते— बाढमेवैतत् ॥

End :

नन्वस्या उपनिषद उपसंहारे विद्वान्न बहुशो वदेदित्युक्तम् । कथमेतत्समीचीनं स्यात् + + नैष दोषः— शिष्याय दक्षिणे कर्णे इत्याद्युक्त्या एकस्मै शिष्याय असकृदुपदेशमात्रस्य प्रतिषिद्धत्वात् ॥

Colophon :

इति मुद्गलोपनिषद्भाष्यं समाप्तम् ॥

404

Sl. No. 1996 — मैत्रायणीयोपनिषत् — **Ms. No. P. 1682/11**

Beginning :

ब्रह्मयज्ञो वा एष यत् पूर्वेषां × × यनं तस्माद्यजमानश्चित्वैतानग्नीनात्मानमभिध्यायेत् स पूर्णः खल्वा इत्था विकलस्संपद्यते ॥

End :

हरिणं जातवेदसं परायणं ज्योतिरेषं(?)तपन्तः सहस्ररश्मिश्शतावर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥

Colophon :

मैत्रायणीयोपनिषत्संपूर्णा ॥

405

Sl, No. 2003 मैत्रायणीयोपनिषत् **Mss. No. C- 2542/12**

Beginning :

भद्रं कर्णेभिरिति शान्तिः। बृहद्रथो नाम राजा वै राज्ये पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थाय + + तिष्ठत्यन्ते सहस्राग्रस्य मुनेरन्तिकमाजगाम + + भगवान् शाक्यायन्य + + उत्तिष्ठ + + वरं वृणीष्वेति राजानमब्रवीत् ॥ स + + उवाच– + + नाहमात्मवित्। ++ स त्वं नो ब्रूहि ॥

End :

स वा एष एकस्त्रिधा भूतोऽष्टधैकादशधा द्वादशधाऽपरिमिधा बोद्भूतत्त्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्माऽन्तर्बहिश्चान्तर्बहिश्चान्तर्बहिश्च ॥ ६ ॥ अन्तर्बहिश्चेति ॥

Colophon :

ॐतत्सदिति ऋग्वेदे मैत्रायणीयोपनिषदि चतुर्थः प्रपाठकः। उपनिषत्समाप्ता ॥

406

Sl. No. 2005 मैत्रायणीयोपनिषद्भाष्यम् **Mss. No. 166/28**

Beginning :

वैराग्यबोधौ प्रोच्येते यस्यां सम्यग्विमुक्तिदौ।
श्रुतिं मैत्रायणीसंज्ञां व्याख्यास्ये सरसामिमाम् ॥

ननु शरीरमशाश्वतं मन्यमानस्य कुत एवमादित्येक्षणपूर्वकतपोऽनुष्ठानम्। देहाभिमानवतो विरक्तस्य हि सगुणदेवताप्रसादार्थकतपश्चरणं स्यात्। अत्रोच्यते– नायं दोषः सुविरक्त × × × × तत्त्वोपदेष्ट्राचार्यलाभात् ॥

End :

तथा चात्र उपसंहारेऽवगम्यते। असावात्मा अन्तर्बहिश्चेति द्विरुक्तिः उपनिषत्समाप्तिद्योतनार्थां ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षितचार्यकृतौ मैत्रायणीयोपनिषद्भाष्यं समाप्तम् ॥

407

Sl. No. 2007 मैत्रेय्युपनिषत् Mss. No. A. 166/37

Beginning :

आप्यायन्त्विति शान्तिः। बृहद्रथो वै नाम राजा राज्ये ज्येष्ठं स्वपुत्रं निधापयित्वेदमशाश्वतंमन्वः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठत्यन्ते + + भगवान् शाक्यायन्य उत्तिष्ठ + + वरं वृणीष्वेति। + + स तस्मै उवाच-- + + स त्वं नो ब्रूहि ॥

End:

सत्यासत्यादिहीनोऽस्मि सन्मात्रात्नास्म्यहं सदा।
गन्तव्यदेशहीनोऽस्मि गमनादिविवर्जितः ॥
सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः।
एवं स्वानुभवो यस्य सोऽहमस्मि न संशयः ॥
यः शृणोति सकृद्वाऽपि ब्रह्मैव भवति स्वयम् ॥

इत्युपनिषत् ॥

Colophon :

मैत्रेय्युपनिषत्समाप्ता ॥

408

Sl. No. 2009 मैत्रेय्युपनिषद्भाष्यम् Ms. No. A. 166/38

Beginning :

यत्र वैराग्यसिध्यर्थं शरीरोत्पत्तिरुच्यते।
वैराग्यसाध्यस्सन्यासः तत्साध्यं चात्मवेदनं ॥

बाह्यार्चनस्य निन्दा च हृदयार्चनसंस्तुतिः ।
मुख्यं मैत्रेय्युपनिषद्भाष्यमारभ्यतेऽधुना ॥

बृहद्रथ इति नामतः राजा इदं शरीरमशाश्वतंमन्यः— अनित्यं मन्यमान इत्यर्थः ॥

End :

'यश्शृणोति सकृद्वापि ब्रह्मैव भवति स्वयम्—' इतीयं फलश्रुतिरर्थवादः । यद्वा भवतीत्यस्य क्रियापदस्य भविष्यदर्थोऽवगन्तव्यः ॥

Colophon :

तृतीयोऽध्यायः । इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पनदीक्षिताचार्यकृतौ मैत्रेय्युपनिषद्भाष्यं समाप्तम् ॥

409

Sl. No. 2011 यज्ञोपवीतोपनिषत् **Ms. No. P. 1480/4**

Beginning :

यज्ञोपवीती धृतचक्रधारी यो ब्रह्मविद्ब्रह्मविदां मनीषी । हिरण्यमादाय सुदर्शनं कृत्वा वह्निसंयुक्तं शङ्खचक्राभ्यां बाहू धारयेत् । तस्माद्धर्मेण जायते ब्राह्मणस्य शरीरम् । श्रीविष्णुं सर्वेश्वरं भजन्ति ॥

End :

आचार्यस्य संमुखं प्रपद्येत । तस्माद्वैकुण्ठं न च पुनरागमनम् । सालोक्य-सारूप्य-सामीप्य-सायुज्यं गच्छति ; सायुज्यं गच्छति । य एवं वेद । इत्युपनिषत् ॥

Colophon :

— — — —

410

Sl. No. 2022 योगकुण्डल्युपनिषत् **Ms. No. B. 247/46**

Beginning :

ॐ सह नाववत्विति शान्तिः ।

पद्मज उवाच—

अमावास्या च प्रतिपत्पूर्णमासी च शङ्कर ।
अस्याः का वर्ण्यते संज्ञा एतदाख्याहि तत्त्वतः ॥

स आह—

प्रतिपद्दिनतोऽकाले अवावास्या तथैव च ।
पौर्णिमास्यां स्थिरीकुर्यात् स च पन्था हि नान्यथा ॥

End.

अशब्दमस्पर्शमरूपमव्ययं
तथा रसं नित्यमगन्धवच्च ।
अनाद्यनन्तं महतः परं ध्रुवं
तदेव शिष्यत्यमलं निरामयम् ॥

इत्युपनिषत् ॥

Colophon :

इति योगकुण्डल्युपनिषदि तृतीयोऽध्यायः ॥

411

Sl. No. 2025 योगकुण्डल्युपनिषत् Ms. No. C. 2542/9

Beginning :

स ह नाववत्विति शान्तिः । हरिः ओम् ।
हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिंस्तद्द्वावपि विनश्यतः ॥ २ ॥
+ + + + +
एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरम् ।
सुस्निग्धमधुराहारः चतुर्थांशविवर्जितः ॥ ३ ॥

End: :

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
तदेव शिष्यत्यमलं निरामयम् ॥

इत्युपनिषत् । सह नाववत्विति शान्तिः ॥

Colophon :

योगकुण्डल्युपनिषत् समाप्ता ॥

412

Sl. No. 2028 योगकुण्डल्युपनिषद्भाष्यम् Ms No. B. 487/2

Beginning

अखण्डब्रह्मसंयोग आत्मनो यत्र कथ्यते ।
सैषा व्याख्यास्यते योगकुण्डल्युपनिषत्परा ॥

संज्ञा अर्थः । रूढतरेति यावत् । अकाले परब्रह्मणि दिनतः दिनस्योत्पद्यमानत्वात् हेतोः प्रतिपदिति वस्तुसंशयात्मिका दृष्टिः ॥

End :

नन्वस्या उपनिषदः + + + प्रथमद्वितीयौ कुतः न व्याख्यातौ ? अत्रोच्यते– तयोर्हि अध्याययोरुक्तार्थाः + + + अन्यासु उपनिषत्सु उक्ताः । केवलहठयोगविषया मन्दाधिकार्युपयुक्ता स्पष्टार्थाश्च । अतः पिष्टपेषणादिवच्च तद्व्याख्यायामुपरतास्स्मः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतिषु योगकुण्डल्युपनिषद्भाष्यं समाप्तम् ॥

413

Sl. No. 2030 योगचूडामण्युपनिषत् Ms. No. P. 3081/33

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।

योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं ब्रह्मवित्तमैः ॥

नित्यं शुद्धं बुद्धं निरञ्जनं निर्विकल्पं निरञ्जनं निराख्यातमनादिनिधनमेकं तुरीयं यद्भूतं भवद्भविष्यत्परिवर्तमानं सर्वदाऽनवच्छिन्नं परब्रह्म ॥

End :

हकारः परमेशस्स्यात् तत्पदश्चेति निश्चितम् ।
सकारो ध्यायते जन्तुः हकारो हि भवेद्ध्रुवम् ॥

इन्द्रियैर्बध्यते जीवो ह्यात्मा चैव न बध्यते ।
ममत्वेन भवेज्जीवो निर्मलत्वेन केवलः ॥

Colophon :

इति योगचूडामण्युपनिषत् समाप्ता ॥

414

Sl. No. 2034 **योगचूडामण्युपनिषत्** **Ms. No. C. 3282/16**

Beginning :

मूलाधारादिषट्चक्रसहस्रारोपरि स्थितम् ।
योगज्ञानमुख्यफलं रामचन्द्रपदं भजे ॥

ओं आप्यायन्त्विति शान्तिः ॥

योगिचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणी ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति हि ॥

End :

चरतां चक्षुरादीनां विषयेषु यथाक्रमम् ।
तत्प्रत्याहरणं तेषां प्रत्याहारस्स उच्यते ॥
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् ।
तृतीयांगस्थितो योगी विकारं मानसं हरेत् ॥

इत्युपनिषत् ॥

Colophon :

इति योगचूडामण्युपनिषत् समाप्ता ॥

415

Sl. No. 2035 **योगचूडामण्युपनिषद्भाष्यम्** **Ms. No. B. 247/7**

Beginning :

आसनादिषडङ्गानि प्रोच्यन्ते यत्र योगिनाम् ।
हिताय क्रियते व्याख्या योगचूडामणिश्रुतेः ॥

नन्वयं षडङ्गयोगश्च परिच्छिन्नप्रत्यगात्मज्योतिर्विषयक एवावगम्यते ; + + कुतः ? + + परिच्छिन्नत्वदर्शनात् ; इति चेन्नायं दोषः ॥

End :

तस्मात्प्रत्याहारोपरितनामपि धारणां सम्यक् तदनुष्ठानपूर्वकं परित्यज्य ध्यानमथ तद्वत्समाधिश्चाचरेदित्यवगन्तव्यम् ॥

Colophon :

इति योगचूडामण्युपनिषद्भाष्यं समाप्तम् ॥

416

Sl. No. 2038 योगतत्त्वोपनिषत् Ms. No. P. 1973/28

Beginning :

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णुर्नाम महायोगी महाभूतो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥

End :

एवं द्वारेषु सर्वेषु वायुपूरितरेचितः ।
निषिद्धेन तु निर्वाते निर्जने निरुपद्रवे ।
निश्चितं चात्मभूतानां अरिष्टं योगसेवयोः ॥
अरिष्टं योगसेवयोरिति ॥

Colophon :

इत्यथर्वणवेदे योगतत्त्वोपनिषत् समाप्ता ॥

417

Sl. No. 2048 योगतत्त्वोपनिषद्भाष्यम् Ms. No. B. 247/4

Beginning :

परस्परविरुद्धे ते प्रोच्येते सिद्धिमुक्त्यपि ।
योगतत्त्वोपनिषदं व्याख्यास्ये तामिमां शुभाम् ॥

अत्र योगशिखोपनिषत्प्रोक्ताः श्लोका बहवो भवन्ति । प्रायेण तस्या अस्याश्च भेदाभावेऽपि वज्रोल्यादयः केचन सिद्धिविशेषा जीवन्मुक्तस्य स्वच्छन्दमरणादिविशेषार्थाश्च अवगम्यन्ते । तस्मात् एतद्व्याख्याऽवश्यकार्येति निश्चितम् ॥

End :

यद्यात्ममात्रेणावशिष्टमित्यनुक्तं ; तदा हठयोग्येव प्रकृत इति वक्तुं युक्तम् । तथोक्तत्वात्तु ज्ञानयोगी जीवन्मुक्त एव प्रकृत इति स्थितम् ॥

Colophon :

इत्यप्पय्यदीक्षिताचार्यकृतिषु योगतत्त्वोपनिषद्भाष्यं समाप्तम् ॥

418

Sl. No. 2051 योगशिखोपनिषत् Ms. No C. 4136/7

Beginning :

सह नाववत्विति शान्तिः ॥

सर्वे जीवास्सुखैर्दुःखैर्मायाजालेन वेष्टिताः ।
तेषां मुक्तिः कथं .... कृपया वद शङ्कर ॥
सर्वसिद्धिकरं मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युजराव्याधिनाशनं सुखदं वद ॥ इति ।

हिरण्यगर्भः पप्रच्छ स होवाच महेश्वरः ।
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।
सिद्धिमार्गेण लभते नान्यथा पद्मसम्भव ॥

End :

घटमध्ये यथा दीपो बाह्ये नैव प्रकाशते ।
भिन्ने तस्मिन् घटे चैव दीपज्वाला च भासते ॥
स्वकायं घटमित्युक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्यसमाभिन्ने ब्रह्मज्ञानं प्रकाशते ॥

कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ।।

इत्युपनिषत् । सह नाववत्विति शान्तिः ।।

Colophon :

पष्ठोऽध्यायः । योगशिखोपनिषत्समाप्ता ।।

419

Sl. No. 2055 **योगशिखोपनिषत्** **Ms. No. C. 3682/34**

Beginning :

योगज्ञाने यत्पदातिसाधनत्वेन विश्रुते ।
तत्त्रैपदब्रह्मतत्त्वं स्वमात्रमवशिष्यते ।।

ओं सह नाववत्विति शान्तिः ।।

सर्वे जीवाः सुखैर्दुःखैः मायाजालेन वेष्टिताः ।
तेषां मुक्तिः कथं देव कृपया वद शङ्कर ।।

\+ \+ \+

हिरण्यगर्भः पप्रच्छ स होवाच महेश्वरः ।
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।।
सिद्धिमार्गेण लभते नान्यथा पद्मसम्भव ।

End :

स्वकार्यं घटसिन्धुक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्यसमाभिन्ने ब्रह्मज्ञानं प्रकाशते ।।
कर्णम्धारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ।।

इत्युपनिषत् ।।

Colophon :

पष्ठोऽध्यायः । इति योगशिखोपनिषत्समाप्ता ।।

420

Sl. No. 2056 **योगशिखोपनिषत्** Ms. No. P. 8556

Beginning :

अथ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमाम् ।
यदाऽनुध्यायते मन्त्रं गात्रकम्पोऽथ जायते ॥
आसनं पद्मकं वध्वा यच्चान्यदपि रोचते ।
नासिकाग्रे च दृष्टिं कुर्याद्धस्तपादौ तु संयतौ ॥

End :

जन्मान्तरसहस्रेषु यदा क्षीणानुकिल्बिषः ।
तदा पश्यति योगेन संसारोच्छेदनं महत् ॥
संसारोच्छेदनं महदिति ॥

Colophon :

योगशिखा समाप्ता ॥

421

Sl. No. 2058 **योगशिखोपनिषद्भाष्यत्** Ms. No. B. 247/24

Beginning :

सिद्धिमुक्तिप्रदौ मार्गौ प्रदर्श्येते यया स्फुटौ ।
व्याख्यास्ये तामिमां योगशिखोपनिषदं पराम् ॥

इहादौ सर्वेषां देवानां कथं मुक्तिरिति हिरण्यगर्भकर्तृकः सुतरामसङ्गतो भवति ; कुतः ? स्वार्थस्यैव प्रष्टव्यत्वात् + + । अत्रोच्यते—

हिरण्यगर्भस्य सम्यग्ज्ञानित्वान्न स्वार्थः कश्चित्प्रष्टव्योऽस्ति ॥

End :

एवं सर्वार्थसारोपदेशैः संसारार्णवतारकं + + गुरुं प्राप्य तद्वाक्यं + + दृढं विश्वस्य + + + अहं ब्रह्मास्मीत्यनुस्यूतशब्दानुविद्धसमाधियोगाभ्यासवासनाबलेन संसारसागरं तरन्तीति सर्वं समञ्जसतरमवगन्तव्यम् ॥

Colophon :

इति षष्ठोऽध्यायः । इत्यप्पयदीक्षिताचार्यकृतिषु योगशिखोपनिषद्भाष्यं समाप्तम् ॥

422

Sl. No. 2063 — रहस्योपनिषत् — Ms. No. A. 16/75

Beginning :

परमात्माऽद्वैतसत्यात्मा प्रत्यगानन्दचिद्घनः ।
आश्रये दक्षिणामूर्तिमवाङ्मनसगोचरम् ॥

अथातो रहस्योपनिषदो व्याख्यास्यामः– देवर्षयो ब्रह्माणं + + पप्रच्छुः– भगवन् अस्माकं रहस्योपनिषदमनुब्रूहीति ॥

End :

यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ।
सर्वपापविनिर्मुक्तः साक्षात्कैवल्यमश्नुते ॥

साक्षात्कैवल्यमश्नुत इति ॥

Colophon :

इति रहस्यब्रह्मोपनिषत् समाप्ता ॥

423

Sl. No 2064 — रहस्योपनिषत् — Ms. No. B. 124/2

Beginning :

परमात्माऽद्वैतसत्यात्मा प्रत्यगानन्दचिद्घनः ।
आश्रये दक्षिणामूर्तिमवाङ्मनसगोचरम् ॥

अथातो रहस्योपनिषदो व्याख्यास्यामः– देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुः– भगवन् अस्माकं रहस्योपनिषदमनुब्रूहीति ॥

End :

तच्छ्रुत्वा सकलाकारं व्यासस्सत्यवतीसुतः ।
पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान् ॥
यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ।
सर्वपापविनिर्मुक्तः साक्षात्कैवल्यमश्नुते ॥

Colophon :

रहस्यब्रह्मोपनिषत्समाप्ता ॥

424

Sl. No. 2068 **रहस्योपनिषद्भाष्यम्** Ms. No. A. 167/6

Beginning :

सर्ववेदान्तसारांशमहावाक्यार्थरूपकम् ।
रहस्योपनिषद्भाष्यमधीत्येहैव मुच्यते ॥

अथातो रहस्योपनिषदं व्याख्यास्याम इत्याषाया: अस्या: रहस्योपनिषद: देवर्षयो ब्रह्माण-मित्यादि सम्बन्ध: + + + एवमनुबन्धचतुष्टयमूह्यम् ॥

End :

इदानीमेतद्रहस्योपनिषदध्येतु: कैवल्यं फलमभिधाय उपनिषदमुपसंहरति— य इति । गुरूपदेशद्वारेण य इमां रहस्योपनिषदमधीते स साक्षादपरोक्षत: कैवल्यमश्नुते— प्राप्नोति । पुनरुक्तिरुपनिषत्परिसमाप्तिद्योतनार्था ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ रहस्योपनिषद्भाष्यं समाप्तम् ॥

425

Sl. No. 2070 **राजराजेश्वर्युपनिषत्** Ms. No. B. 330/1

Beginning :

ओं सह नाववतु + शान्ति: ॥

बिन्दुमध्ये स्थितं नादं लिङ्गं प्रत्यक्कलात्मकम् ।
त्रियम्बकसुखासीनं श्रीगुरुम गगनोपमम् ॥
अथर्वीयक्रियागुप्ता स्वानुभूतिप्रकाशयुक् ।
चक्षुर्मध्ये स्थितं गुह्यं अङ्गुष्ठं परमात्मकम् ॥

End :

ब्रह्म सूक्ष्मं रविं साक्षिं साक्षिसाक्षिनिरञ्जनम् ।
गुरोर्मुखेन ज्ञातव्यं अनायुत्युपलक्ष्यते ॥ (?)

Colophon :

इति राजराजेश्वर्युपनिषत्समाप्ता ॥

426

Sl. No. 2073 रामपूर्वतापनीयोपनिषत् Ms. No. P. 1541/2

Beginning :

ओं भद्रं कर्णेभिः + + शान्तिः ॥

चिन्मये दि × महाविष्णौ जाते दशरथे हरौ ।
रघोः कुलेऽखिलं × ति राजते यो म × स्थितः ॥
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः ।
राक्षसा येन मरणं यान्ति स्वोद्रेकतोऽथवा ॥

End:

तद्भक्ता ये लब्धकामाश्च भुक्त्वा तथा पादं परमं यान्ति × × च । इमा ऋचः सर्वकामार्थदाश्च ये ते पठ × × × × मला यान्ति मोक्षमेतत् पठन्त्यमला यान्ति मोक्षमित्यु × × ॥ भद्रं कर्णेभिः + शान्तिः ॥

Colophon :

इति पूर्वतापनीये आथर्वणे पारमहंस्ये पञ्चमः खण्डः ॥

427

Sl. No. 2090 रामपूर्वतापिन्युपनिषद्भाष्यम् Ms. No. P. 395/3

Beginning :

सत्यं सत्यतया हि यस्य निखिलं रज्जौ यथा कुण्डली
यस्यानन्दतया प्रपञ्चरचना सानन्दमुद्भ्राजते ।
यच्चिद्रूपतया चिदात्मकमिवाभाति प्रपञ्चातिगं
सत्यानन्दचिदात्मकं श्रुतिवचोगीतं भजे राघवम् ॥

+ + + +

आनन्दाख्यस्य रामोपनिषदि विरले साधु टीकां नवाख्याम् ॥

+ + + +

इह खलु सकलदुःखकाभलोपयोरन्यतरस्य पुरुषार्थत्वावग.... माह– केवलनिखिलदुःख जाल + + परिश्रान्तमनसां + + उभयविधस्यापि पुरुषार्थत्वानुपलम्भात् ॥

End :

वृष्या × × क्तहराद्वहरो(?)पनमितान्मुह्यन्नहं कोचिकां
कुर्वन्नन्दमिवांकगां वहति यो यस्मिन् स्थितोऽहर्निशम्।
तस्मिन् काशिपुरे पुरारिनिलयस्वर्गङ्गयालङ्कृते
टीकानन्दवनैर्वरा विरचिता रामादिका काशिका ॥

Colophon :

इति श्रीरामचन्द्रचरणानुगृही × × × परमहंस परिव्राजकाचार्यानन्दवनविरचितायां श्रीरामपूर्व[उत्तर]तापनीयटीकायां श्रीरामकाशिकायां पञ्चमोपनिषत् समाप्ता ॥

Extra information :

ग्रन्थान्ते–

यत्पदध्याननिर्धूतपापराशिः पुमान् भवेत्।
सम्पत्सारस्वतपदं तं वन्दे रघुनन्दनम् ॥

इति श्रीरामस्तुतिरूपमेकं पद्यं दृश्यते ॥

428

Sl. No. 2093 रामपूर्वतापिन्युपनिषद्भाष्यम् Ms. No. P. 2942/1

Beginning :

श्रीरामतापनीयेऽस्मिन्नज्ञातार्थपदाश्रया।
व्याख्योपक्रम्यतेऽत्यल्पकल्पनातीतसिद्धये ॥

चिन्मय इत्याद्या देवं स्तौति। स देवं पश्यति ; सोऽमृतत्वञ्च गच्छति ॥

End :

चिन्मय इत्याद्या ऋचो मुमुक्षुणा अवश्यं पठनीयेत्याह– इमानीति। ये पठन्ति त इति योजना। इति शब्दः पञ्चमोपनिषत्समाप्त्यर्थः। वीप्सा पूर्वतापनीसमाप्त्यर्था। ॐ तत्सत् ॥

Colophon:

इति श्रीश्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पाद × × श्रीरामनामयति-विरचितायां पदयोजनीयायां पूर्वतापिनी समाप्ता ॥ .

329

Sl. No. 2099 **रामपूर्वतापिन्युपनिषद्भाष्यम्** Ms. No B. 247/16

Beginning :

रामस्य ब्रह्मता यस्यां स्फुटमेवाभिधीयते।
निःश्रेयसकरीमेनां व्याख्यास्ये रामतापिनीम् ॥

ननु राक्षसमरणकर्तृत्वाद्रामस्य रामनामेत्यनुपपन्नमेतत– श्रुतियुक्त्यनुभवप्रमाणानुसारित्वात् + + + इत्यत आह– उपासकानां कार्यार्थं + + परब्रह्मणो रूपकल्पना ॥

End :

तस्मात् विजातीयप्रत्ययतिरस्कारपूर्वकदृश्यानुविद्धसमाध्यारूढः सद्यो मुमुक्षुः सजातीयप्रत्ययप्रवाहात्मकशब्दानुविद्धसमाधिमेव श्रीरामस्वरूपभजनं कुर्यादिति ॥

Colophon :

इति श्रीमत्सुदरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतिषु श्रीरामपूर्वतापनीयोपनिषद्भाष्यं समाप्तम् ॥

430

Sl. No. 2103 **रामरहस्योपनिषत्** Mss. No. B. 247/15

Beginning :

ॐ भद्रं कर्णेभिरिति शान्तिः ॥
रहस्यं रामतपनं वासुदेवं च मुद्गलम् । + +
प्रह्लादाद्या विष्णुभक्ता हनूमन्तमथाब्रुवन् ॥
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनाम् । + +
+ + + कथय त्वं महाबल ।
हनूमान् होवाच– + + +
एतेषु चैव सर्वेषु तत्त्वं च ब्रह्मतारकम् ॥
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥

End :

द्विभुजं स्वर्णवर्णाभं रामसेवापरायणम् ।
मौञ्जीकौपीनसहितं मां ध्यायेद्रामसेवकम् ॥

इति ॥

Colophon :

इति रामरहस्योपनिषदि द्वितीयोऽध्यायः ॥

431

Sl. No. 2106 रामरहस्योपनिषत् Ms. No. C. 3682/24

Beginning :

कैवल्यश्रीस्वरूपेण राजमानं महोदयम् ।
प्रतियोगिविनिर्मुक्तं श्रीरामपदमाश्रये ॥

ओं भद्रं कर्णेभिरिति शान्तिः ॥

रहस्यं रामतपनं वासुदेवञ्च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षु महच्छारीरकं शिखा ॥

\+ \+ \+ \+

एतेषु चैव सर्वेषु तत्त्वञ्च ब्रह्मतारकम् ।
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम् ॥

End .

स राममन्त्राणां कृतपुरश्चरणो रामचन्द्रो भवति । तदेतदृचाऽभ्युक्तम्–

सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥

ओं सत्यमित्युपनिषत् ॥

Colophon :

इति रामरहस्योपनिषत्समाप्ता ॥

432

Sl. No. 2109 **रामरहस्योपनिषद्भाष्यम्** Ms. No. B. 247/15

Beginning :

श्रीराममन्त्रः सर्वे च यस्यामेव समुद्धृताः ।
व्याख्यास्ये तामिमां रामरहस्योपनिषद्विरम् ॥

नन्विह श्रीरामो ब्रह्म तारकमित्युक्तम्– अत्र + + श्रीरामशब्दोऽनावश्यकः– महाविष्णोरवतारत्वेन साक्षात्तारकत्वासिद्धेरिति चेन्न । रामोऽस्मीत्यभेदोपासकस्य + + + साक्षात्तारकत्वं + + रामशब्दस्य च सुस्थितमिति ॥

End: :

तस्मात् सर्वज्ञे हनुमति आत्मप्रशंसाकर्तृत्वादिदोषो न गन्धमात्रोऽपि शङ्क्यः ॥

Colophon :

– – – – –

433

Sl. No. 2112 **रामाथर्वशिरउपनिषत्** Ms. No. C. 3765/3

Beginning :

सह नाववतु + + + विद्विषावहै । अथ पुरुषो ह वै श्रीरामोऽकामयत प्रजास्सृजेयेति । श्रीरामेण सर्वमिदं वितरति । श्रीरामेण सर्वं प्रकल्पितमिति । श्रीरामेण सर्वं प्रतिष्ठितमिति ॥

End:

श्रीरामः पितरो ऋषयश्चेति । श्रीरामश्चाश्विनौ देवा इति । श्रीरामः देवतिर्यङ्नरस्थावराणीति । श्रीरामः सहन्श्चेति । श्रीरामः सर्वभूतस्थ इति । श्रीरामः सर्वमेवेति श्रीरामरामेत्ये- × × × सह नाववतु + + + विद्विषावहै । + + शान्तिः ॥

Colophon :

– – – – – –

434

Sl. No. 2113 **रामायणोपनिषत्** Ms. No. P. 4591/2

Beginning :

श्रीमान् श्रीरामबाणस्सकलदुरितहा रामनामाङ्कितो यः
सादित्यान् दैत्यवर्गान् सुखयति सुतरां क्लेशयत्युग्रतेजाः ।
रक्षोविक्षोभदक्षः क्षतजपरिवृतो लक्षलक्षौघभक्षः
पक्षे राजन् सुपक्षो नतमुनिजनतारक्षको रक्षतां नः ॥
+ + + +
श्रीरामं च गुरून् नत्वा तेनैवेह प्रचोदितः ।
रामायणोपनिषदं विवशो विवृणोम्यहम् ॥

End:

इतीदमुक्त्वा विदितं महाबलं प्रशस्यमानः स्वकृतो महात्मा ।
समेत्य रामः प्रियया सलक्ष्मणस्सुखं सुखा × × नुबभूव राघवः ॥

विदितं सर्वैर्यथा भवति तथा अहो भक्तपक्ष × × भगवतः भक्तैरप्रार्थितमपि ब्रह्मादिदुर्लभमपि प्रयच्छतीति भक्तभाग्यमभिनन्दति ॥

Colophon :

इति भक्तिप्रकरणम् । इति रामायणोपनिषदि वैराग्यप्रकरणं सम्पूर्णम् ॥

435

Sl. No. 2114 **रामोत्तरतापिन्युपनिषत्** Ms. No. P. 667/3

Beginning :

ओम् । भद्रं कर्णेभिरिति शान्तिः ॥
चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ ।
रघोः कुलेऽखिलं राति राजते यो महीस्थितः ॥
+ + +
राक्षसान् मर्त्यरूपेण राहुर्मनसिजं यथा ।
तथा सत्यस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

End :

अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते । +
सम्यगाराधितो रामः प्रसीदत्येव सत्वरः ।

तदेतदृचाऽभ्युक्तम्– तद्विष्णोः परमं पदं + + + विष्णोर्यत् परमं पदम् ॥

Colophon:

इति आथर्वणपारमहंस्ये रामोत्तरतापिन्युपनिषत् समाप्ता ॥

436

Sl. No. 2132 **रामोत्तरतापिन्युपनिषद्व्याख्या** Ms. No. P. 2942/2

Beginning :

एवं चिन्मय इत्यादिपञ्चोपनिषद्भिः मन्दाधिकारिणां सगुणोपासनं प्रपञ्चितम् । तेन शुद्ध-सत्वानां सांसारिकफलविरक्तानां त्यक्तसकलकर्मणां मुमुक्षूणां कृते निर्गुणप्रधानोत्तरतापनीयोपनिषदधुना प्रस्तूयते ॥

End :

स देवं पश्यति । सोऽमरत्वं च गच्छतीति देवं श्रीरामचन्द्रं अन्तर्बहिश्चानुभवति । + + + + ।

तस्मात्सर्वात्मना रामं भजेऽहं करुणाकरम् ।
रामो रामोऽहमस्मीति दृढबोधप्रसिद्धये ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दानन्दभगवत्पाद × × श्रीरामनाम × × प्रकाशिकायां रामोपनिषत्पदयोजनायां उत्तरतापनीया समाप्ता ॥

437

Sl. No. 2137 **रामोपनिषत्** Ms. No. C. 4461

Beginning :

अथैनं प्रत्युवाच–

श्रीरामस्य मनुं काश्यां बीज × × पद्मपभध्वजः ।
मन्वन्तरसहस्रैस्तु जपहोमार्चनाविधिः ॥

ततः प्रसन्नो भगवान् श्रीरामः प्राह शङ्करम् ।
वृणीष्व यदभीष्टं ते ददामि परमेश्वर । + +

स होवाच श्रीरामः–

क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृताः ।
क्रिमिकीटादयोऽप्याशु मुक्तास्सन्तु न चान्यथा । +

ओं यो वै रामचन्द्रः स भगवान् अद्वैतपरमानन्दात्मा यः परब्रह्म + + + तस्मै नमो नमः ॥

End :

तदेतदृचाभ्युक्तम्– ऋचो अक्षरे परमे व्योमन् । यस्मिन् देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः + + + स मुक्तो भवति स मुक्तो भवतीत्युपनिषत् ॥

Colophon :

इति श्रीरामोपनिषत् समाप्ता ॥

438

Sl. No. 2138 रामोपनिषत् Ms. No. B. 124/5

Beginning

अथ हैनं भरद्वाजः पप्रच्छ– याज्ञवल्क्यमुपसमेत्योवाच– श्रीराममन्त्रराजस्य माहात्म्यं नो-ब्रूहि भगवन्निति । स होवाच याज्ञवल्क्यः–

स्वप्रभः परमज्योतिः स्वानुभूत्यैकचिन्मयः ।
तदेतन्मन्त्रराजस्य मनोराद्याक्षरः स्मृतः ॥

End :

तदेतदृचाऽभ्युक्तम्– ऋचो अक्षरे परमे व्योमन् । + + + विष्णोर्यत्परमं + + + दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । तत्सत् ॥

Colophon :

इत्याथर्वणपारमहंस्ये श्रीरामोपनिषत्समाप्ता ॥

439

Sl. No. 2139 रामोपनिषत् Ms. No. C. 3719

Beginning :

ओं अस्य श्रीअथर्वणीयरामातापनीयस्तोत्रमहामन्त्रस्य वसिष्ठो भगवान् ऋषिः ; श्रीरामचन्द्रो देवता ; + + + श्रीरामप्रीत्यर्थे जपे विनियोगः ॥

ॐ अथ पुरुषो ह वै श्रीरामोऽकामयत प्रजास्सृजेयेति । श्रीरामेण सर्वमिदं विभाति ॥

End :

श्रीरामः प्रत्यगात्मा परमात्मेति ; श्रीरामः पृथिव्यादिपञ्चभूतानि, + + + + श्रीरामे सर्वं प्रकल्तिमिति ; श्रीरामेत्येतद्ये जपंतीत्युपनिषत् ॥

Colophon :

इत्याथर्वणरहस्ये देवदर्दनशाखायां (?) श्रीरामोपनिषत्समाप्ता ॥

440

Sl. No. 2140 रुद्रतापनीयोपनिषत् Ms. No. P. 8293/7

Beginning :

× पंयामि स्वेन तेजसा ततो देवा रुद्रं नापश्यंस्ते देवा रुद्रं ध्यायन्ति । ततो देवा ऊर्ध्वबाहव स्तुन्वन्ति ॥ १ ॥

ॐ यो ह वै रुद्रः स भगवान् भूर्भुवस्सुवर्यश्च ब्रह्मा तस्मै वै नमो नमः ॥ २ ॥

End:

शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य । समाप्ताथर्वशिरसमेतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यत इत्योगँ सत्यम् ॥

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

Colophon :

इति रुद्रतापनीयः समाप्तः ॥

441

Sl, No. 2141 **रुद्रहृदयोपनिषत्** Mss. No. P. 5902/4

Beginning :

सह नाववत्विति शान्तिः ॥

प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मिन् देवाश्च सर्वशः ॥
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्तु मे ।
तस्य तद्वचनं श्रुत्वा पिता प्रत्युवाच शुकम् ॥

श्रीवेदव्यास उवाच—

सर्वदेवात्मको रुद्रः सर्वदेवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥

End :

रुद्रो गन्धः उमा पुष्पं तस्मै तस्यै नमो नमः ।
रुद्रो बीजमुमा पीठं तस्मै तस्यै नमो नमः ।
रुद्रो मोक्ष उमा सिद्धिः तस्मै तस्यै नमो नमः ।
सर्वदेवात्मकं रुद्रं नमस्कुर्यात्पृथक् पृथक् ॥
एभिर्मन्त्रपदैरेव नमस्कुर्यादीशपार्वती ।
यत्र यत्र भवेत्साध्यमिमं मन्त्रमुदीरयेत् ॥
ब्रह्महा जलमध्ये × सर्वपापैः प्रमुच्यते ॥

Colophon :

इति रुद्रहृदयोपनिषत् ॥

442

Sl. No. 2142 **रुद्रहृदयोपनिषत्** Mss. No. B. 247/45

Beginning :

ॐ सह नाववत्विति शान्तिः ॥

प्राणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मिन् देवाश्च संश्रिताः ॥

कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्ति मे ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ॥
सर्वदेवात्मको रुद्रः सर्वदेवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥

End :

एवं रूपपरिज्ञानं यस्यास्ति परयोगिनः । + + × स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः । ब्रह्मैव भवति स्वस्थः सच्चिदानन्दमात्रकः ॥ इत्युपनिषत् ॥

Colophon :

इति रुद्रहृदयोपनिषत् समाप्ता ॥

End :

443

Sl. No. 2147 श्रीरुद्रहृदयोपनिषत् Ms. No. C. 3682/56

Beginning :

ॐ सह नाववत्विति शान्तिः ॥

हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम् ।
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥
प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
यद्ब्रह्मरुद्रहृदयं महाविद्याप्रकाशिनम् ॥ + +
को देवस्सर्ववेदेषु कस्मिन् देवाश्च सर्वशः ।
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्तु मे ॥ + +

श्रीवेदव्यास उवाच--

सर्वदेवात्मको रुद्रः सर्वदेवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥

End :

आकाशमेकं सम्पूर्णं कुत्रचिन्नैव गच्छति ।
तद्वत्स्वात्मपरिज्ञानी कुत्रचिन्नैव गच्छति ॥

स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः ।
ब्रह्मैव भवति स्वस्थस्सच्चिदानन्दमात्रकः ।

इत्युपनिषत् ॥

Colophon :

इति श्रीरुद्रहृदयोपनिषत् समाप्ता ॥

444

Sl. No. 2148 **रुद्रहृदयोपनिषद्भाष्यम्** Ms. No. B. 247/45

Beginning :

रुद्रोमात्मकता सर्वजगतो यत्र कथ्यते ।
व्याख्यास्यते तामिमामद्य श्रीरुद्रहृदयश्रुतिम् ॥

नन्विह सर्वाधिष्ठानमद्वन्द्वं + + इत्यारभ्य निर्विशेषपरब्रह्मात्मैक्यस्याप्यवधारितत्वे-नोत्तमाधिकारिविषयत्वावगमात् + + + सर्वदेवतान्तरैक्यस्य वा प्रतिपादनमनावश्यकमेव भवतीत्याशङ्कायामिदमुच्यते–

सर्वदेवैक्यज्ञानवत एव ब्रह्मात्मैक्यज्ञानाधिकारसम्भवादेतत्प्रतिपादनमुपक्रमे आवश्यकमेव ॥

End :

प्रेतसादृश्यं तु सर्वाशनविनिर्मुक्तस्य निष्प्रतियोगिकस्य निराकारब्रह्मण इति तत्रेह विवक्षि-तम् । तस्मात् श्रुत्युक्तं सर्वमनवद्यमवगन्तव्यम् ॥

Colophon :

इति रुद्रहृदयोपनिषद्भाष्यं समाप्तम् ॥

445

Sl. No. 2151 **रुद्राक्षजाबालोपनिषत्** Ms. No. P- 5592/43

Beginning

अथ कालाग्निरुद्रसर्वोपनिषत्सारं ब्रवीमीति । स होवाच– स मृत्युं जयति । भस्म स्वभ-क्तानां धृत एव मृत्युमपमृत्युं च मारयति । य आत्म × × दा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाध्यामृतं (?) यस्य मृत्युस्तस्मै देवाय हविषा विधेम ॥

End :

अथ कालाग्निरुद्रः प्रोवाच— स तु जप्त्वैव शुःचि पूतः कर्मणे भवति । द्वितयं जप्त्वा गणाधिपत्यमवाप्नोति । त्रितयं जप्त्वा दिवमेव प्रविशन्तों सत्ययों ॥ (?)

Colophon :

इत्यथर्वणे मुक्तिश्रुत्यभिधेये रुद्राक्षजाबालोपनिषत्समाप्ता ॥

446

Sl. No. 2152 **रुद्राक्षजाबालोपनिषत्** **Ms. No. P. 7345/1**

Beginning :

ॐ निःश्वसितमस्य वेदाः वीक्षितमस्य पञ्चभूतानि स्मितमेतस्य चराचरं अस्य च सुप्तं महाप्रळयः । षट्त्रिरङ्गैरुपेताय विविधैरव्ययैरपि शाश्वताय नमः ॥

End :

अथ कालाग्निरुद्रः प्रोवाच— तद्रुद्राक्षि वाग्विषयं कृतेति दशगोप्रदाने यत्फलमवाप्नोति तत्फलमश्नुते । स एष ज्योतिः रुद्राक्षिर्होवाच— एष सर्वेश्वरं तद्रुद्रा × × × ॥

Colophon :

— — — —

447

Sl. No. 2153 **रुद्राक्षोपनिषत्** **Ms. No. P. 667/1**

Beginning :

हरिः ओम् । अथ कुमारो भगवन्तं परमेश्वरं पप्रच्छ— अधीहि भगवन् । कथं रुद्राक्षोत्पत्तिः ? रुद्र उवाच— पुरा त्रिपुरदाहे निमीलिताक्षोऽहम् । तेभ्यो जलबिन्दवो भूमौ पतिताः । ते रुद्राक्षा जाताः ॥

End :

तेषां स्मरणमात्रेण दशदानसहस्रगोदानफलं लभते । धारणेन शिवेन सह मोदते । तद्धारणेन ब्रह्मगोघ्नसुरापानस्वर्णस्तेयगुरुतल्पगमनात्पूतो भवति । ओं ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

Colophon :

— — —

448

Sl. No. 2154

रुद्राक्षोपनिषत्

Ms. No. P. 5184

Beginning :

अथ कस्मिन् रुद्रं भगवन्तं सनत्कुमारः पप्रच्छ । अधीहि भगवन् रुद्राक्षधारणविधिं ब्रूहीति होवाच ॥

End :

यत्र भुञ्जीत भस्मा × × ग्ङ्मू × × पि वा ।
यत्र बुद्धे महादेवः सपत्नीको वृषध्वजः ॥

स्मृतौ—

अभक्ष्यभक्षणं येषां भस्मधारणपूर्वकम् ।
तस्माद्भस्मैवं स्यान्मूलेनात्र विचारय ॥

Colophon :

— — — —

449

Sl. No. 2156

ललितोपनिषत्

Ms. No. P. 7550/20

Beginning :

सह नाववतु + + शान्तिः । हरिः ओम् । श्री गुरवः सर्वकारणभूता शक्तिः ; तेन नवरन्ध्ररूपो देहः । नवचक्ररूपं श्रीचक्रम् । वाराही पितृरूपा । कुरुकुल्ला बली माता देवता । पुरुषार्थाः सागराः ॥

End :

पञ्चदश नित्या एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनं वा परो जीवन्मुक्तो भवति । स चैव शिवयोगीति गद्यते । कारिमतेनान्तः चक्रं भावना प्रतिपादिता । य एवं वेद इत्युपनिषत् । सह नाववतु + + + शान्तिः ॥

Colophon :

इति ललितोपनिषत् ।

450

Sl. No. 2157 | लिङ्गधारणोपनिषत् | Ms. No. P. 5717/5

Beginning :

ओं धर्मजिज्ञासा । ज्ञानं बुद्धिश्च । ज्ञानान्मोक्षकारणम् । मोक्षान्मुक्तिस्वरूपपंथाः । ब्रह्मज्ञानज्ञा बुद्धिश्च । लिङ्गैक्यं देह देहो लिङ्गं लिङ्गजीवेन आज्ञानाज्ञा बुद्धिश्च ॥

End :

संयुक्तं लिङ्गं मोक्षमेव भवत्येव । मोक्षमेव धारणं विन्द्यात् । उशन्तीव मातरं कुर्यात् । ओं तत्सवितुर्वरेति ॥

Colophon :

लिङ्गोपनिषत् समाप्ता ॥

451

Sl. No. 2158 | लिङ्गशरीरोपनिषत् | Ms. No. P. 8249

Beginning :

ओम् देवता ऋषयः सर्वे ब्रह्माणमिदमब्रुवन् ।
मृतस्य दीप्यते पिण्डं कथं गृह्णन्त्यचेतसः ॥
भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा ।
हंसस्त्यक्त्वा गतो देहं कस्मिन् स्थाने व्यवस्थितः ॥

End :

दशमेन तु पिण्डेन भावानां प्लवनं तथा ।
पिण्डे पिण्डशरीरस्य पिण्डदानेन सम्भवः ॥

पिण्डदानेन सम्भव इति ॥

Colophon :

इत्यथर्ववेदे लिङ्गशरीरोपनिषत्समाप्ता ॥

452

Sl. No. 2160 **वज्रसूच्युपनिषत्** Ms No. P. 2380/29

Beginning :

वज्रसूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥

ब्रह्मक्षत्रवैश्यशूद्रा इति चत्वारो वर्णाः । तेषां वर्णानां प्रधान इति × × × वचनादनन्तरूपं स्मृतिभिरप्युक्तम् । तत्र चोद्यमस्ति— को वा ब्राह्मणः + + + + इत्यष्टौ प्रश्नाः ॥

End :

एवमुक्तलक्षणो यस्स एव ब्राह्मण इति श्रुतिस्मृतीतिहासपुराणानामभिप्रायः । अन्यथा ब्राह्मण्यसिद्धिः नास्त्येव । सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् । आत्मानं सच्चिदानन्दं ब्रह्म भावयेत् । इत्युपनिषत् ॥

Colophon :

— — — —

453

Sl. No. 2171 **वज्रसूच्युपनिषद्भाष्यम्** Ms. No. A. 167/8

Beginning :

यत्र प्रश्नाष्टकद्वारा ब्राह्मणत्वविनिर्णयः ।
वज्रसूच्यभिधामेनां व्याख्यास्ये श्रुतिमादरात् ॥

वज्रसूचीमिति । ब्रह्मज्ञानहीनानां दूषणं ज्ञानं, चक्षुर्येषां तेषां भूषणं– अज्ञानपर्वतस्य भेदनम् । अत एव शस्त्रं वज्रायुधमिव स्थितं + वज्रसूच्याख्योपनिषदमित्यर्थः । प्रवक्ष्यामि ॥

End :

सच्चिदानन्दांशभूतं प्रत्यगात्मानं सच्चिदानन्दांशभूताद्वितीयं ब्रह्म भावयेत् । अहं ब्रह्मास्मीत्यविच्छिन्नतैलधारान्यायेन अनवरतनिदिध्यासनं कुर्यादित्यर्थः । आत्मानं सच्चिदानन्दं ब्रह्म भावयेत् इत्यभ्यास उपनिषत्परिसमाप्तिद्योतनार्थः ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ वज्रसूच्युपनिषद्भाष्यं समाप्तम् ॥

454

Sl. No. 2174 वराहोपनिषत् Ms. No. P. 946/18

Beginning :

अस्य (?) श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ— अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं— किं द्रव्यं ? किं स्थानं ? + + फलमिति च । श्रीवराह उवाच— क्षीराब्धितः + + क्षीरखण्डान् वैनतेय आनीय सटाभिः द्विदळनश्वेतमृत्तिकाखण्डमुक्तिसाधिका भवन्ति ॥

End :

तत्पादाकृतय ऊर्ध्वपुण्ड्राः + + स्मृताः । फलं लब्ध्वा + + नारायणे मय्यचला भक्तिश्च वर्धते । संज्ञेन तद्विष्णोः परमं पदमित्याप्नोति । य एवं वेद । य एवं वेद । इत्युपनिषत् ॥

Colophon :

वराहोपनिषत् ॥

455

Sl. No. 2175 वराहोपनिषत् Ms. No. P. 1480/2

Beginning :

अथातः श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ— ऊर्ध्वपुण्ड्रविधिम् । किं द्रव्यम् ? कियत् स्थानम् ? का रेखा ? को मन्त्रः ? कः कर्ता ? किं फलं ? इति च ॥

End:

श्रीदेवी प्रथमं नाम द्वितीया अमृतोद्भवा ।
तृतीया कमला प्रोक्ता चतुर्थी शान्तरूपिणी ॥
पञ्चमी विष्णुपत्नी तु षष्ठी तु हरिवल्लभा ।
सप्तमा तु वरारोहा अष्टमा वैष्णवी तथा ॥
नवमा शार्ङ्गिणी प्रोक्ता दशमा देवि × × का ।
एकादशी तु लक्ष्मी च द्वादशी सुरसुन्दरी ॥

Colophon :

इति श्रीचूर्णध्यानम् ॥

456

Sl. No. 2176 **वराहोपनिषत्** Ms. No. P. 2803/1

Beginning :

सह नाववबतु + + शान्तिः शान्तिः शान्तिः ॥ ओं अथातः श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ– अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं– किं द्रव्यं? का रेखा? + + इति च ॥

End :

ब्रह्मज्ञानं लब्ध्वा तद्विष्णोः परमं पदं प्राप्नोति ; न च पुनरावर्तते न च पुनरावर्तत इत्याह– भगवान् वराहरूपी । सह नाववतु + + शान्तिः शान्तिः शान्तिः ॥

Colophon :

— — — —

457

Sl. No. 2177 **वराहोपनिषत्** Ms No. C. 1512/2

Beginning

सह नाववत्विति शान्तिः । अथ ऋभुर्वै महामुनिः देवमानेन द्वादशवत्सरं तपश्चकार । तदवसाने वराहरूपी भगवान् प्रादुरभूत् । स होवाच– उत्तिष्ठोत्तिष्ठ ; वरं वृणीष्व इति । + + + तस्मै नमस्कृत्योवाच– + + ब्रह्मविद्यां ब्रूहीति । स होवाच–

चतुर्विंशतितत्त्वानि के चिदिच्छन्ति साधवः ।
केचिन् षट्त्रिंशत्तत्त्वानि केचित् षण्णवतीनि च ॥

End :

एतदुपनिषदं योऽधीते सोऽग्निपूतो भवति ; स वायुपूतो भवति ; सुरापानात्पूतो भवति ; स्वर्णस्तेयात्पूतो भवति ; स जीवन्मुक्तो भवति । तदेतदृचाऽभ्युक्तम्– तद्विष्णोः परमं पदं + + विष्णोर्यत्परमं पदमित्युपनिषत् ॥

Colophon :

इति वराहोपनिषत् समाप्ता ॥

458

Sl. No. 2179 **वराहोपनिषद्भाष्यम्** (वराहमञ्जूषा) Ms. No. B. 497

Beginning :

ओमादौ सह नाववत्विति वरां शान्तिं पठित्वा ततः
श्रीमत्सुन्दरसद्गुरोः पदयुगं स्मृत्वा च नत्वाऽङ्घ्रकैः ।
वाराहोपनिद्वचांसि मधुराण्यात्मैक्यबोधीनि च
व्याख्यास्ये भगवान् प्रसीदतु शिवो वाराहमूर्तिर्हरिः ॥

\+ \+ \+

अथेति । अथ– साधनचतुष्टयसम्पत्त्यनन्तरं ऋभुनामको वैकारिकोऽपिकारार्थः ॥

End :

वराहव्याख्यानं यदि भुवि सकृद्वा + शृणोतीदं + स खलु मुक्तो भवति ।

\+ \+ \+

यद्वक्त्रामृतभानुनिस्सृतमहावाक्यामृतं प्रत्यहं
कर्णाभ्यामहमादरेण सुतरां पीत्वा कृतार्थोऽभवम् ।
एवं यत्कृपयैव साधु रचिता लोकोपकाराय च
व्याख्येयं गुरवे नमोऽस्तु सततं श्रीसुन्दरेशाय नः ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पय्यदीक्षिताचार्यकृतौ वराहमञ्जूषायां पञ्चमोऽध्यायः । वराहोपनिषद्भाष्यं समाप्तम् ॥

459

Sl. No. 2182 **वासुदेवोपनिषत्** Ms. No. P. 1682/15

Beginning :

नमस्कृत्य श्रीभगवन्तं नारदः सर्वेश्वरं वासुदेवं पप्रच्छ– अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं द्रव्यमन्त्रस्थानानि मे ब्रूहीति । तं होवाच भगवान् + + वैकुण्ठस्थानादुत्पन्नं + + विष्णुचन्दनं + + मुक्तिसाधनं भवति ॥

End :

यस्त्वधीते वा स सर्वपातकेभ्यः पूतो भवति । + + तद्विष्णोः परमं पदं इत्येतद × × न्निर्वाणमनुशासनं वेदानुशासनं वेदानुशासनमिति ॥

Colophon :

वासुदेवोपनिषत्सम्पूर्णा ॥

460

Sl. No. 2183 **वासुदेवोपनिषत्** Ms. No. P. 3581/8

Beginning :

भद्रं कर्णेभिरिति + शान्तिः ॥

नमस्कृत्य भगवान् नारदस्सर्वेश्वरं वासुदेवं पप्रच्छ– अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं द्रव्यमन्त्रस्थानादिसहितं मे ब्रूहीति । तं होवाच भगवान् वासुदेवः । वैकुण्ठस्थानादुत्पन्नं + विष्णुचन्दनं + पीतवर्णं मुक्तिसाधनं भवति ॥

End :

यस्त्वेतदधीते वा स सर्वपातकेभ्यः पूतो भवति ; + + सर्वैर्देवैः पूज्यो भवति ; श्रीमन्नारायणे मय्यचञ्चला भक्तिश्च भवति ; स सम्यग्ज्ञानं लब्ध्वा विष्णुसायुज्यमाप्नुयात् ; न च पुनरावर्तते ; न च पुनरावर्तते ; इत्याह भगवान् वासुदेवः । यस्त्वेतद्वाऽधीते सोऽप्येवमेव भवत्यों सत्यम् ॥

Colophon :

श्रीवासुदेवोपनिषत् समाप्ता ॥

461

Sl. No. 2186 **वासुदेवोपनिषत्** Ms. No. B. 309/2

Beginning :

ओम् । शेषो ह वै वासुदेवात् सङ्कर्षणो जीवो नाम आसीन् । सोऽकामयत ; प्रजाः सृजेयेति । ततः प्रद्युम्नसंज्ञं मन आसीत् । तस्मादहङ्कारणमनिरुद्धः । ततो हिरण्यगर्भोऽजायत । + + तस्माच्छेषादेव सर्वाणि समुत्पद्यन्ते ॥

End :

तदेतद्विवाधीयानो रात्रिकृतं पापं नाशयति । + + + + तदेतदुपनिषद्वां रहस्यम् । तदेतदधीयानस्सर्वक्रतुफलं लभते ; शान्तिमेति ; मनश्शुद्धिमेति ; सर्वतीर्थफलं लभते । य एवं वेदेत्युपनिषत् ॥

Colophon :

इति वासुदेवोपनिषत् समाप्ता ॥

462

Sl. No. 2189 वासुदेवोपनिषत् **Ms. No. C. 461/55**

Begi ning :

ऊर्ध्वपुण्ड्रधारणविधिः— भद्रं कर्णेभिः + + शान्तिः ॥

अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच— अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं द्रव्यमन्त्रस्थानसहितं मे ब्रूहीति । तगँ होवाच + + वासुदेवः— + + विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तम् गोपीभिः प्रक्षालनात् गोपीचन्दनमाख्यातम् ॥

End :

दण्डाकारे ललाटे तु पद्माकारं तु वक्षसि ।
वेणुपत्राकृतिर्बाह्वोरन्ये दीपाकृति न्यसेत् ॥

Colophon :

इति वासुदेवोपनिषत् समाप्ता ॥

463

Sl. No. 2193 वासुदेवोपनिषद्भाष्यम् **Ms. No. B 247/17**

Beginning :

ऊर्ध्वपुण्ड्रविधिर्यस्यां प्राधान्येन प्रदर्श्यते ।
वासुदेवोपनिषदं व्याख्यास्ये तामिमां शुभाम् ॥

इह ब्राह्मणेषु केचित्स्मार्ताः गोपीचन्दनोर्ध्वपुण्ड्रमचक्रसंयुक्तं दधते । अन्ये तु माध्वाः चक्रसंयुक्तं दधते । अनयोऽस्तु द्वितीयस्यैवानुष्ठानस्य श्रुतिप्रामाण्यं दृश्यते ॥

End:

ननु ब्रह्मरन्ध्रादिषु स्थानेषु गोपीचन्दनमालिप्य + + परमात्मनो ध्येयत्वमभिहितम् ; + + बाहुमूलादिषु + + न परमात्मावस्थानं + + उच्यते ; अतस्तत्र गोपी-चन्दनालेपनमावश्यकमिति चेन्न ; + + + बाह्वादिष्ववयवेषु सगुणदेवतानां विद्यमानत्व-प्रसिद्धेः । तत्तद्देवताप्रसादसिध्यर्थकतत्तद्ध्यानकर्मणा तत्तत्स्थानगोपीचन्दनधारणपूर्वकत्वमावश्यक-मित्यवगन्तव्यम् ॥

Colophon :

इति वासुदेवोपनिषद्भाष्यं समाप्तम् ॥

464

Sl. No. 2196 **विश्राम्योपनिषत्** Ms. No. C. 3780/8

Beginning :

ओं पूर्वदले श्वेतवर्णं यथा विश्राम्यते नरः ।
तदा धैर्यमुदारं च मन्दबुद्धिर्मतिर्भवेत् ॥
ओं आग्नेयदले रक्तवर्णं यदा विश्राम्यते नरः ।
तदा निद्रालस्यं च मन्दबुद्धिर्मतिर्भवेत ॥

End: :

ओं मध्यमदले स्फटिकवर्णं यदा विश्राम्यते नरः ।
तदा सर्वगुणज्ञानं चैतन्यं च मतिर्भवेत् ॥
यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ।
यः पठेच्च सदा भक्त्या स याति परमां गतिम् ॥

Colophon :

इति श्रीविश्राम्योपनिषत्समाप्ता ॥

465

Sl. No. 2197 **वीरतापिन्युपनिषत्** Ms. No. P. 5795/4

Beginning :

वीरतापिनीद्वाविंशत्यनुवाकप्रारम्भः— अथ हैनां ब्रह्मरन्ध्रे स्फुरन्तीं यशसा द्वाविंशत्यक्षरीं वर्गाद्यमेलनरूपां सेन्दुवह्निरितिप्रियामकारीं ब्रह्मरूपां तत्रयं प्रबोधयन्तीं + + तद्वेत्ता वाक्-पटुर्भवति ; + + स्वच्छन्दं सर्वशक्तिरीश्वरो भवति ॥

End :

तं पुरुषमनुसरन्त्यङ्गना + + धनं बहुपुत्रं पार्वति स्वयं वै रुद्रोग्रतेजो ब्रह्मवर्चसीरता-नन्देन रिपून् कालगृह्यं नयति जीवन्मुक्तः चिरं प्रतिजन्म साधुर्भक्तो भवत्यलं निधीशो विद्वान् ब्रह्मवर्चसीत्युपनिषत् । य एवं वेद ॥ ३२ ॥

Colophon:

इति श्यामानुवाकश्रीद्वाविंशत्यक्षर्यां द्वाविंशत् । इति श्रीवीरतापिन्यां श्यामानुवाकः सम्पूर्णः ॥

466

Sl. No. 2198 **वृद्धजाबालोपनिषत्** **Ms. No. B. 915/5**

Beginning :

स पुनस्तं होवाच– कानि षट्त्रिंशत्तत्त्वानीति । स तस्मा आह– शिवशक्तिसदाशिव-ईश्वरशुद्धविद्यैतानि शुद्धानि पञ्च तत्त्वानि । माया कालो नियतिकलाविद्यारागाः पुरुष इति शुद्धाशुद्धानि सप्त तत्त्वानि । ततः प्रकृतिः प्रकृतेर्गुणत्रयं, गुणत्रयान्नामरूपक्रियास्पन्दाः, परस्परभिन्ना धरण्यादीनि षट् तत्त्वानि ॥

End :

य एनां वृद्धजाबालोनिं(?) पदमर्चयति स सर्वदेवार्चको भवति; स शिवार्चको भवति ; स सर्वपापविनिर्मुक्तो भवति ; शिवस्वरूपमेति ; शिवस्वरूपमेतीति ॥ भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

इति वृद्धजाबालोपनिषत् समाप्ता ॥

467

Sl. No. 2199 **वेदान्तसारोपनिषत्** **Ms. No. P. 7635/7**

Beginning :

ओं शं नो मित्रः शं वरुणः । + + अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच– विमुक्तं सद्योमुक्तिकरं ब्रूहीति । स होवाच याज्ञवल्क्यः– परमेष्ठी शिवोऽद्वैत-श्चतुर्थः शान्तस्स एव ध्येयः ; स एव पूज्यः ॥

End :

वेदान्तसारसर्वस्वं यो जानाति स ईश्वरः ।
....व्याचरति सर्वेशः साम्बमूर्तिस्सनातनः ॥

इत्यों सत्यमित्युपनिषत् । शं नो मित्रः शं + + शान्तिः शान्तिः शान्तिः ॥

Colophon :

— — — — — —

468

Sl. No. 2205 **शाठ्यायनीयोपनिषत्** Ms. No. P. 3581/37

Beginning :

पूर्णमद इति शान्तिः ॥

स वा इदमग्रे समासीन्नेव सदासीदिव इदमग्रे नेवासीत्तद्धत्तेन्मनस(?) एवासः ॥ १ ॥

तस्मादेतदृषिणाभ्युक्तं नासदासीत्तदासीत्तदानिमीति नेव हि सन्मानो नेवासत् (?) ॥ २ ॥

End :

एतं बहुवैश्वानरं वेदापपुनर्मृत्युं जयति सर्वमायुरेत्यात्मा त्वेष वैश्वानरस्यात्मा त्वाहास्यद्यदि हा नागमिष्य इति आत्मा ते विदितो भविष्यद्यदि नागमिष्य इति वा × × × × × × × × × × × × × × अथ होवाच बुद्धि अमाक्तराश्च वैय्याप्रपद्यकं त्वं वैश्वानरं वेद्धेति वायमेव (?) × × ×

Colophon :

— — — — —

469

Sl. No. 2206 **शाठ्यायनीयोपनिषत्** Ms. No. B. 247/51

Beginning :

ओं पूर्णमद इति शान्तिः ॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥

\+ \+ \+

अथ ह यत्परं ब्रह्म सनातनं श्रोत्रिया + + अधीयुः ।
शान्तो दान्त उपरतस्तितिक्षुः योऽनूचानो ह्यभिज्ञः समानः ।
त्यक्तैषणो ह्यनृणस्तं विदित्वा मौनी वसेदाश्रमे यत्र कुत्र ।।

End :

तदेतदृचाभ्युक्तम्–

\+ \+ \+ \+

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
स ब्रह्मवित्परं प्रेयादिति वेदानुशासनम् ।।

Colophon :

इति शाट्यायनीयोपनिषत् समाप्ता ।।

470

Sl. No. 2210 शाट्यायनीयोपनिषद्भाष्यम् Ms. No. B. 247/51

Beginning :

यस्यां त्रिदण्डसन्यासः प्रोच्यते मोक्षसाधनम् ।
शाट्यायनीयोपनिषत्सेयं व्याख्यास्यतेऽधुना ।।

अत्र खलु अत्राश्रमं चरमं संप्रविश्येत्युक्ते त्रिदण्डादिपञ्चमात्रभरणं यावदायुषं विधीयते ।।

End:

यस्येति । यस्य प्राक् गुरूपसरणाद्देवे सगुणेश्वरे परा भक्तिर्यथास्ति गुरौ भवेद्यदि स सप्रतियोगिकब्रह्मापरोक्षज्ञानी प्रारब्धक्षये परं निष्प्रतियोगिकं ब्रह्म प्रेयात् ; ब्रह्मविदाप्नोति परमिति श्रुत्यन्तरात् ।।

Colophon :

इत्यप्पयदीक्षिताचार्यकृतिषु शाट्यायनीयोपनिषद्भाष्यं समाप्तम् ।।

471

Sl. No. 2213 **शाण्डिल्योपनिषत्** Ms. No. P. 4136/2

Beginning :

भद्रं कर्णेभिरिति शान्तिः । शाण्डिल्यो ह वा अथर्वाणं पप्रच्छ– आत्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति । स होवाच अथर्वा– यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि । तत्र दश यमाः । + + + द्विप्रकारं ध्यानम् । समाधिस्त्वेकरूपः ॥

End :

अथ कस्मादुच्यते महेश्वर इति । यस्मान्महत ईशशब्दध्वन्या चात्मशक्त्या तस्मादुच्यते महेश्वर इति । + + + । स ब्रह्मविद्भवति ॥

एवं यस्सततं ध्यायेत् देवदेवं सनातनम् ।
स मुक्तस्सर्वपापेभ्यो निश्रेयसमवाप्नुयात् ॥

इत्यों सत्यमित्युपनिषत् । भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

तृतीयोऽध्यायः । इति शाण्डिल्योपनिषत् समाप्ता ॥

472

Sl. No. 2218 **शाण्डिल्योपनिषद्भाष्यम्** Ms. No. B. 247/19

Beginning :

अष्टाङ्गयोगो यत्रोक्तः सद्यो मुक्त्यैकसाधनम् ।
शाण्डिल्योपनिषत्त्वेषा मुक्त्यै व्याख्यास्यतेऽधुना ॥

अत्र यमादीनां सप्ताङ्गानां तत्तद्भेदसङ्ख्यावचनानीव समाधेरप्यष्टमस्याङ्गस्य तद्भेदसङ्ख्यावचनं विना समाधिस्त्वेकरूप इति यदुक्तं तन्न युक्तम् । + + अत उच्यते– समाधेः षड्विधत्वे + निर्विकल्पकसमाधेरेकरूपताया एव सर्वत्र सद्भावात् + + + न दोषः ॥

End :

अथ यो ह वै विद्वैनं परमुपास्ते सोऽहमिति स ब्रह्मविद्भवतीति निष्कळब्रह्मज्ञानोदयानन्तरं तदुपास्तेरवधारितत्वादिति सर्वं समञ्जसमवगन्तव्यम् ॥

Colophon:

इति शाण्डिल्योपनिषद्भाष्यं समाप्तम् ॥

473

Sl. No. 2222 शारीरोपनिषत् Ms. No. P. 1682/7

Beginning :

अथातः पृथिव्यादिभूतानां समवायं शरीरं यत् कठिनं सा पृथिवी ; यद्द्रवं तदापः ; यदुष्णं तत्तेजः ; यत्स × × × स वायुः ; यत्सुषिरं तदाकाशं ; श्रोत्रादीनि ज्ञानेन्द्रियाणि + + पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाः ॥

End :

शब्दस्पर्शं च रूपं च रसोगन्धस्तथैव च ।
त्रयोविंशतिरेतानि तत्त्वानि प्राकृतानि तु ॥
चतुर्विंशति × × × × × × पुरुषः परः ॥

Colophon :

इति शारीरोपनिषत समाप्ता ॥

474

Sl. No. 2236 शारीरकोपनिषद्भाष्यम् MS. No. B. 247/23

Beginning :

यस्यां शरीरतत्त्वानि प्रोच्यन्ते सङ्ग्रहेण वै ।
शारीरकोपनिषदं व्याख्यास्ये तामिमामिह ॥

ननु + + अन्तःकरणचतुष्टयमत्रोक्तम् ; अन्यत्र त्वन्तःकरणेन पञ्चाभिधीयन्ते ; + इति चेदत्रोच्यते— बाढमेतत् ॥

End :

क्षेत्रज्ञं– जीवात्मानं मां– अस्मत्प्रत्ययगोचरपरमात्माभिन्नं विद्धीत्यनन्तरविशेषणत्वेन प्रागवस्थायां जीवत्वं क्षेत्रज्ञशब्देन सिद्धमित्यवगन्तव्यम् ॥

Colophon :

इति शारीरकोपनिषद्भाष्यं समाप्तम् ॥

475

Sl. No. 2240 **शिवतत्त्वोपनिषत्** Ms. No. P. 114/6

Beginning :

ब्रह्मावर्ते महाभाण्डीरवटमूले महासत्राय समेता महर्षयः शौनकादयस्ते समेता यज्ञत्वदीक्षासवो (?) मार्कण्डेयं चिरजीविनमुपेत्य पप्रच्छुः– केन त्वं चिरजीव्यसि ? + + स होवाच– परमशिततत्त्वज्ञानम् ॥

End :

य इमां परमरहस्यशिवतत्वविद्याभूतामधीते स सर्वपापेभ्यो मुक्तो भवति ; कैवल्यमनुभवति; कैवल्यमनुभवति ॥

Colophon :

इत्यथर्वणवेदे कावजेयशाखायां परमरहस्यशिवतत्वोपनिषत् समाप्ता ॥

476

Sl. No. 224 **शिवसङ्कल्पोपनिषत्** Ms. No. P.4146/64

Beginning :

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येत यज्ञस्तायते सप्तहोता तन्मे मनश्शिवसङ्कल्पमस्तु ॥
येन कर्माणि पूर्वे मनीषिणः यज्ञे कृण्वन्ति विदधे सुधीराः ।
यदपूर्वं क्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥

End :

गन्धद्वारां + श्रियं तन्मे मनः + स्तु ।
यो रुद्रो अग्नौ + विवेश तन्मे + स्तु ॥
य इदं शिवसङ्कल्पं सदा ध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनश्शिवसंकल्पमस्तु ॥

Colophon :

— — —

477

Sl. No. 2248 शुकरहस्योपनिषत् Ms. No. C. 2542/23

Beginning :

ओं सह नाववत्विति शान्तिः ॥ ओं, अथातो रहस्योपनिषदं व्याख्यास्यामो देवर्षयो ब्रह्माणं सम्पूज्य प्रणिपत्य पप्रच्छुः— भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति । सोऽब्रवीत्—

साधु साधु महाप्राज्ञ शुक ज्ञाननिधे मुने ।
रहस्योपनिषन्नाम्ना सषडङ्गमिहोच्यते ॥

End :

यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ।
सर्वपापविनिर्मुक्तः साक्षात्कैवल्यमश्नुते ॥

साक्षात्कैवल्यमश्नुत इत्युपनिषत् । सह नाववत्विति शान्तिः ॥

Colophon :

इति शुकरहस्योपनिषत्समाप्ता ॥

478

Sl. No. 2249 श्रीचक्रोद्धाररहस्योपनिषत् Ms. No. B. 677

Beginning :

भद्रं कर्णेभिः + + दधातु । सह नाववतु + + शान्तिः । सर्वकारण भूता शक्तिः ॥ १ ॥ तेन नवरन्ध्ररूपो देहः ॥ २ ॥ नवशक्तिरूपं श्रीचक्रम् ॥ ३ ॥ वाराहीपितरूपम् ॥ ४ ॥ कुरुकुल्ला वरदेवता माता ॥ ५ ॥

End :

एतत्तु शिवयोगिनाऽऽराध्यते ॥ ६३ ॥ कादितोऽग्नेर्भाविना प्रतिपद्यतेत्युपनिषत् ॥ ६४ ॥
सह नाववतु + इति शान्तिः शान्तिः शान्तिः ॥

Colophon :

— — — —

479

Sl. No. 2250 **श्रीविद्योपनिषत्** Mss. No. P. 5795/5

Beginning :

ॐ भद्रं कर्णेभिः + दधातु ॥

ओं मनुं चन्द्र-कुबेरश्च लोपामुद्रा च मन्मथम् ।
अगस्त्यं नन्दिकेशश्च सूर्यो विष्णुश्च षण्मुखः ॥
शिवो दूर्वासकं चैव प्रस्तारः परिकीर्तितः ।
अष्टादशमहाविद्योपासकास्ते प्रकीर्तिताः ॥

End :

इमां नूतनायां प्रतिमायां जप्त्वा देवता सान्निध्यं भवति ; प्राणप्रतिष्ठायां जप्त्वा प्राणान् प्रतिष्ठापयति ; भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति । य एवं वेदेत्युपनिषत् । भद्रं कर्णेभिरिति शान्तिः ॥

Colophon :

— — —

480

Sl. No. 2251 **श्रीविद्योत्तरतापनीयोपनिषत्** Ms.No. A 2502/5

Beginning :

अथ श्रीविद्या × × राम्नायमुपनि × × ते । ब्रह्मचारिणे शान्ताय गुरुभक्ताय यथा × × द्या मनुः कस्मिन् उद्भवस्त्वत्स्वरूपं ब्रूहीति । स होवाच ह शृणु सोम्य– ब्रह्मवाचकस्तु प्रणवो वर्तते ॥

End :

तस्मात् मन्त्रोप + + ताः शक्तयो घटः कलशः कुम्भः इत्येकार्थवाचकाः इव मन्त्रो देवा + + + रित्येका + + च च + + स्त्वेकवारमन्त्रादित + + धानेति बुध्वा पुरुषार्थवान् भवेदिति मदीय + + डः ॥

Colophon :

— — — — —

481

Sl. No. 2252 **श्रीविद्योत्तरतापनीयोपनिषत्** **Ms. No. C. 3424/23**

Beginning :

हरिः ॐ अथ श्रीविद्यामनोः आम्नायस्वरूपं उपदिश्यते— ब्रह्मचारिणे शान्ताय गुरुभक्ताय यथा विद्यामनुः कस्मिन्नुद्भवः तत्स्वरूपं ब्रूहीति होवाच। शृणु सौम्य— ब्रह्मोवाच— कस्तु प्रणवो वर्तते स पुरा प्रपञ्चाधिष्ठानविद्यासहितत्रिमात्रोपहितः ॥

End .

अतस्तस्मात् मन्त्रोपहिताः शक्तयः घटः कलश इति एकार्थवाचकाः। इह मन्त्रो देवता गुरुश्चात्र एकार्थवाचकास्त्वेतासां मन्त्राणां तथाविधानि बुध्वा पुरुषार्थवान् भवेत्। य एवं वेद इत्युपनिषत् ॥

Colophon :

इत्युत्तरतापनीये तृतीयः खण्डः ॥ ३ ॥ समाप्तेयं त्रिपुरातापनीयोपनिषत् ॥

482

Sl. No. 2253 **श्रुतिरहस्योपनिषत्** **Ms. No. P. 7635/13**

Beginning :

ॐ अथ हैनं हिरण्यगर्भं नारदः परिसमेत्योवाच— अधीहि भगवन् मह्यं ; कः पूज्योय-मुपासन्ते श्रुतय इति। तं होवाच भगवान् हिरण्यगर्भः—

यदा तमस्तन्न दिवा न रात्रिः न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी ॥

End :

यः शतसहस्रगायत्रीरुद्रीयमधीते (?) + + ब्रह्महत्यादिपरिमुक्तो भवति स सर्वदा सर्वसेव्यो भवति।

अनेन ज्ञानमाप्नोति दुःखसंसारनाशनम् ।
तस्मादेवं विदित्वैवं शिवमायान्ति साम्प्रतम् ॥

शिवमाप्नोति साम्प्रतमिति । ओं सत्यमित्युपनिषत् ॥

Colophon:

श्रुतिरहस्योपनिषत्समाप्ता ॥

483

Sl. No. 2256 श्वेतमृत्स्नोपनिषत् Ms. No. B. 123/4

Beginning :

अथ प्रणिपत्य नारदो ब्रह्माणमन्वयुङ्क्त अधीहि भगवो मे किं पवित्राणां पवित्रं ? केन वा कर्माणि सफलानि ? दुश्चरं तपो मर्त्यानां केन सुकरेणामृतत्वमिति । स होवाच– + + शृणु भो पवित्रं + यद्विष्णुक्षेत्रं तत्र मृत्स्नां श्वेतामुद्धृताऽसीत्युद्धरेत् ॥

End :

अयमूर्ध्वपुंड्रविधिः । एवं विदित्वा यो धारयति स वैदिको भवति; स सर्वकर्मार्हो भवति; एतेन तेजस्वी वर्चस्वी ब्रह्मवर्चस्वी भवति; कायकात्पातकात्पूतो भवति; स विष्णुसायुज्य-माप्नोति; एवं वेदेत्युपनिषत् ॥

Colophon :

इति श्वेतमृत्स्नोपनिषत् ॥

484

Sl. No. 2257 श्वेताश्वतरोपनिषत् Ms. No. P. 1973/4

Beginning :

× × × × × दन्ति–

किं कारणं ब्रह्म कुतस्स्म जाता जीवाम केन क च सम्प्रतिष्ठाः ।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥

End:

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

Colophon:

इति श्वेताश्वतरोपनिषदि षष्ठोऽध्यायः । समाप्ता चोपनिषत् ॥

485

Sl. No. 2256 श्वेताश्वतरोपनिषद्भाष्यम् Ms. No. P. 3474/2

Beginning :

ब्रह्मवादिनो वदन्तीत्यादिः श्वेताश्वतराणां मन्त्रोपनिषत्। तस्या अल्पग्रन्था वृत्तिरारभ्यते– ब्रह्मवादिनः– ब्रह्मवादनशीलाः सर्वे सम्भूय वदन्ति– किं कारणम् + इति ॥

End :

अमृतस्य– अमृतत्वस्य, मोक्षस्य प्राप्तये सेतुरिव सेतुः संसारमहोदधेस्तारणोपायत्वात् तं अमृतस्य परं सेतुं दग्धेन्धन × × × तमेव विदित्वा मुच्यते नान्येनेति । तत्राह– यथा चर्मवदाकाशं– यथा चर्म संकोचयिष्यति + + तेनेत्यादिलक्षणं अशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनाऽवस्थितं + पूर्णानन्दो भवतीत्यर्थः । + ज्ञाननिर्धूतकल्मषा इति ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादप्रणीते श्वेताश्वतरोपनिषद्भाष्ये षष्ठोऽध्यायः ॥

486

Sl. No. 2278 श्वेताश्वतरोपनिषद्भाष्यम् Ms No. A. 166/8

Beginning :

यत्र कारणसद्ब्रह्मसम्यग्दर्शनमुच्यते ।
श्वेताश्वतरसंज्ञायाः श्रुतेः भाष्यं विरच्यते ॥

ब्रह्मवादिन इति । निर्गुणब्रह्मवदनशीलाः परमर्षयो वदन्ति– अन्योन्यभाषणात्मकं मननरूपं वादं कुर्वन्तीत्यर्थः ॥

End :

यदुक्तं पापेषु प्रक्षीणेष्वित्यादि तत्प्रत्युच्यते— न हि कस्य चिदपि पापक्षये सति ब्रह्मात्मैक्यापरोक्षज्ञानं भवितुमर्हति ; परोक्षज्ञानमात्रोदयाभ्युपगमात् । तदपि सामान्यमेव + + + आचार्यवान् पुरुषो वेदेति श्रुत्यन्तरञ्च भवति । तस्मात् अलमतिप्रसङ्गेन ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ श्वेताश्वतरोपनिषद्भाष्यं समाप्तम् ॥

487

Sl, No. 2280 श्वेताश्वतरोपनिषद्व्याख्या (दीपिका) Ms. No. P. 8633

Beginning :

हरिपादाम्बुजध्याननिर्मलीकृतचेतसा ।
वाधूलवरदाचार्यकृपालब्धोपलब्धिना ॥ १ ॥
श्रीमन्नारायणाख्येन श्रीवत्सकुलजन्मना ।
श्वेताश्वतरमन्त्रोपनिषदर्थः प्रकाश्यते ॥ २ ॥

एषा चोपनिषत् सर्वब्रह्मविद्योपकारिणी तत्तद्विद्योक्तधर्माणां सर्वेषां मन्त्रदर्शनात् अतः प्रथमं जगज्जन्मादिकारणविषयिणीं केषाञ्चिद्ब्रह्म × × × जिज्ञासामुपक्षि × × × वादिनो वदन्तीति आपातप्रतिपन्नवेदान्तार्थाः परस्परं मीमांसन्त इत्यर्थः ॥

End :

शेषं स्पष्टम् । उपदिष्टार्थविशदीकरणे हेत्वन्तरं दर्शयति— यस्य देव इत्यादिना । प्रकाशन्ते महात्मन इति । भक्तिभेदेन वाक्यार्थो निर्धार्यः । यथा देवे— देवसदृशे गुरावित्यर्थः । देवमिवाचार्यमुपासीतेति श्रुत्यन्तरात् । द्विरुक्तिरुपनिषत्समाप्तिं द्योतयति ॥

Colophon :

इति श्रीहस्तिगिरिनाथात्मजस्य श्रीमन्नारायणस्य कृतिषु श्वेताश्वतरमन्त्रोपनिषद्विवरणे षष्ठोऽध्यायः ॥

488

Sl. No. 2282 श्वेताश्वतरोपनिषद्विवरणम् Ms. No. P. 320/1

Beginning :

अथ भेदत्रयातीतनिर्मलज्ञानमूर्तये ।

मनोगिरां विदूराय दक्षिणामूर्तये नमः ॥ + + +

ब्रह्मवादिनो वदन्ति इतीदं × × × × वदनशीलाः विद्योत्पत्तेरूर्ध्वं असम्भावनाविपरीतभावनोत्पादका विघ्नाः परिह्रियन्ते + + + परम्परया वा सर्ववेदार्थत्वेन ब्रह्म वदन्तीत्येतत् सर्वे वेदा यत्पदमामनन्ति इति श्रुतेः ॥

End :

अस्यामुपनिषदि भगवता– श्वेताश्वतरेण, कथिताः– उपदिष्टाः, हि– यस्मात्, अर्थाः प्रकाशन्ते– यथावत्प्रकाशन्ते + + तस्माद्विद्यार्थिभिः देवतागुरुविषयनिरुपाधिका भक्तिः कर्तव्येत्यभिप्रायः । द्विर्वचनं अध्यायपरिसमाप्तिद्योतनार्थमादरार्थं च ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्ज्ञानोत्तमपूज्यपादशिष्यश्रीमद्भगवद्विज्ञानात्मकृतौ श्वेताश्वतरोपनिषद्विवरणे षष्ठोऽध्यायः । विवरणं समाप्तम् ॥

489

Sl. No. 2284 सन्ध्योपनिषत् Ms. No. P. 3581/13

Beginning :

सह नाववत्विति शान्तिः ॥

अच्युतोऽस्मि महादेव तव कारुण्यलेशतः ।
विज्ञानघन एवास्मि शिवोऽस्मि किमतः परम् ॥
न निः × तद्भाति अन्तःकरणजृम्भणात् ।
अन्तःकरणनाशेन संविन्मात्रस्थितो हरिः ॥

End :

विरञ्चिनारायणशङ्करात्मकं नृसिंह देवेश तव प्रसादतः ।
अचिन्त्यमव्यक्तमनन्तमव्ययं वेदात्मकं ब्रह्म निजं विजानते ॥

तद्विष्णोः परमं पदगूँ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवाँसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥

Colophon :

सन्ध्योपनिषत्समाप्ता ॥

490

Sl. No. 2285 **सन्यासोपनिषत्** Ms. No. P. 3581/20

Beginning :

ओं योऽनुक्रमेण सन्यस्यति– सन्यस्तो भवति कोऽयं सन्यास उच्यते । कथं न न्यस्तो भवति । य आत्मानं क्रियाभिर्गुप्तं करोति ॥

End :

नदीपुलिनशायी स्यात् देवागारेषु वा स्वपेत् ।
नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत् ॥
स्तूयमानो न तुष्येत निन्दितो न शपेत्परान् ।
एवं वृत्तिमुपासन्तो घातयन्तीन्द्रियाणि यत् ॥ ६ ॥

Colophon :

इति श्रीकण्ठश्रुतिस्समाप्ता ॥

491

Sl. No. 2286 **संन्यासोपनिषत्** Ms. No. P- 4136/9

Beginning

आप्यायन्त्विति शान्तिः । अथातः संन्यासोपनिषदं व्याख्यास्यामः– योऽनुक्रमेण संन्यस्यति स संन्यस्तो भवति । कोऽयं सन्यासः:? उच्यते । कथं संन्यस्तो भवति ? य आत्मानं क्रियाभिर्गुप्तं करोति ; मातरं पितरं भार्यां पुत्रान् बन्धून् अनुमोदयित्वा ये चास्य- र्त्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरेष्टिं निर्वपेत् ॥

End :

नापृष्टः कस्य चित् ब्रूयात् न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥

सर्वेषामेव पापानां संघाते समुपस्थिते ।
तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत् ॥
यस्तु द्वादशसाहस्रं प्रणवं जपतेऽन्वहम् ।
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥

इत्युपनिषत् । आप्यायन्त्विति शान्तिः ॥

Colophon :

सन्यासोपनिषत् समाप्ता ॥

492

Sl. No. 2291 सन्यासोपनिषद्भाष्यम् Mss. No. B. 247/26

Beginning :

सन्यासधर्माः प्रोच्यन्ते विस्तरेणैव यत्र सा ।
इयं व्याख्यास्यते साक्षात् सन्यासोपनिषत्सती ॥

अत्रादौ मात्रादीन् बन्धून् अनुमोदयित्वेत्युच्यते ; नैतद्युक्तम् ; कथञ्चिदपि तेषां बन्धूनां सन्यासस्वीकारे सम्मत्यसम्भवात् । + अत्रोच्यते–

भावनामात्रं प्राणादिसमारोपणमवगन्तव्यम् ; अन्यथोक्तदोषप्रसङ्गात् । मात्रादिबन्धूनां च तत्तदभीष्टप्रदानैः सम्मतिः स्यादेव ॥

End :

ननु यतिराविकं पटं प्रतिगृह्य पतनीत्युक्तम् ; + + यतीनां वस्त्रधारणस्य विहितत्वात् । + + अत्रोच्यते– याचमानो व्रजेदथ इत्युक्त्यनुरोधेन याचनापूर्वकस्य वस्त्रपरिग्रहस्यैव प्रतिषिद्धत्वात् । + + मार्जारस्य कुड्योपरि स्थितिरिव वैराग्यानुष्ठानस्य दुर्बलत्वसम्भवात् ; कृतकृत्यत्वात्तस्य तदनवद्यम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यस्य कृतौ सन्यासोपनिषद्भाष्यं समाप्तम् ॥

493

Sl. No. 2294 **संहितोपनिषत्** Ms. No. P. 53/4

Beginning :

हरिः ओम् । अथातः संहितोपनिषदो व्याख्यास्यामः– सर्वं परोक्षादेव संहिता भवति; परोक्षप्रत्यक्ष ऋषिसंहिता भवति ; यथाधीमहे– स्वर्ग्या देवसंहिता भवति; स्वर्ग्यं लोकं गच्छति; यस्तथाधीते ।

End :

स खलु त एतं प्रजापतिर्वा इदमेकमन्नमक्षितायुः पुरुषो वाचमीश्वरोभिजायते ; अनाकाशीकरणं च चतुर ऋचो भवति । य एवं वेद ; य एवं वेद ॥

Colophon :

संहितोपनिषत्समाप्ता ॥

494

Sl. No. 2300 **सरस्वतीरहस्योपनिषत्** Ms. No. A. 167/37

Beginning :

ओं सहनाववत्विति शान्तिः ॥

ऋषयो ह वै भगवन्तस्तमाश्वलायनं सम्पूज्य पप्रच्छुः–

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।
यदुपासनया तत्त्वं जानासि भगवन्वद ॥
सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया ।
स्तुत्वा जप्त्वा परां सिद्धिमलभन्मुनिपुङ्गवाः ॥

ऋषय ऊचुः–

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भगवती वद ॥

आश्वलायनः– अस्य श्रीसरस्वतीदशश्लोकीमहामन्त्रस्य आश्वलायनो ऋषिः ; श्रीवागीश्वरी देवता ॥

End :

देहाभिमाने गळिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥
भिद्यते हृदयग्रन्थिः + । + दृष्टे परावरे ॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥

इत्युपनिषत् ॥

Colophon :

सरस्वतीरहस्योपनिषत् समाप्ता ॥

495

Sl. No. 2305 सरस्वतीरहस्योपनिषद्भाष्यम् Ms. No. A. 167/38

Beginning :

यामाचार्यमुखादधीत्य पुरुषस्सद्योविमुक्तो भवे-
यस्यां सर्वरहस्यमस्ति सकलान्मायान्तसिद्धं महत् ।
यस्यां षट् च समाधयो निगदितास्तत्त्वानि मन्त्राः परे
व्याख्यास्ये कुतुकेन तामिह सरस्वत्या रहस्यं श्रुतिं ॥

\+ + + + +

ऋषय इति । अरण्यवासिनो ब्रह्मर्षयः कदाचिदाश्वलायनं सम्पूज्य पृष्टवन्तः । कथ-मिति तदाह– केनेति ॥

End :

अस्यां सरस्वतीरहस्योपनिषदि परमरहस्यार्थानामभिहितत्वात् बुद्धिमानत्रैव पुनः पुनः परिचयं कुर्यादिति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतानपादशिष्याप्पयदीक्षिताचार्यकृतौ सरस्वतीरहस्योपनिषद्भाष्यं समाप्तम् ॥

496

Sl. No. 2307 **सर्वसारोपनिषत्** Ms. No. P. 1573/26

Beginning :

कथं बन्धः कथं मोक्षः का विद्या का वाऽविद्येति । जाग्रत्स्वप्नसुषुप्तितुरीयञ्च कथम् । अन्नमयः प्राणमयो मनोमयः विज्ञानमयः आनन्दमयः कोशः कथम् । + + अनात्मनो देहादीनात्मत्वेन यदाभिन्यते तदात्मनो बन्धः ॥

End :

माया नामानादिरनन्तवती प्रमाणाप्रमाणसाधारणा न सती नासती न सदसती स्वयमधिका विचाररहिता निरूप्यमाणा सती लक्षणशून्या सा मायेत्युच्यते ॥

Colophon :

इति सर्वसारोपनिषत् ॥

497

Sl. No. 2318 **सर्वसारोपनिषद्भाष्यम्** Ms. No. A. 167/2

Beginning :

नत्वा श्रीसद्गुरुं शान्तं पठित्वा सह नाविति ।
सर्वसारोपनिषदं व्याख्यास्ये सङ्ग्रहादहम् ॥

इह खलु अष्टोत्तरशतसंज्ञासु षट्सप्ततिसङ्ख्यासूपनिषत्सु प्राथमिकां सर्वसाराख्यामुपनिषदं व्याख्यातुं प्रयत्यते— कथमिति । कथं बन्धः दुःखनिमितसंसारबन्धः कीदृशः ?

End :

मोक्षस्य सप्रतियोगिकत्वज्ञात्मकस्य अकर्त्रात्मकत्वेऽपि कर्त्रात्मविषयकबन्धनिवृत्तिसमकालं कतकरेणोरिव निवृत्तिसम्भवान्मोक्षातीतावस्थागतनिष्प्रतियोगिकारूपब्रह्मपर्यवसन्ना एव वेदान्ताः । अपि तु मुमुक्षुभिस्सप्रतियोगिकमेव वेद्यमिति ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतौ सर्वसारोपनिषद्भाष्यं समाप्तम् ॥

498

Sl. No. 2320 **सांख्यायनीयोपनिषत्** Ms No. P. 3581/2

Beginning :

अथ हैनं महानात्मा स तल्लक्षणतत्परं ब्रह्म सत्यं तत् सलिलं तदस्पर्शं तदरूपं तदरसं तदगन्धं + + + एष महानात्मा त्रिविधो भवति सत्वं रजस्तम इति ; सत्वं तु मध्ये विशुद्धं तिष्ठत्यभितो रजस्तमसो रज इति ; कामद्वेषौ तम इत्यवद्या ॥

End :

यत्र हि द्वैतमिव भवति + + तत्केन कं बिजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयादिति— विरजः पर आकाशादज आत्मा महान् ह मे (?) धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायन् बहून् शब्दान् वाचो विग्लापनं तदिति ॥

Colophon :

साङ्ख्यायनीयोपनिषदि पञ्चमोऽध्यायः । साङ्ख्यायनीयोपनिषत् समाप्ता ॥

499

Sl. No. 2321 **सामवेदरहस्योपनिषत्** Ms. No. C. 2084

Beginning :

एकदा ब्रह्मणः पुत्राः सनकादयः तत्वविवक्षया पितामहं पप्रच्छुः— प्रणिपातपुरस्सरं अहो पिता निरन्तरं वैकुण्ठनाथलीलां ध्यायमानां निरन्तरं चिदानन्देन सह सम्प्रोक्षं (?) वदसि यदि रुचिरापद्यतः (?) ॥

End :

यं मण्डलं उपास्यमानोऽश्रूयमाणोऽध्यायमानो + + + स्वेष्टं हृदि ध्यात्वा तद्भावेन प्रलीयते। अहो लक्ष्मीः इमं मार्गं समाश्रिता भक्ताः शरीरसोपाधिधर्माः तद्गुणतां प्राप्यन्ते। इति सामगा निरन्तरं रहसि सङ्गीयमाना भवन्ति (?)॥

Colophon :

समाप्तैवैतत् सामवेदरहस्योपनिषत् ॥

500

Sl. No. 2224 **सावित्र्युपनिषत्** Ms. No. B. 507/1

Beginning :

सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् ।
त्रिपुरातपनं देवीत्रिपुराकरभावना ॥

ओं आप्यायन्त्विति शान्तिः । ओं कस्सविता ? का सावित्री ? अग्निरेव सविता । पृथिवी सावित्री । स यत्राग्निस्तत्पृथिवी ; ते द्वे योनिस्तदेकं मिथुनम् ॥

End :

ॐ ह्रीं बले महादेवि ह्रीं महाबले क्लीं चतुर्विधपुरुषार्थसिद्धिप्रदे तत्सवितुर्वरदात्मिके + + धियो यो नो जाते प्रचुर्यः प्रचोदयात्मिके प्रणवशिरसात्मिके हुं फट् स्वाहा । एवं विद्वान् कृतकृत्यो भवति ; सावित्र्या एव तान् लोकान् जयति । इत्युपनिषत् ॥

Colophon :

इति सावित्र्युपनिषत् समाप्ता ॥

501

Sl. No. 2328 **सावित्र्युपनिषद्भाष्यम्** Ms. No. B. 247/55

Beginning :

बहूनां मिथुनानां च बलातिबलयोरपि ।
स्वरूपं प्रोच्यते यस्यां सावित्रीयं प्रपञ्च्यते ॥

ननु यत्र वायुस्तत्राकाश इत्यनुपपन्नम् ; न तु यत्राकाशस्तत्र वायुरिति ; कुतः ? पेटकादिष्वन्तराकाशसद्भावेऽपि वाय्वभावात् । + + अत्रोच्यते– पेटिकादिषु वायुः स्तब्धत्वेन विद्यत एव ; + अन्यथा प्रागविद्यमानस्योत्पत्त्यसम्भवात् ॥

End :

अथेह बलातिबलयोः क्षुदादिनिरसने विनियोग इत्युक्त्या काम्यप्रयोजनमात्रसिद्धिरित्याशङ्क्येत ; चतुर्विधपुरुषार्थसिद्धिप्रद इत्युक्तत्वान्न तथा शङ्कोपपद्येत ; चतुर्थो हि पुरुषार्थः मोक्षः । तस्मात् भोगमोक्षोभयार्थकौ मन्तव्यौ ॥

Colophon :

इति सावित्र्युपनिषद्भाष्यं समाप्तम् ॥

502

Sl. No. 2331 **सिद्धान्तशिखोपनिषत्** Ms. No. P. 7635/9

Beginning :

अथ भरद्वाजः कुमारं पप्रच्छ– किमेवं परमशिवभक्तानां सिद्धान्तं कुतस्सर्वे न विदन्तीति। तद्गृह्योवाच– स्कन्दः– भरद्वाज शृणु नाविक्लवचित्ताः– विन्दन्ति साम्बं सर्वदेवप्रकृष्टं शिवं वरेण्यम्; विपश्चित्तु शिवस्य प्रसादतो जातमात्राद्विदन्ति ॥

End :

